'मास्टर' मणिमालायाः १४७ संख्यको मणिः (वेदविभागे २)

* ॐ *

सायणीयर्ग्वेदभाष्यभूमिकायाः- बादरीनाथी टीका

रचयिता—

पं० श्रीत्रिलोकनाथमिश्रः

प्रकाशकः—

मास्टर खेलाड़ीलाल ऐराड सन्स

मूल्यम् १० आणकाः

हेमचन्द्र जोशी
श्रीकृष्णाभवन,
लखनऊ
२५-१२-१९५१

'मास्टर' मणिमालायाः १४७ संख्यको मणिः (वेदविभागे १)

* ॐ *

सायणीयऋग्वेदभाष्यभूमिकायाः-

बालबोधिनी टीका

विविधविरुदावलीविराजमानमानोन्नतमहाराजाधिराजमिथिलाधीश्वर-
कल्पतरुकल्प'श्रीलकामेश्वरसिंह'महोदयप्रभुवरच्छत्रच्छाया-
श्रितश्रीलोहनासंस्कृतविद्यापीठप्रधानाध्यापक-मैथिल-

पण्डितश्रीत्रिलोकनाथमिश्रेण

विरचिता

सा च

काशीस्थसंस्कृतबुकडिपोऽध्यक्षवरेण्यैः—

मास्टर खेलाड़ीलाल ऐण्ड सन्स, इत्येतैः

स्वकीये 'मास्टरप्रिण्टिङ्गवर्क्स' नाम्निमुद्रणागारे

मुद्रापयित्वा प्रकाशिता

सन् १९४१

मूल्यमष्टावाणकाः ।

प्रकाशक—
जे० एन० यादव प्रोप्राइटर
मास्टर खेलाड़ीलाल ऐण्ड सन्स
संस्कृत बुकडिपो,
कचौड़ीगली, बनारस सिटी ।

मुद्रक—
श्रीमन्नालाल 'अभिमन्यु' एम० ए०,
मास्टर प्रिण्टिङ्ग वर्क्स,
बुलानाला; काशी ।

हेमचन्द्र जोशी

* श्रीमहाकाली-महालक्ष्मी-महासरस्वतीभ्यो नमः *

सायणीय—

ऋग्वेदभाष्यभूमिकाया

बादरीनाथी टीका ।

अवलम्बे मुहुः श्यामाचरणाम्बुरुहद्वयम् ।
यत्प्रभावाद्बभूवुस्ते स्वःस्थाः स्वस्था महौजसः ॥
काञ्चन-प्रतिमां काञ्चित्कमलां कमलासनाम् ।
सेवकाभीष्टदामिष्टदेवतां हृदि भावये ॥
वीणा-निनाद-निपुणां त्रिगुणां करुणाकरीम् ।
शारदाम्भोजवदनां सारदां शारदां भजे ॥
तत्तन्निबन्ध-सम्बद्ध-पदार्थ-प्रतिपत्तये ।
सर्वविद्यानिधिं तातं [1]पदार्थमनुचिन्तये ॥
विस्मरतु मानसं मे कथमिव हरिशङ्करं गुरुं जातु ।
यत्पद-निर्म्मल-नखराऽऽदर्शेऽदर्शं त्रयी[2]मुखं रुचिरम् ॥
बालकृष्ण-चरणाम्बुजद्वयीमाश्रयाश्रय मनोमिलिन्द ! ये ।
यन्मनोहर-मरन्दसौरभे स-स्पृहाः [3]सुमनसोऽपि सन्ततम् ॥
स्वर्गतसोदर-'बदरीनाथ'-पदाम्भोरुहे मुहुर्ध्यात्वा ।
तन्नाम्नेयं टीका 'त्रिलोकनाथेन' तन्यते सुधिया ॥

---

(१) 'पदार्थमिश्र'—नामानं पितरम् । (२) त्रय्याः = ऋग्यजुःसाम्नां-मुखं-व्याकरणमित्यर्थः । दर्पणे हि मुखदर्शनमुचितमेव । (३) पुष्पार्थकत्वे नित्यबहुवचनान्तः स्त्रीलिङ्गश्च, विद्वदर्थकत्वे तु पुंलिङ्गो विवक्षाकृतबहु-वचनान्तश्च ।

"मङ्गलादीनि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्त्यायुष्मत्पुरुषाणि च" इत्यादि महाभाष्य-प्रदर्शितदिशाऽविगीतशिष्टाऽऽचारविषयत्वेन च प्रारिप्सितग्रन्थनिर्विघ्न-परिसमाप्ति-तत्प्रचारादि-सिद्धये विघ्नविघातकत्वात्समुचितेष्टदेवप्रणतिरूपं ग्रन्थादौ मङ्गलमाचरति **वागीशाद्या** इति । सुमनसो=देवाः । वेदार्थस्य प्रकाशन इति एतदनन्तरं "स प्राह नृपतिं राजन् सायणार्यो ममानुजः । सर्वं वेत्त्येष वेदार्थं व्याख्यातृत्वे नियुज्यताम्" इत्यधिकः पाठः क्वचिदुपलभ्यते । आध्वर्यवस्य=अध्वर्युर्यजुर्वेदज्ञः 'अध्वर्यूद्गातृहोतारो यजुःसामर्ग्विदः क्रमात्' इत्यमरात्, 'अध्वर्युरध्वरं युनक्ति' इत्यादिनिरुक्तोक्तेश्च तत्सम्बन्धिकर्म्मणः । सम्प्रदायतः=गुरुमुखात् । आम्नातत्वात्=श्रुतिप्रतिपादितत्वात् । अभ्यर्हितत्वात्=पूर्वव्याख्यानयोग्यत्वात् । पुरुषसूक्तस्थस्य 'तस्माद्यज्ञात्सर्वहुत' इति पदत्रयस्य क्रमेणार्थमाह-**सह होत्यादिना** । यज्ञादित्यस्यार्थमाह यजनीयादिति तस्य च पूजनीयादिति, एवञ्च मन्त्रे यज्ञादिति यजधातोर्बाहुलकाच्छान्दसत्वाद्वा कर्म्मणि नङ् प्रत्यय इतिबोध्यम् । सर्वैर्हूयमानादित्यर्थप्रदर्शनेन मन्त्रे 'सर्वहुत'—इति बाहुलकाच्छान्दसत्वाद्वा कर्म्मक्विबन्तात्पञ्चम्येकवचने रूपमिति सूचितम् । तत्रतत्र=स्थले स्थले, बुद्धिस्थपरामर्शकत्वात्तच्छब्दस्य । **इन्द्रं-मित्रमिति**—इन्द्र-मित्र-वरुणादिशब्दैरग्निमेवाहुराचार्याः, अथो=किञ्च, दिव्यः=दिविजातः, सुपर्णः=सुपतनशीलः, गरुत्मान्=स्तुतियोगाद्गरणवान् रसानां वा गरिता=आहर्त्ता-आदित्य इत्यर्थः सः=अग्निरेव, इममेवाग्निमेकं महान्तमभेदेन पश्यन्तः सद्विप्राः=आत्मवेदिनः अग्निं यमं मातरिश्वानमाहुरित्यर्थ इति निरुक्तवृत्तौ श्रीदुर्गाचार्यः । विसृष्टिः=विविधा सृष्टिरनेकतेति यावत् । **उ ह्येवेति**, उकारः पदपूरणः, 'हि' शब्दो हेतौ, एवकारोऽवधारणार्थः स्पष्टमवशिष्टम् । [1] वाजसनेयिनः=वाजसनेयो याज्ञवल्क्यस्तत्प्रोक्तशाखाध्यायिन

---

(१) अयमत्राभिसन्धिः-'ओं नमो भगवते आदित्याये'-त्यादिस्तुत्या याज्ञवल्क्येन प्रसादितो रविरश्वरूपो भूत्वा वाजेभ्यः=केसरेभ्यो वाजेन=वेगेन वा याः शाखास्त्यक्तवाँस्ता 'वाजसनी' सञ्ज्ञास्तद्वेदितृत्वाद्वाजसनेयो याज्ञवल्क्यः (वाजेभ्यो वाजेन वाऽस्यते=क्षिप्यत इति व्युत्पत्तिसिद्धाद्वाज

इत्यर्थः । **तैत्तिरीया** इति–तित्तिरिणा (१तित्तिरिरूपधारिणा मुनिना) प्रोक्तम-

सनीशब्दात् "स्त्रीभ्यो ढगि"ति ढक्) वाजसनेयेन प्रोक्तमधीयते वाजस-नेयिनः "शौनकादिभ्यश्छन्दसि" (४।३।१०६) इत्यनेन णिनि प्रत्ययः । तथा चोक्तं श्रीमद्भागवते—"एवं स्तुतः स भगवान् वाजिरूपधरो हरिः (सूर्यः) । यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः ॥ यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः । जगृहुर्वाजसन्यस्ताः काण्व-माध्यन्दिनादयः" इति ।

(१) 'तित्ति'–शब्दं रौतीति तित्तिरिः 'तित्ति' पूर्वकात् 'रु' धातोर्बाहुलकादौणादिको डिः प्रत्ययः । मुख्यन्त्वेतत् 'तितीर' इत्यनेन प्रसिद्धस्य पक्षिणो नाम तद्रूपधारित्वाद् याज्ञवल्क्यवान्तयजुर्ग्राहिषु मुनिविशेषेष्वपि, तत्कथा यथा—"वैशम्पायन-शिष्या वै चरका-ध्वर्यवोऽभवन् । यच्चेरुर्ब्रह्महत्यांहः-क्षपणं स्वगुरोर्व्रतम् ॥ याज्ञ-वल्क्यश्च तच्छिष्य आहाहो भगवन् कियत् । चरितेनाल्पसाराणां चरिष्येऽहं (व्रतन्तव) सुदुश्चरम् ॥ इत्युक्तो गुरुरप्याह कुपितो याह्यलं त्वया । विप्रावमन्त्रा शिष्येण, मदधीतं त्यजाश्विति ॥ देवरात-सुतः सोऽपि च्छर्दित्वा यजुषां गणम् । ततो गतोऽथ मुनयो ददृशुस्तान् यजुर्गणान्॥ यजूंषि तित्तिरा भूत्वा तल्लोलुपतयाऽऽददुः । तैत्तिरीया इति यजुः शाखा आसन् सुपेशलाः" इति श्रीमद्भागवते (१२।६।६८) तित्ति-रिणा प्रोक्तमित्यत्र प्रोक्तमिति प्रकर्षेणोक्तमित्येव न तु तेन कृतमिति तथा सति "अधिकृत्य कृते ग्रन्थे" (४।३।८७) इति सूत्रात् 'कृते ग्रन्थे' इत्यनुवृत्त्यैव सिद्धे 'तेन प्रोक्त'–मिति सूत्रस्य वैयर्थ्यापत्तेस्तथा च तेन प्रोक्तमिति सूत्रे भाष्यम्–"प्रोक्तग्रहणमनर्थकं तत्रादर्शनात्, प्रोक्तग्रहण-मनर्थकं किं कारणं ? तत्रादर्शनात्, ग्रामे ग्रामे कालापकं काठकञ्च प्रोच्यते तत्रादर्शनात्–न च तत्र प्रत्ययो दृश्यते ग्रन्थे च दर्शनात्-यत्र च दृश्यते ग्रन्थः स भवति तत्र 'कृते ग्रन्थे' इत्येव सिद्धम्, छन्दोऽर्थं तर्हीदं वक्तव्यं, न हि च्छन्दांसि क्रियन्ते, नित्यानि च्छन्दांसि । छन्दोऽर्थमिति चेत्तुल्यम् छन्दोऽर्थमिति चेत्तुल्यमेतद्भवति, ग्रामे ग्रामे च काठकं

धीयत इति तथा। तित्तिरिशब्दात् "तेन प्रोक्तम्" (४।३।१०१) इत्यधिकारे "तित्तिरिवरतन्तुखण्डिकोखाच्छण्" (४।३।१०२) इति सूत्रेण छणि णित्त्वादाद्यचो वृद्धौ छस्येयादेशे "प्रोक्ताल्लुक्" इत्यनेनाध्येत्रणो लुकि च रूपमेतत्। स्वाभिहिते=स्वस्वप्रतिपादिते। **विश्वासेति**—विश्वासं द्रढयितुमित्यर्थोऽर्थाद्यज्ञकर्म्मानुष्ठातृजनानामिति। [1]आथर्वणिकैः=अथर्ववेदपारगैः। अथर्ववेदस्य प्रचारकः सुमन्तु-मुनिरिति श्रीमद्भागवते। **ऋग्वेदं भगव इति**-"अधीहि भगव इति होपससाद सनत्कुमारं नारदस्तꣳ होवाच यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामीति। सहोवाच—ऋग्वेदं भगवोऽध्येमि यजुर्वेदꣳ सामवेद[2] माथर्वणञ्चतुर्थमितिहास-पुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं

कालापकञ्च प्रोच्यते तत्रादर्शनात् न च तत्र प्रत्ययो दृश्यते, ग्रन्थे च दर्शनात् यत्र दृश्यते ग्रन्थः स भवति तत्र 'कृते ग्रन्थे' इत्येव सिद्धम्। ननु चोक्तं नहि च्छन्दांसि क्रियन्ते नित्यानि च्छन्दांसीति? यद्यप्यर्थो नित्यः यात्वसौ वर्णानुपूर्वी साऽनित्या तद्भेदाच्चैतद्भवति—काठकं, कालापकं, मोदकं, पैप्पलादकमिति, न तर्हीदानीमिदं वक्तव्यं? वक्तव्यञ्च यत्तेन प्रोक्तं न तु तेन कृतं माथुरीवृत्ति"—रिति। भाष्योक्तपूर्वपक्षे वर्णानुपूर्व्या यथाऽनित्यत्वं तथा तत्रैव कैयटेन स्पष्टतरीकृतमिति तत्रैव द्रष्टव्यं जिज्ञासुभिः।

(१) अत्र अथर्वाणमधीयते विदन्ति वेत्यर्थे 'अथर्वन्' शब्दात् "तदधीते तद्वेद" इति (४।२।५९) सूत्राधिकारे 'वसन्तादिभ्यष्ठक्' इति (४।२।६३) सूत्रेण ठकि किति चेत्याद्यचो वृद्धौ ठस्येकादेशे भत्वात् "नस्तद्धिते" इति (६।४।१४४) सूत्रेण टिलोपः प्राप्तो "दाण्डिनायनहास्तिनायनाथर्वणिक-जैह्माशिनेय-वाशिनायनि—भ्रौणहत्य--धैवत्य-सारवैक्ष्वाक-मैत्रेय-हिरण्मयानि" इति (६।४।१७४) सूत्रे निपातनान्न भवति।

(२) अथर्वा, आथर्वण इति-अथर्वण इत्युभयमपि नाम तत्राथर्वणा प्रोक्तमधीयान आथर्वणिकः "दाण्डिनायने"—तिनिपातनाट्ठक्, तस्यायमाथर्वणः "आथर्वणिकस्येकलोपश्च" इति (४।३।१३३) इति सूत्रेणेकस्य लोपोऽण् प्रत्ययश्च 'आथर्वणो धर्म आम्नायो वा' इति तत्रैव भट्टोजिदीक्षित.।

निधिं वाको वाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याᳬ सर्वदेवजनविद्यामेतद्भगवोऽध्येमि सोऽहं भगवोऽध्येमि सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित्" इत्युपनिषदः स्वरूपम्। अत्र सर्वत्र [1]'भगव'—इतिसम्बोधनपदं तेन भगवन्नित्यर्थः। एवं सर्वत्रेति—अतएव "तस्मादण्डाद्विनिर्भिन्नाद्ब्रह्मणोऽव्यक्तजन्मनः। ऋचो बभूवुः प्रथमं प्रथमाद्वदनान्मुने" इत्युक्तमुपविभागस्य त्रयोदशेऽध्याये कूर्म्मपुराणे। अभ्यर्हितस्येति हेतुगर्भविशेषणं तेनाभ्यर्हितत्वादित्यर्थः। व्याख्यानमुचितमितीति—पूर्वोक्तस्य 'केचिदाहु' रित्यस्य कर्म्मैतत्। पारायणं—विस्मरणपरिहारायाभ्यसनम्, ब्रह्मयज्ञस्तु शुचौ देशे प्रत्यहं स्नानादिनित्यकृत्योत्तरं यथासङ्कल्पितं मन्त्राणां धर्म्मार्थः पाठ इत्युभयोर्भेदः। काचिद्दगेवेति—एतेन 'यत्प्राधान्याय तव दुराग्रहः स ऋग्वेद एव चेद्यजुषि प्राधान्यं ब्रूते तदा कस्त्व'-मिति सूचितम्। पुपुष्वानिति—अस्य 'पुनः पुनरतिशयेन वा देवतायाथात्म्यानुचिन्तन-सन्तानगर्भ-स्थानकरणानुप्रदानवतीर्यथाकालमृचोऽधीयान आस्त' इत्यर्थ इति निरुक्तवृत्तौ श्रीदुर्गाचार्यः। 'त्व' शब्द इति—एवमुतत्वः पश्यन्न ददर्श वाचमित्यादावपि बोध्यम्, होतृविशेषणत्वेन फलितमर्थमाह—'होतृनामक एक' इत्यादिना। होता=ऋगध्ययनसम्पन्नः, अत एवास्योपरि यजमानेन ऋङ्मन्त्रोच्चारणपूर्वकं हवनरूपकर्म्मकरणभारो निधीयते। सेयं पुष्टिरिति—तथाविध-ऋक्समुदायरूपशास्त्रकल्पनस्य पुष्टिरिति सञ्ज्ञेत्यर्थः। शस्त्रमिति—[2]तच्चाप्रगीतमन्त्रसाध्यगुणि[3]निष्ठगुणाभिधानम्। अर्चनीत्यमुमिति—ऋक्छब्दस्य 'अर्चनी' इत्यर्थ इत्यर्थः।

---

(१) भगः=ऐश्वर्यं विद्यते यस्येत्यर्थे 'भग'शब्दान्मतुपि तदन्तात्सुविभक्तावुगिदचामिति नुमि हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल्लोपे संयोगान्तलोपे च कृते नकारस्य "मतुवसोरुसम्बुद्धौ छन्दसि" इति (८।३।१) सूत्रेण रुत्वे भवो रोरित्युत्वे आद्गुणः। "संयोगान्तलोपो रोरुत्वे सिद्धः" इतिवचनादुत्वम्प्रति रुत्वं नासिद्धम्।

(२) 'प्रउगं शंसती' त्यादिनेत्यादिः। अप्रगीतमन्त्रा ऋग्वेदे पठिताः।

(३) गुणी=स्तुत्यो देवादिः।

तमेवार्थं दर्शयति **अर्च्यते** इत्यादिना। **तत्साधनेति**—क्रियासाधनविशेषो हविरादिरित्यर्थः। **विवृणोतीति**—अस्य पूर्वोक्तेन 'यास्क' इत्यनेन सम्बन्धः एवमुत्तरत्रापि। **तद्यदाभिरिति**—यत्=यस्मात् आभिर्ऋग्भिरग्निमभिष्टुवन्निन्द्रो वृत्रं हन्तुमशकत्तच्छक्वरीणां शक्वरीत्वमुपपन्नमित्यर्थः। **उद्गात्रिति**—उद्गाता=सामवेदपारगः। स्तोत्रम्=[1]प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानलक्षणम्। **धातूनामनेकार्थत्वेनेति**—अत्र "परौ भुवोऽवज्ञाने" "भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः" "सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः" इत्यादिसूत्रेषु तत्तदर्थनिर्देश एव प्रमाणम्। 'शक्वरी' शब्दस्य शक्नोतिधातुनिष्पन्नत्वे यास्कतात्पर्यमाह—**वृत्रं हन्तुमित्यादि**। 'शक्नोतेरेव शक्वर्य' इति हि ब्राह्मणवाक्यम्। ब्रह्मा=[2]त्रयीविज्ञाननिपुणः "अथ केन ब्रह्मत्वं क्रियते? त्रय्या विद्यया" इति हि (५।५।८) ऐतरेयब्राह्मणम्; "ब्रह्मा सर्ववित् यः सर्वं वेदितुमर्हति" इतिनिरुक्तभाष्यकृद्दुर्गवान् यास्काचार्यश्च। 'जाते जाते' इत्यस्यार्थमाह-**तदा तदोत्पन्न** इति। 'उत्पन्ने' इत्यस्यार्थमाह-**प्रस्तुत** इति, प्रारब्ध इति यावत्। प्रणयनादीत्यादि-एवञ्च तत्तदवसरे प्रणीतापात्रादिभिर्जलादीनामाहरण-(प्रणयना)-दिरूपे कर्म्मणि प्रस्तुते सति "ब्रह्मन्! अपः प्रणेष्यामि?" इत्येवमादिरूपेण ऋत्विग्भिः सम्बोध्य प्रार्थितः प्रणयनाद्यवसरं समीक्ष्य ब्रह्मा 'ओं प्रणय' इति तानाज्ञापयतीति पिण्डितोऽर्थः। अनुजानाति=आज्ञापयति। **योग्यतामिति**—ऋत्विजां, प्रणयनाद्यवसरस्य वा योग्यतामित्यर्थः। प्रमादः=स्खलनमनवधानतेति यावत्। **समाधातुमिति**—'अमुष्मिन् कर्म्मणि युष्माभिर्यथोचितं नाचरितं तस्मात्त-

(१) 'आज्यैः स्तुवत' इत्यादिनेत्यादिः। प्रगीतमन्त्राः सामवेदे पठिताः।

(२) 'स्त्रियामृक् सामयजुषी इति वेदास्त्रयस्त्रयी' इत्यमरः। त्रयीविज्ञानेऽपि निपुण इत्यर्थस्तेनाथर्ववेदज्ञत्वमप्यस्य सिध्यति, अथर्ववेदो हि ब्रह्मणाऽवश्यमध्येतव्य इति स्पष्टमन्यत्र। अत एव निरुक्ते सर्ववेदितृत्वं ब्रह्मण उक्तं सङ्गच्छते। 'त्रय्या विद्यये'-ति ब्राह्मणस्य तु 'अथर्ववेदसहितये'-त्यर्थ इति न तद्विरोधः।

द्दोषवारणाय यूयमेतत्प्रायश्चित्तं कुरुते' त्येवं प्रायश्चित्तं कारयित्वा तानृत्विजस्त-त्तद्दोषान्मोचयित्वेत्यर्थः, प्रायश्चित्तञ्च 'ॐ भूः स्वाहा' इत्यनेन गार्हपत्येऽग्नौ हवनरूपं होतुः[1],'ओं भुवः स्वाहा' इत्यनेन दक्षिणाग्नावध्वर्योः, 'ओं स्वः स्वाहा' इत्यनेनाहवनीयेऽग्नौ चोद्गातुरिति विवेक्तव्यम्। **तच्चेति**—अत्र तस्येत्यादिः। वर्त्तनीः=मार्गः, 'सरणिः पद्धतिः पद्या वर्त्तनी' इत्यमरः। वाङ्मनसरूपवर्त्तनी-द्वयेऽपि वर्त्तनीत्वस्य शक्यतावच्छेदकस्यैक्यात् 'वेदाः प्रमाणम्' इत्यादाविव 'वर्त्तनी' इत्यत्रैकवचनान्तता नासङ्गता। तयोरन्यतराम्=तयोर्वाङ्मनसयो-र्मध्ये एकाम्, 'वर्त्तनी'-मित्यस्य विशेषणमिदम्। कृत्स्नः=समग्रः। सम्यगनु-सन्धेयः= क्वचित्त्रुटिस्तु नाभूत् ?' इति विशेषरूपेण विचारणीयः। वाचा= वाग्रूपेण मार्गेण। तत्र=तयोरुक्तमार्गयोः। **तस्मादस्यास्तीति**— मुख्यस्य (अथर्ववेदसहितत्रयीपारगस्य ब्राह्मणरूपस्य) ब्रह्मणः प्रसङ्गे गृह्यसूत्रादिषु "समा-ग्रपञ्चाशत्कुशपत्ररचितद्विर्दक्षिणावर्त्तोर्ध्व[2]मुखदर्भवटुरूप-च्छत्ररूपो-त्तरासङ्ग[3]रू-पकमण्डलुरूपाणामौपचारिकब्रह्मणां निरूपणं तूपनयन-विवाहादिगत-तदी-याङ्गभूतसाधारणयज्ञविषयकमेव न तु प्रचुरतत्त्वज्ञानसमधिगम्य-दीर्घकालव्यापि प्रधानभूतज्योतिष्टोमादियज्ञविषयकं, तत्रर्त्विजां दिङ्मोहस्यापाकरणाय ब्राह्मण-रूपस्यैव ब्रह्मण उपादेयत्वादितरथा मनोरूपस्य यज्ञमार्गस्य तैस्तैर्दर्भवटु-रूपादिभिर्ब्रह्मभिरशक्यसंशोधनत्वेन 'ब्रह्मा त्वो वदति जातविद्याम्' इति श्रुते,-र्यास्ककर्त्तृकतद्विवरणस्य चासङ्गत्यापत्तेः। अध्वर्युनामकः=यजुर्वेदपारगः। तन्निष्पादकत्वं=यज्ञस्वरूपसम्पादकत्वम्। **निर्वचनादिति**—निर्विविच्य वचनं निर्वचनं, प्रकृति-प्रत्ययार्थादिव्युत्पादनं तस्मादित्यर्थः। तदेव दर्शयति-अध्वर्युरि-त्यादिना। **छान्दस्यामिति**—अत्र छन्दः शब्दात् "छन्दसो यदणौ" इत्यनेनाणि तदन्ताट्टिड्ढेति ङीप् तेन छन्दःसम्बन्धिन्यामित्यर्थः। **लुप्तमकार-मिति**—'अध्वर'-शब्दात् 'आत्मनोऽध्वरमिच्छती'-त्यर्थे "सुप आत्मनः क्यच्"

---

(१) अस्य 'प्रायश्चित्त'-मिति पूर्वेणान्वयः। एवमध्वर्योरित्यस्यो-द्गातुरित्यस्य च। (२) 'अस्त्री कुशं, कुशो दर्भ'-इत्यमरः। (३) 'द्वौ प्रा-वारोत्तरासङ्गौ समौ बृहतिका तथा। सङ्व्यानमुत्तरीयञ्च' इत्यमरः।

इति (३।१।८) सूत्रेण क्यचि तदन्तस्य धातुत्वेन सुपो धात्विति विभक्तिलुकि क्यचिचेति अकृत्सार्वेति च सूत्राभ्यां प्राप्तयोरीत्वदीर्घयोः "न च्छन्दस्य पुत्रस्य" इति (७।४।३५) निषेधे "क्याच्छन्दसि" इति (३।२।१७०) सूत्रेण 'अध्वर+य' इति क्यजन्तादुप्रत्यये तस्मिन् परतोऽतो लोपे च 'अध्वरयु' शब्दं निष्पाद्य क्यज्निमित्तकं "कव्यध्वरपृतनस्यर्चिलोपः" इति (७।४।३९) सूत्रेण लुप्तमध्वरशब्दान्त्यमकारमित्यर्थः । **अध्वरं युनक्तीति**—नास्ति [१] ध्वरः=हिंसा यस्मिँस्तम् । **अवयवार्थ इति**—यास्कदर्शित इति भावः, एवं तात्पर्यार्थोऽपि स एव । नेता=नायकः । एतदेवाऽभिप्रेत्य=अमुमेवार्थमादाय । **अध्वर्युवेदस्येति**—अध्वर्योर्वेद इति सम्बन्धसामान्यषष्ठ्या समासस्तस्य-यजुर्वेदस्येत्यर्थः । अत एवाग्रेऽनुपदं वक्ष्यति-'अध्वर्युसम्बन्धिनि यजुर्वेदे' इति । मन्त्रा मननादित्यादीनामर्थौ निरुक्तवृत्तिकृता दुर्गाचार्येण दर्शितो यथा-"यतस्तेभ्योऽध्यात्माधिदैवाधियज्ञादिमन्तारो मन्यन्ते तस्मात्तेषां मन्त्रत्वम्, यदेभिरात्मानमाच्छादयन् देवा मृत्योर्बिभ्यतस्तच्छन्दसां

---

(१) 'ध्वृ' धातोः, 'धुर्वी' धातोर्वा हिंसार्थान्निष्पन्नस्य 'ध्वर' शब्दस्य नञासमासेऽहिंस्र इत्यर्थः, न च 'पशुना यजेत' 'कपिञ्जलानालभेत' इत्यादिवाक्यबोधितहिंसायाः सत्त्वेन यज्ञे हिंसाराहित्याभावात्तद्वदुक्तमयुक्तमिति वाच्यम्, "न वा उ एतस्मिन् म्रियसे" (य० वा० स० २३।१६ , "सं ते प्राणो वातेन गच्छतां, समङ्गानि यजत्रैः, संयज्ञपतिराशिषा" इत्यादिश्रुतिवाक्येभ्योऽभ्युदयरूपत्वश्रवणात् । तथा च मनुः—"यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः" इति । निबन्धकारा अपि—"यज्ञार्थे पशवः सृष्टा यज्ञार्थे पशुघातनम् । अतस्त्वां घातयिष्यामि तस्माद्यज्ञे बधोऽवधः" इति । अत एव यज्ञप्रकरणे श्रूयते—"पशुत्वमिच्छन्ति तृणानि राजन्" इति । इह पशुत्वमित्यस्य छागत्वमित्यर्थः, "छागोऽनादेशे पशुः" इति श्रुतेः । एवञ्च 'मा हिंस्या'-दित्यादीनां सामान्यशास्त्राणां 'पशुना यजेते'—त्यादिना विशेषेण नित्यबाधाद्यज्ञस्याध्वरत्वं स्पष्टमेव ।

छन्दस्त्वमिति [1]विज्ञायते, यजुः कस्मात् ? यजतेर्धातोस्तेन हि विशेषत इज्यते, सर्वत्र याज्यान्ते वषट्कारविधानात्" इति। 'स्तोमः स्तवनात्' इत्यस्य तु प्रस्फुटत्वाट्टीका न कृता टीकाकृता, स्तोमैः स्तूयत इति हि प्रसिद्धमेव अक्षरानुकूलञ्च। **अध्वर्युसम्बन्धीति—** अध्वर्युसम्बन्धी यजुर्वेदस्तेन निष्पन्नं=सम्पन्नमित्यर्थः। यज्ञशरीरं=यज्ञस्वरूपम्। उपजीव्य=आश्रित्य। तदपेक्षितौ=तेनापेक्ष्यमाणौ। **स्तोत्र-शस्त्ररूपाविति—** प्रागुक्तलक्षणौ। वेदद्वयेन=[2]ऋक्सामाभ्याम्। **प्रथमतो व्याख्यानमिति—** यथा लोके राजाश्रितेषु नानाभृत्येषु कार्यवशाद्राज्ञापेक्ष्यमाणेषु सत्स्वपि व्यवहारदशायां राज्ञ एव प्राधान्यं तथेति भावः। उर्ध्वम्=अग्रे। उभयोः=ऋक्सामयोः। वेदास्तित्वं दर्शयितुं तावत्पूर्वपक्षयति—**नन्वित्यादिना**। तदुभयव्यतिरेकेण=लक्षणप्रमाणाभ्यां विना। लक्षणस्य प्रमाणम्प्रत्यपिकारणत्वेनाभ्यर्हितत्वात् 'लक्षणप्रमाणाभ्या'-मित्यत्र प्रमाणपदात्पूर्वं लक्षणपदमुपात्तम्, तदुक्तं मीमांसकैः—"मानाधीना मेयसिद्धिर्म्मानसिद्धिस्तु लक्षणात्" इति। अत्र मानं=प्रमाणम्, मेयः=प्रमेयः—चक्षुरादिज्ञानगोचरो घटादिरिति यावत्। इदमत्र प्रष्टुराकूतम्—सजातीय-विजातीयव्यावर्त्तको लक्ष्यगतः कश्चिल्लोकप्रसिद्ध आकारो लक्षणं तेन हि लक्ष्ये सम्भावनाबुद्धौ जातायां प्रमित्सुः प्रमाण (प्रत्यक्षादि)-बलात्तदवबुध्यते, यथा—सास्नादिमती गौरिति कश्चित् कस्यचिन्मुखादुपश्रुत्य [3]तल्लक्षणलक्षितं पदार्थमन्विष्य 'इयं गौ'-रिति चक्षुषा प्रत्यक्षीकरोति; वेदस्य तु लौकिकाकाराहित्याल्लक्षणमेव नास्ति तदभावाच्च कुतः प्रमातुमुद्योग इति। [4]अन्तिमः=आगमः। **अतिव्याप्तिरिति—** अलक्ष्ये लक्षणस्य गमनमित्यर्थः। ननु मन्वादिस्मृतिष्वागमत्वमेव नास्ति कुतस्तरामतिव्याप्तिरिति चेत्तत्राऽऽह-**समय-**

(१) विचार्यमाणे सति क्वचिद्ब्राह्मणग्रन्थे ज्ञायते (श्रूयते)।
(२) इह कृतद्वन्द्वात् 'ऋक्सामन्' शब्दात् अचतुरेत्यादिना समासान्तोऽच्।
(३) सास्नादिमत्त्वरूपलक्षणेन लक्षितं ज्ञात पदार्थ-गवादिरूपमन्विष्य=निश्चित्येत्यर्थः। (४) 'अन्ते भव'—इत्यर्थे "अग्रादिपश्चाड्डिमच्" इत्यधिकारे "अन्ताच्च" इति वार्तिकेन डिमच् प्रत्ययोऽत्र।

बलेनेति—समयः=सिद्धान्तः-शक्तिः-सम्प्रदायो वा। तास्वपि=मन्वादिस्मृतिष्वपि। अपौरुषेयत्वे सतीति विशेषणादिति–'अपौरुषेयत्वे सति समयबलेन सम्यक्—परोक्षार्थानुभवसाधनत्वमागमत्व'-मिति लक्षणकरणादित्यर्थः। **शरीरधारीति**—आगमलक्षणघटकमपौरुषेयत्वं शरीरधारिजीवनिर्मितत्वाभावावत्त्वं तच्च न स्मृत्यादिषु, तन्निर्मातॄणां मन्वादीनां शरीरधारित्वात्, वेदे त्वस्त्येव तथा, तन्निर्म्मातुरीश्वरस्याशरीरित्वादिति भावः। **शरीरित्वा-(नुमाना)—दिति**—करचरणाद्यवयवविशिष्टत्वरूपशरीरित्वस्येश्वरेऽपि सत्त्वादिति भावः। **जीवविशेषैरिति**—कर्मफलरूपं शरीरं विशिष्य भेदज्ञानयोग्यं तच्च देवदत्त-यज्ञदत्तादीनामिवाग्निवाय्वादित्यानामप्यस्त्येव ततश्च तादृशशरीरधारिभिरग्निवाय्वादित्यैर्निर्मितत्वेन लक्षणसमन्वयात्पुनरपि वेदेषु पौरुषेयत्वमापतितमिति पूर्वपक्षिसमाक्षेपः। वेदानामग्न्यादिनिर्मितत्वं श्रुत्या सङ्गमयति-**ऋग्वेद एवाग्नेरित्यादिभिः**। ननु तर्ह्यग्न्यादिनिर्मितत्वमेव न तु परमेश्वरनिर्मितत्वमिति चेत्तत्राऽऽह—**ईश्वरस्याग्न्यादिप्रेरकत्वेन निर्मातृत्वमिति**। अत एव श्रूयते—"त्रयो वेदा असृज्यन्त–अग्नेर्ऋग्वेदो वायोर्यजुर्वेद आदित्यात्सामवेदः" इति। अत्र हि 'असृज्यन्त' इति कर्मणि प्रत्ययस्य, अग्नेरित्यादिषु पञ्चम्याश्च दर्शनादग्नि-वाय्वादिव्यतिरिक्तः स्रष्टा वेदानामिति स्पष्टं प्रतीयते स एव प्रयोजकत्वेनाभिमतः। श्रूयते च "ऋचः सामानि छन्दांसि पुराणं यजुषा सह। उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः" इति अथर्ववेदे (११।७)। उच्छिष्टो=विराड्रूप ईश्वरः। मन्त्रब्राह्मणात्मक इति अत्र 'मा भूदागमात्मको वेदः किन्तु' इत्यादिः। लक्षणं दूषयित्वा प्रमाणं दूषयितुमाह—**नापीति**। **ऋग्वेदमिति** एतद्वाक्यस्वरूपं दर्शितं प्राक्। **इत्यादीति**—आदिना "तꣳहोवाच–यद्वै किञ्चैतदध्यगीष्ठानामैवैतन्नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थः" इत्यादीनि विज्ञेयानि। वेदान्तः पातित्वेन=वेदमध्यस्थितत्वेन। **आत्माश्रयत्वेति**—आत्मा=वेदः आश्रयः=अवलम्बनं यस्य तत्–'ऋग्वेदं भगव'–इत्यादिवाक्यमात्माश्रयं तस्य भावस्तस्मात्–परस्परापेक्षत्वादित्यर्थः। तच्चेत्थम्–प्रमाणसिद्धौ

वेदास्तित्वसिद्धिस्तत्सिद्धौ च वेदान्तः पातिनाम् 'ऋग्वेदं भगव'—इत्यादिना वेदास्तित्वसाधकप्रमाणानां सिद्धिरिति। एतदेव दृष्टान्तयति—**न खल्वित्यति-** खलु=यतः। निपुणः=शिक्षितः। प्रभवेत्=शक्नुयात्। **वेद एवेति—** अस्य "यज्ञानां तपसाञ्चैव शुभानाञ्चैव कर्म्मणाम्" इति पूर्वार्द्धम्। प्रत्यक्षादिकन्त्विति–प्रत्यक्षस्य चक्षुरादीन्द्रियसन्निकर्षयोग्यपदार्थविषयत्वात्, अनुमानादेरपि प्रत्यक्षेण व्याप्त्यादौ गृहीते सत्येव सद्भावाच्चेति भावः। [1]सार्वजनीनाऽपि=सर्वजनविदितापि। नीलं नभ इत्यादिवदिति यथा शून्यरूपस्य नभसो (गगनस्य) भ्रान्तमपि नीलत्वं दूरभूयस्त्वादभ्रान्तवदाभाति तथा पौरुषेयोऽपि वेदश्चिरपूर्वनिर्म्मितत्वादपौरुषेयवत्प्रतीयते न तु वस्तुतस्तथेति भावः। इत्यादिवदभ्रान्तेति–यथेयं प्रसिद्धिरभ्रान्तेव प्रतीयते न तु वस्तुतोऽभ्रान्ता किन्तु भ्रान्तैव, तथेत्यर्थः। भ्रान्तेतिपाठस्तु सङ्गतः। **लक्षणप्रमाणरहितत्वादिति-** 'लक्षणप्रमाणरहितस्य वेदस्य' इति क्वचित् पाठः। नाङ्गीकर्त्तुं=न स्वीकर्त्तुम। अत्राङ्गीकरणक्रियाकर्म्मणः 'सद्भाव' इत्यस्यानुक्तत्वेऽपि शक्यत इति प्रधानक्रिययोक्तत्वान्न द्वितीया। कैयटस्तु–'शक्यञ्चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुम्' इति भाष्यं विवृण्वन् "यदा तु प्रतिघातस्यैव क्षुत्कर्म शकेस्तु प्रतिघातस्तदा 'क्षुधम्प्रतिहन्तु'-मिति भवत्येवे" त्याह, तन्मते 'सद्भावमङ्गीकर्त्तु'-मिति युक्तमेव। परन्त्वयं पक्षो नागेशासम्मत इति "स्वादुमि णमुल्" इति (३।४।२६) सूत्रे शब्देन्दुशेखरे भाष्यप्रदीपोद्द्योते चोद्द्योतितम्। तावत्=सर्वथा। लक्षणमिति–वेदस्येत्यर्थः। **यज्ञपरिभाषायामिति** 'आपस्तम्बपरिभाषा' नाम्नाऽद्यत्वे प्रसिद्धोऽसौ ग्रन्थः। वेदनामधेयम्=वेद इतीयं सञ्ज्ञा, नामधेयमित्यत्र नामशब्दात् "भागरूपनामभ्यो धेयः" इत्यनेन स्वार्थे धेयः प्रत्ययः। "नामधेयञ्च नाम च" इत्यमरः। तयोः=मन्त्रब्राह्मणयोः। उपरिष्टात्=प्रसङ्गात्,–वेदापौरुषेयत्वप्रतिपादनोत्तरं "तच्चोदकेषु मन्त्राख्या" (२।१।३२) "शेषे ब्राह्मणशब्दः" (२।१।३३) इति सूत्रद्वयनिरूपणेन जैमिनिनेत्यर्थः।

---

(१) प्रतिजनादित्वात् खञन्तस्येदं रूपम्। 'सर्वजनीना' इति पाठान्तरे तु "सर्वजनाट्ठञ्खश्च" इति खः प्रत्ययो बोध्यः।

उत्तरत्र=अग्रे,–"वेदाँश्चैके सन्निकर्षं पुरुषाख्या" (१।१।२७) "अनित्य-दर्शनाच्च" (१।१।२८) इति सूत्राभ्यां पूर्वपक्षीकृत्य "उक्तन्तु शब्दपूर्वत्वम्" (१।१।२९) "आख्या प्रवचनात्" (१।१।३०) "परन्तु श्रुतिसामान्य-मात्रम्" (१।१।३१) "कृते चाविनियोगः स्यात्कर्म्मणः समत्वात्" (१।१।३२) इति सिद्धान्तसूत्राणामर्थविवरणेनेत्यर्थः। **यथोक्तेति**—यथोक्तपदस्य द्वन्द्वादौ श्रूयमाणत्वात् श्रुति-स्मृति-लोकप्रसिद्धिषु प्रत्येकमन्वयः। ननु यथोक्तश्रुति-स्मृत्यादिषु दर्शितस्यात्माश्रयत्वदोषस्य दुष्परिहरत्वात् कथं प्रामाण्यमिति चेत्तत्राऽह—**यथा घटपटादिद्र० गणामिति**। अकुण्ठितशक्तेः=अप्रति-हतसामर्थ्यस्य। स्वप्रतिपादकत्वमस्त्विति तेन नात्माश्रयत्वप्रसङ्ग इति भावः। अकुण्ठितशक्तित्वमेव दर्शयति—**अत एवेत्यादिना**। 'अथाम्नायः सम्प्र-दाय'–इत्यमरात्सम्प्रदायो गुरुपरम्पराप्राप्त उपदेशस्तं विदन्ति=जानन्तीति सम्प्रदायविदो गुरुशिक्षा-परम्पराज्ञातवेदमर्म्माणः। चोदना=वेदः। विप्रकृष्टम्=अतिदूरवर्त्तिनम्। **एवञ्जातीयमिति**—एवञ्जातीयमपीत्यर्थः। अवगमयितुम्=बोधयितुम्। वेदमूलायाः 'ऋग्वेदं भगवो'–इत्यादिर्वेदो मूलं यस्यास्तथा भूतायाः "वेद एव द्विजातीनां निःश्रेयसकरः परः" इति स्मृतेः। लोकप्रसिद्धेः=अपौरु-षेयो वेद इति लोकव्यवहारस्य। **चार्वाकेति**—चारु=शास्त्रमर्यादाविश्रृङ्खल-जनमनोरमं वनिताऽऽलिङ्गनादिजन्यं सुखमेव मोक्ष इत्येवं वाक्यं यस्य स चार्वाको नास्तिकविशेषः, पृषोदरादित्वात्साधुः। आदिना सौत्रान्तिक-वैभासि-कादेर्ग्रहणम्। अपोढुम्=नास्तीति कृत्वाऽपलपितुम्। स्थितम्=सिद्धम्। अनुपयुक्तत्वात्=व्याख्यानायोग्यत्वात्। [1]दुःसम्पादत्वात्=सम्पादयितुम-शक्यत्वात्। **अनधिगतेति**—अनधिगतः=अज्ञातो योऽर्थस्तस्य गन्तृ=ज्ञापकम्। उभयोरसम्भवमेव दर्शयति—**मन्त्रब्राह्मणात्मको हीत्यादिना**। तत्सम्यक्त्वम्=अनुभवस्य सम्यक्त्वमनुभवयाथार्थ्यमिति यावत्। तदीयसा-धनत्वं=यथार्थानुभवसाधनत्वम्। अयमिह समुदायार्थः—सम्यगनुभवसाधनं प्रमाणं तत्र अम्यगादिमन्त्रेषु कस्यचिदर्थस्यानुभवोऽपि नास्ति अनुभवसम्य-

(१) दुर-सम्+पद+णिच्+खल स च "ईषद्दुः सुषु" इत्यादिना कर्म्मणि।

कत्वस्य सम्यगनुभवसाधनत्वस्य वा चर्चैव केति । दूरापेतम्=दूरत एव निरस्तम् । **सन्दिग्धेति**—विकल्पार्थकेन स्विदित्यनेन सन्दिह्यार्थ-बोधकत्वादिति भावः । **दर्भविषय इति**-दर्भपदमत्र दर्भग्रहणपरं तेन दर्भग्रहणं विषयो यस्येत्यर्थः । **क्षुरविषय इति**—क्षुरपदमत्र क्षुरस्य केशानामुपरि यन्निधानं तत्परं तेन क्षुरधारणं विषयो यस्येत्यर्थः । इत्थमत्र तात्पर्यम्—जन्मतस्तृतीये पञ्चमे वा वर्षे विहिते चूडाकरणकर्म्मणि कपुष्णिका-कपुच्छला-कृकाटिकानाम्नीषु "आमन्त्रये जूटिके त्वां चूड़ाकरणकर्म्मणि । प्रभाते छेदनार्थाय कुमारस्य शुभाय च" इत्यादिनाऽऽमन्त्रितासु पूर्वनिशाबद्धासु तिसृषु जूटिकासु प्रत्येकं कुशपत्रसप्तकसंयोजनाय 'ओषधे त्रायस्वैनम्' इति, तास्वेव च ताम्रक्षुरनिधानाय 'स्वधिते मैनं हिंसीः' इति च मन्त्रौ **विनियुक्ताविति**। एतच्च सामग-रीत्यनुसारेणोक्तं, वाजसनेयिनां तु "ओषधे त्रायस्व स्वधिते मैनꣳ हिꣳसीः" इति समस्तमन्त्रेण दर्भग्रहणम्, "निवर्त्तयाम्यायुषेऽन्नाद्याय" इत्यादिमन्त्रेण च क्षुरधारणमिति बोध्यम् । **शृणोतेति**—'हे पाषाण ! यूयं शृणुत' इत्यर्थः । एवमेव "एते [1]वदन्ति शतवत्सहस्रवदभिक्रन्दन्ति हरितेभिरासभिः । विष्वी ग्रावाणः सुकृतः सुकृत्यया होतुश्चित्पूर्वे हविरद्य[2]माशत" इत्याद्यप्यवसेयम् । एषोऽपि हि पाषाणस्तुतावेव विनियुक्तो मन्त्रः । अस्यार्थो विस्तरभयान्नोपन्यस्तः । अत्र पाषाणकर्तृकमाह्वानं श्रूयते तच्चासम्भवम् ।

अप्रामाण्यमित्यस्य एतेष्विति पूर्वेणान्वयः ।**इति वाक्यवदिति**—यथा 'यावज्जीवमहं मौनी' इति वदतो जीवनावधिकं मौनित्वमनेनैव स्वोक्तेन वाक्येन व्याहतं (विरुद्धम्) तथा एकेनैव वेदेनैकमेव रुद्रमुद्दिश्य 'एक एव रुद्र' इति 'सहस्राणि सहस्रश'-इति च प्रतिपादनं परस्परं विरुद्धमिति भावः । **आप उन्दन्त्विति**—सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूम्, दीर्घायुत्वाय वर्चसे' इति मन्त्रस्वरूपम् । **शुभिके इति**—अयं मन्त्रो बौधा-

(१) अयम्मन्त्रो निरुक्तसप्तमाध्याये वृत्तिकृता श्रीदुर्गाचार्येणव्याख्यातः।

(२) भोजनीयम् ।

यन-श्रौतसूत्रे स्पष्टः । **अनधिगतार्थगन्तृत्वं-नास्तीति** जलेन शिरसो मार्जनस्य पुष्पमालायाः शिरस्यवस्थानस्य च सर्वजनविदितत्वादनुवादकरूपयोर्मन्त्रयोरनयोरज्ञातार्थज्ञापकत्वं नास्तीति निष्कर्षः । **अम्यगादिमन्त्राणामिति**— 'अम्यक् सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति । अग्निश्चिद्धिस्मातसे शुशुक्वा नापो न द्वीपं दधति प्रयांसि' इति प्रथममन्त्रस्वरूपम्, अस्यायमर्थः-'हे इन्द्र ! यदा त्वया सा ऋष्टिः=रेषणा शक्तिरिति यावत्, आभिमुख्येन मेघमञ्चिता=मेघम्प्रतिक्षिप्ता भवति या ते=तवाऽऽत्मनः स्वभूता, अथ=तदा मरुतोऽपि तदनुवर्त्तनेच्छयैव अस्मे=अस्मदर्थं सनेमि=चिरन्तनम् अभ्वं=बहूदकमिह पातयितव्यमिति धिया स्वान्यायुधानि मेघविदारणाय जुनन्ति=प्रापयन्ति, सर्वेषामेवायुधानां भावत्कै (त्क्ये) व शक्तिः अग्निश्चित्= अग्निरिव अतसे=काष्ठे शुशुक्वान्=देदीप्यमान एतस्मिन् मेघे आस्ते, किञ्च आपो [1]न द्वीपं=यथा [2]नादेया आपो [3]द्वीपं परिवार्यात्मानं धारयन्ति एवमेतानि प्रयांसि=उदकानि वृष्टेमर्हत्त्वान्मज्जयितु[4]मशक्नुवन्ति द्वीपमिव परिवार्य धारयन्ति' इति । एवं 'यादृश्मिन् धायि०' 'सृण्येव जर्भरी०' 'अपान्तमन्युः०' इत्यादि-मन्त्राणामपि स्वरूपाण्यर्थाश्च ६ अ० १४-१५ खण्डयोर्निरुक्ते निरुक्तवृत्तिकृता प्रदर्शिता इति तत्रैव द्रष्टव्याः । अवबोधितः=दर्शितः । तत्परिचयरहितानाम्=निरुक्तज्ञानशून्यानाम् । अबोधः=अज्ञानम् । उदाहरन्ति= कथयन्ति वृद्धा इति शेषः । **स्थाणोरिति**—छिन्नशाखो वृक्षः स्थाणुरित्यग्रे [5]मूल एव स्फुटी भविष्यति । **पुरुषेति**—अन्धपुरुषापराध इत्यर्थः । **निश्चेतुमेव प्रवृत्त इति**—अत्र'प्रवृत्त'-इत्येतद्रहित एव पाठो मह्यं रोचते-पूर्वं प्रक्रान्तेनैव 'प्रवृत्त' पदेन गतार्थत्वात् । तदर्थमेव=अतिगम्भीरत्वनिश्चया-

---

(१) 'अश्वं न त्वा वारवन्तम्' इत्यादाविवात्र नञ् उपमार्थ इति स्पष्टं निरुक्ते । (२) 'नद्यादिभ्यो ढक्' इत्यनेन नदी+ढक् । (३) द्विर्गता आपोऽस्मिन्नित्यर्थे 'ऋक्पूरप्०' इत्यपः 'द्व्यन्तरुपसर्गेभ्योऽप ईत्' इतीत्वे, सवर्णदीर्घः । (४) शत्रन्तस्य नञासमासः । (५) 'स्थाणुरयं भारहारः किलाभूत्' इतिमन्त्रव्याख्यायाम् ।

र्थमेव । दुर्बोधत्वमिति–अस्य 'उपन्यस्यते' इत्यग्रिमेणाऽन्वयः । **गुरुशास्त्रेति**—गुरुशिक्षापारम्पर्यशून्यैरित्यर्थः । उपरितनेषु=उपरिभवेषु–'अधः स्विदासीत्' इत्यतः पूर्वमाम्नातेष्विति यावत्, तथा हि–"तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरिस्विदासी३त्। रेतोधा आसन् महिमान आसन् स्वधा अवस्तात् प्रयतिः परस्तात्" "को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः। अर्वाग्देवा अस्य विसर्जनेनाथ को वेद यत आबभूव"इति। **को अद्धेति**–"को अद्धा वेद क इह प्रवोचद्देवाँ अच्छा का पथ्या समेति । ददृश्र एषामवमा सदांसि परेषु या गुह्येषु व्रतेषु" इति मन्त्रस्वरूपम् (ऋ० सं०) अस्यार्थः–'को वा अद्धा=सत्यभूतं' 'तत्त्वे त्वद्धा[1]ञ्जसाद्वयम्' इत्यमरः, तादृशमर्थं वेद=जानाति को वा इहाऽस्मिन् जगति प्र=प्रज्ञातमर्थं [2]वोचत्=ब्रवीति किं तत् ? तदुच्यते–देवान् अच्छा[3]=अभिलक्ष्य का पथ्या=पथि साधुः समीचीनः को मार्गः समेति=सम्यक्प्राप्नोतीति केन मार्गेण देवास्तर्पयितव्या इतीममर्थं न कोऽपि जानाति न वा कोऽपि ब्रवीतीति भावः, किं ते देवा विद्यन्ते ? वाढमित्याह–एषां दिविस्थितानां नक्षत्ररूपाणां देवानाम् अवमा=अधोमुखानि सदांसि=स्थानानि ददृश्रे=दृश्यन्ते, तथाऽपि परेषूत्तमेषु गुह्येषु=दुर्ज्ञानेषु व्रतेषु=कर्मसु अनुष्ठितेषु च या[4] यानि दिवि=देवस्थानानि लभ्यन्ते तत्र (त्रा) गन्तुं को मार्ग इति वेदमन्तरेण न कश्चिदपि जानातीत्यभिप्राय इति। **चेतना इति**—न तु ओषध्यादय इत्यर्थः । तेन तेन=ओषधि-स्वधित्यादिना। ताः=चेतनारूपाः । बादरायणेन=वेदान्तसूत्रकृता श्रीवेदव्यासेन । **अभिमानीति**—'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम्' इतिसूत्रे इत्यर्थः । एतद्धि (सूत्रम्) 'मृदब्रवीत्' 'आपोऽब्रुवन्' इत्यादिषु (श० प० ब्रा० ६।१।३।२।४) 'तत्तेज

---

(१) अव्ययमिदं स्वरादिषु पठितम्, 'अद्ध' इति पाठस्तु कोषवेदाद्यनवलोकनमूलको मुद्रणदोषकृतो वेत्यवगन्तव्यम् । (२) छान्दसत्वाल्लकारव्यत्ययः । (३) इदमप्यव्ययमेव । (४) 'शेश्छन्दसि बहुलम्' इत्यनेन शिलोपे प्रत्ययलक्षणेन त्यदाद्यत्वेऽजन्तत्वात् 'नपुंसकस्य झलच्' इति 'सर्वनामस्थाने' 'चासम्बुद्धा'–विदित दीर्घोत्तरं न लोपः ।

ऐक्षत' 'ता आप ऐक्षन्त' इत्यादिषु च (छा० उ० ६।२।३।४) वाक्येषु श्रूयमाणानां चेतनकर्तृकाणां वचन-दर्शनादीनामचेतनेषु मृदादिषु सङ्गमनाय मृदाद्यभिमानिन्यस्तत्तदधिष्ठात्री(तृ)त्वेन स्थिताश्चेतना एव देवताश्चेतनोचितेषु वचन-सन्दर्शनादिषु व्यवहारेषु तैस्तै 'मृदब्रवीत्'-इत्यादि मन्त्रैर्व्यपदिश्यन्ते न भूतादिमात्रमित्यर्थपरतया ब्रह्मसूत्रशाङ्करभाष्ये (२ अ० १ पा०) भगवता भाष्यकृता व्याख्यातमित्यधिकजिज्ञासुभिस्तत्रैव द्रष्टव्यम् । स्वमहिम्ना= निजसामर्थ्येन । नन्वेवमपि 'आप उन्दन्तु' 'शुभिके शिर'–इत्यादीनां लोकप्रसिद्धार्थानुवादकत्वादनधिगतार्थगन्तृत्वाभावस्तदवस्थ एवेति चेत्तत्राऽऽह= **जलादीति** । **तदभिमानीति**—तेषां=जलादिद्रव्याणामभिमानिन्यः= अधिष्ठात्र्यो या देवतास्तासामनुग्रहस्य=दीर्घायुष्ट्वादिवितरणरूपस्य अप्रसिद्धत्वात्=लोकाप्रसिद्धत्वादित्यर्थः । तद्विषयत्वेन=तमंशमादाय । अनधिगतार्थेत्यस्यैवार्थोऽज्ञातार्थेति । ततः=तस्मात्, हेतौ पञ्चमी । **असूत्रयदिति**—सूत्रैः समगृह्णादित्यर्थः । सूत्रयति=सूत्रैः करोति । अथवोभयत्र चौरादिकस्य सूत्रधातोरेव प्रयोगो न तु नामधातुत्वकल्पना । तदर्थशास्त्रादितिसूत्रस्थतत्पदार्थस्य यत्पदार्थसाकाङ्क्षत्वादाह—**यस्यार्थस्येत्यादि** । अभिधेयः=वाच्यार्थः । सूत्रस्थशास्त्रपदार्थमाह ब्राह्मणवाक्यस्येति तदिदमिति- सूत्रे अर्थान्तो [१] बहुव्रीहिस्ततः [२] कर्मधारय इति भावः । तथाहि=तदेव (तदर्थशास्त्रं) दर्शयामि । **उरू प्रथस्वेति**— अस्य [३] 'भोः पुरोडाश ! त्वम् उरु=विपुलत्वं यथाभवति

(१) सः=मन्त्रार्थ एवार्थो यस्य तत्तदर्थमिति । (२) तदर्थञ्च तच्छास्त्रं तदर्थशास्त्रमिति । (३) 'शुष्कगोधूमचूर्णेन किञ्चित्पुष्टाञ्च रोटिकाम् । इति भावप्रकाशोक्तस्य 'रोटी' इति लोकप्रसिद्धस्य संज्ञेयम् । "पुरोडाशेन मे माता प्रहेलकं ददाति' इति दृष्टान्तेन पूर्वमीमांसायां तथा प्रतिपादनात्, 'प्रहेलक' मित्यस्य 'बेरहट' इति मैथिली भाषा । अपराह्णे बुभुक्षुभ्यो बालेभ्यो मात्रादिगुरुजनैः प्रदीयमानो भोज्यपदार्थ इति तदर्थः । पुरोडाशेनेत्यत्र अभेदे तृतीया, धान्येन धनवानित्यादिवत्, तथा च 'पुरोडाशाभिन्नं प्रहेलकं माता मह्यं ददातीति तद्वाक्यार्थः ।

तथा प्रथस्व=प्रसर=विस्तीर्णो भवे'ति तात्पर्यार्थः। पुरोडाशप्रथनमिति पुरोडाशकर्तृकं प्रसरणं पुरोडाशकर्मकं प्रसारणं वेत्यर्थः। ब्राह्मणेन=ब्राह्मणग्रन्थस्थवाक्येन, अंशमात्रप्रदर्शनमेतत्, ब्राह्मणवाक्यस्वरूपन्तु "उरु प्रथस्वेति पुरोडाशं प्रथयति, उरु ते यज्ञपतिः प्रथतामिति पुरोडाशं प्रथयति, इति द्विविधम्। एतेन ब्राह्मणवाक्यद्वयेन पुरोडाशप्रथनरूप एकस्मिन् कर्मणि विनियुक्तयोः 'उरु प्रथस्व' इति 'उरु ते यज्ञपतिः प्रथतामिति मन्त्रयोः परस्परनैरपेक्ष्यात्समुच्चयासम्भवेन 'व्रीहिभिर्यवैर्वा जुहोति' इति वद्विकल्प इत्यन्यदेतत्। प्रथयतीत्यत्र लिङर्थे लेट् तेन प्रथयेदित्यर्थः। मन्मते तु न तथेति दर्शयति—**मन्त्रस्याविवक्षितार्थत्वेत्विति**। **विनियोगेति**—पुरोडाशप्रथनादिरूपे कर्मणि विशेषेण नियोगेत्यर्थः। उपयुक्तम्=चरितार्थम्। अनुवादकत्वम्=मन्त्रेण सिद्धस्यैव प्रथनादेः प्रतिपादकत्वम्। अभ्युपेत्य=स्वीकृत्य। अभिधानार्थत्वमेव=स्वार्थप्रत्यायकत्वमेव। **वाक्यनियमादिति**—वाक्यानां-मन्त्रवाक्यानां, नियमात्=पाठक्रमनियमादित्यर्थः। **अग्निर्मूर्द्धेति**—"अग्निर्मूर्द्धादिवः ककुत्पतिः पृथिव्या अयम् अपाꣳसि रेताꣳसि जिन्वति" इति मन्त्रस्वरूपम्। **व्युत्क्रमपाठेऽपीति**—आहरपात्रं पात्रमाहरेत्यादिलौकिकवाक्यवदिति भावः। **नियतेति**—नियतो यः पाठक्रमस्तत्साफल्यायेत्यर्थः। **बुद्धशास्त्रादिति**—बुद्धस्य (ज्ञातस्यार्थस्य) शास्त्रं—बुद्धशास्त्रं तस्मादित्यर्थः। **अग्नीदग्नीनिति**—"उत्तिष्ठन्नन्वाहाग्नीदग्नीन् विहर" इति मन्त्रस्वरूपम्। अयं मन्त्रो ज्योतिष्टोमे श्रूयते। **प्रैषमन्त्र इति**—प्रैषश्च "आध्वर्यवाः प्रैषाः" इति याज्ञिक समाख्यया अध्वर्युकर्तृको नियोज्यमाग्नीध्रादिकम्प्रति प्रेरण-(नियोग) रूपो व्यापारः स च 'आसादय, स्तृणीहि, विहर' इत्यादि मध्यमपुरुषादिप्रयोगसुज्ञानस्तद्युक्तो मन्त्रः प्रैषमन्त्रः, "प्रोक्षणीरासादय, इध्मं बर्हिरुपसादय, अग्नीदग्नीन् विहर" इत्यादिस्वरूपः। प्रेष्यते=अग्निविहरणादिरूपकर्मसु प्रेर्यत इति प्रैषः—नियोज्य इत्यर्थः बाहुलकात्कर्मणि घञ्, तद्युक्तो मन्त्र इति वा, यथा—'अग्नीदग्नीन् विहर' इत्यादावग्नीदिति सम्बोध्यपदेन 'विहर' इति मध्यमपुरुषैकवचनेन च कश्चित् 'आग्नीध्र' रूपः प्रतीयते नियोज्यः,

किन्तु मीमांसकसम्मतः पूर्व एवार्थ इति बोध्यम् । प्रयोगकाले=कार्यकाले । अग्नेर्विशेषेण हरणं=गोमयोपलेपनादिसंस्कृतायां भूमौ सन्निधानमग्निविहरणपदार्थः । **आग्नीध्रेणेति** तन्नाम्नाऽग्निप्रकाशक ऋत्विग्विशेषेणेत्यर्थः, अग्निमिन्धे=दीपयतीत्यग्नीत्, ञिइन्धीदीप्तौ इत्यस्मात् क्विप् न लोपः, तस्य (अग्नीधः) स्थानमाग्नीध्रम्—मण्डपमित्यर्थः 'आग्नेय्याऽऽग्नीध्रमुपतिष्ठते' इत्यत्राग्नीध्रं मण्डपमिति व्याख्यानदर्शनात्, 'अग्नीधः शरणे रण् भञ्च' इति वार्त्तिके शरणपदस्य 'शरणं गृहरक्षित्रोः' इत्यमरानुसाराद्गृहरूपार्थवाचकत्वाच्च, एवञ्चाग्नीध्शब्दात् 'अग्नीधः शरणे रण् भञ्च' इति वार्त्तिकेन रण् प्रत्यये कृते णित्त्वादाद्यचो वृद्धिः भत्वेन पदत्वबाधाज्जश्त्वं न । तात्स्थ्यात् (तत्र मण्डपे स्थितत्वात्) 'अग्नीन्नामक ऋत्विगप्याग्नीध्र उच्यते, गृहा दारा इतिवत् । तथा चामरः—आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते' इति । बुद्धम्=ज्ञातम् । **न हीति** हि=यतः । सोपानत्के=उपानत्सहिते । प्रतिमुञ्चति=प्रतिबध्नाति । दृष्टान्तोऽयं पूर्वत्र । **प्रामादिकेति**—प्रमादोऽनवधानता तत्कृतं यद्विस्मरणं तत्परिहाराय=तन्निवृत्तये । **चत्वारि शृङ्गा इति**—एतन्मन्त्रस्य स्वरूपमर्थश्च मूल एवाग्रे स्फुटी भविष्यतः । **किञ्चिदिति**—'वस्तु' इति शेषः । ईदृशी=चतुःशृङ्गत्वाद्युपेता । अचेतने=ओषध्यादिरूपे द्रव्ये, अर्थस्य=रक्षणश्रवणादिरूपस्य, बन्धनात्=निरूपणादितिसूत्रार्थः । बध्नाति=निरूपयति । स च=अचेतने ओषध्यादौ **निरूपितो** रक्षण-श्रवणादिरूपोऽर्थश्च । [1]वैयासिकशास्त्रे=व्यासप्रणीतोत्तरमीमांसायाम् । **अर्थविप्रतिषेधादिति**—अर्थयोरर्थानां वा विप्रतिषेधात्—परस्परं विरोधादित्यर्थः । **अदितिर्द्यौरिति**—"अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम्" इति (ऋ० सं० ६ अ० १५ व०) (मन्त्र) स्वरूपम् । **यदेवेति**—अदितिरेव

---

(१) व्यासेन प्रोक्तमित्यर्थे ठकि तस्य च इकादेशे 'नय्वाभ्यां पदान्ताभ्याम्' इत्यैजागमे रूपमिदम् ।

द्यौः अदितिरेवान्तरिक्षमित्यर्थः । विप्रतिषिद्धः=विरुद्धः । **त्वमेवेति**— "त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव । त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव" इत्यादिवदित्यर्थः । **स्तूयत इति**— अदितिर्द्यौरदितिरन्तरिक्षमिति पूर्वोक्तमन्त्रेणेति शेषः । बहुरूपस्वीकारः= नानारूपधारणम् । विप्रतिषेधः=विरोधः । **पूर्णिकेति**— व्याकरणादिशास्त्रेषु देवदत्त-यज्ञदत्तादिवद्वक्तुर्यादृच्छिकं नामैतत् । योषित्=स्त्री । अवघातम्= तण्डुलावहननम् । माणवकः=बालो ब्रह्मचारी । **स्वाध्यायेति**—अधीयते-ऽसावध्यायो वेदः, यद्यपि काव्यनाटकादीन्यप्यधीयन्ते तथापि 'ब्राह्मणेन निष्का-रणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति श्रुतेर्वेद एवाध्ययनावश्यकत्वावग-मात्, शास्त्रकल्पितावयवार्थान्वितविशेष्यभूतार्थनिरूपितशक्तिरूपायाः पङ्कजा-दिवद्योगरूढेश्च वेद एवाध्यायपदार्थस्ततश्च स्वस्याध्यायः स्वाध्यायः—स्वपितृ-पितामहादिपरम्पराप्राप्तशाखाको वेद इत्यर्थः । **कदाचिदिति**=काकतालीय-न्यायादिति तत्त्वम् । अवघातमन्त्रम्=येन व्रीहयोऽवहन्यन्ते तम् "अवरक्षोदिवः सपत्नं वध्यासमित्यवहन्ति" इति ब्राह्मण-(भाग)-प्रतिपादितमित्यर्थः । तस्य=माणवकस्य । अर्थप्रकाशनविवक्षाभावे हेतुमाह-**प्रतिमुसलप्रहार-मिति**—यद्यप्येकद्रव्यावघाते, "एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वं तस्मिन् मन्त्रार्थनानात्वादावृत्तौ मन्त्रस्यासकृत्प्रयोगः स्यात्' इति ११ अ० ४ पा० ४२, ४३ सूत्राभ्यां भगवता जैमिनिना प्रत्यवघात मन्त्रानावृत्तिरेव दर्शिता तथा च प्रतिमुसलप्रहारमित्यसङ्गतं तथापि नानाद्रव्यावघाते तेनापि "द्रव्यान्तरे कृतार्थत्वात्तस्य पुनः प्रयोगान्मन्त्रस्य च तद्गुणत्वात्पुनः प्रयोगः स्यात्तदर्थेन विधानात्" इति ११ अ० ४ पा० ४४ सूत्रेण मन्त्राऽऽवृत्तिर्द-र्शितैव तथा च नानाद्रव्यावहननमपेक्ष्यैव 'प्रतिमुसलप्रहारं तस्य मन्त्रस्या-पठ्यमानत्वात्' इत्युक्तं मूल इत्यवगन्तव्यम् ।

स्वाध्यायकाले=स्वाध्यायाध्यनकाले । कर्मकाले=कर्मानुष्ठानकाले । अव-बोद्धुम्=ज्ञातुम् मन्त्रार्थमिति शेषः । अर्थविवक्षा=अर्थप्रकाशनविवक्षा । **सम्भवतीति**— अधीतवेदत्वादिति भावः । सूत्रे **अविज्ञेयादिति**—

भावप्रधानो निर्देशस्तेन अविज्ञेयत्वादित्यर्थः । अपरो मन्त्र इति—अनयोः प्रथममन्त्रस्यार्थो निरुक्तादुद्धृत्य दर्शितोऽस्माभिः प्राक् (१४) पृष्ठे । 'अम्यक् सा त' इति मन्त्रेणागस्त्य इन्द्रं धनं याचितवानिति तन्त्रवार्त्तिके निरुक्ते च व्यक्तम् । **सृण्येवेति**—अत्रैवमुपाख्यानं स्मरन्ति–यथा–भूतांशो नाम कश्चिदृषिर्जरामरणनिराकरणार्थी सृण्येवेत्येवमादिना सूक्तेनाश्विनौ (स्ववैद्यौ) स्तुतवान् इति । 'भूतांशोऽश्विनोः काममप्राः' इति चान्ते श्रवणात्तस्यार्षमाश्विनं सूक्तमिति च द्योतितम् । तत्र सृणिरङ्कुशः सरण (गमन)-साधनत्वात् 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमराच्च, तमर्हन्तौ तत्र वा साधू इति सृण्या अर्थात् कुञ्जरौ छान्दसत्वाद्द्विवचनस्थाने आकार आदेशः ताविवात्यन्तं जृम्भमाणौ=अष्टाङ्गप्रहरणव्यापृतौ-जर्भरी, तुर्फरीतू=त्वरमाणौ हिंसन्ताविति वेत्यादिरीत्यास्य मन्त्रस्यार्थोऽग्रे प्रसङ्गात्प्रस्फुटीकरिष्यतेऽस्माभिः । सूत्रे मन्त्रानर्थक्यमिति–अत्रैव 'तदर्थशास्त्रात्' इत्यादिसकलपूर्वपक्षोक्तसूत्रोपात्तपञ्चम्यर्थस्यान्वयो बोध्यः । **किं ते कृण्वन्तीति**—"किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् । आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्रन्धया नः" इति मन्त्रस्वरूपम् । जनाः पद्यन्तेऽस्मिन्निति जनपदो देशः । **नैचाशाखमिति**—कुशाम्बेन निर्वृत्ता नगरी 'कौशाम्बी' इतिवत् नीचाशाखेन (तन्नाम्ना केनचिद्राज्ञा) निर्वृत्तं नगरं नैचाशाखमिति सम्भावनयेदम् । अनित्याः=असनातनाः आधुनिका इति यावत्, कीकटादर्वाचीनं नैचाशाखं ततः प्रमगन्दस्ततोऽप्याधुनिकोऽयं मन्त्र इत्यवगम्यते, मन्त्रे कीकट–नैचाशाख–प्रमगन्दादिनामदर्शनात्, यथा रामचन्द्रावतारोत्तरं रामायणं, शकुन्तला-दुष्यन्तोद्भवानन्तरं शकुन्तलानाटकं तत्तन्नामचरितवर्णनदर्शनेनैव कल्प्यते तद्वदिति भावः । एतदेवाभिप्रेत्याऽऽह–**प्रमगन्दादिति**—'प्राक् प्रमगन्दान्नायं मन्त्रो भूतपूर्व' इति पाठस्तु अन्धनिबद्ध एव भूतपूर्वघटकपूर्वपदार्थेनैव प्रमगन्दादिति पञ्चम्यर्थस्यान्वयसिद्धेः प्रागग्रहणस्य निरर्थकत्वात्, न च समासैकदेशपूर्वपदार्थेन तदर्थान्वये "पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन" इति न्यायविरोध इति वाच्यम्, तन्न्यायमूलभूते 'प्रकारता-

सम्बन्धेन शाब्दबोधम्प्रति मुख्यविशेष्यतासम्बन्धेनोपस्थितिः कारणम्' इति कार्यकारणभावीयकारणतावच्छेदककुक्षौ नित्यसाकाङ्क्षार्थावृत्तीतिनिवेशात्, न च तत्रैव किम्प्रमाणमिति वाच्यम् 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति सूत्रस्थभाष्यस्यैव प्रमाणत्वात् तथा हि तत्र भाष्यम्—"सामान्याप्रयोग इति किमर्थम्? इह मा भूत् पुरुषोऽयं व्याघ्र इव शूरः पुरुषोऽयं व्याघ्र इव बलवानिति, सामान्याप्रयोग इति शक्यमकर्त्तुम्, इह कस्मान्न भवति? पुरुषोऽयं व्याघ्र इव शूरः पुरुषोऽयं व्याघ्र इव बलवानिति असामर्थ्यात् कथमसामर्थ्यम्? सापेक्षमसमर्थवद्भवतीति एवं तर्हीदमेव ज्ञापयति भवति वै प्रधानस्य सापेक्षस्यापि समास इतीत्यभिप्रायकमिति। अत एव 'देवदत्तस्य गुरुकुलम्' 'चैत्रस्य नप्ता' 'शरैः शातितपत्रः' 'पटोलपत्रं पित्तघ्नं मूलं तस्य कफापहम्' 'दत्ताभये त्वयि यमादपि दण्डधारे' इत्यादयः प्रयोगाः सङ्गच्छन्ते। अथवा गमकत्वात्समासः गमकत्वञ्च विग्रहवाक्यजन्यशाब्दबोधसमानप्रकारकशाब्दबोधप्रयोजकत्वमिति दिक्। **अदृष्टार्था एवेति**—अदृष्टार्थत्वमेवेति पाठः समुचितः, मन्त्राणामित्यत्र विभक्तिविपरिणामाकरणेन लाघवात् प्रक्रमसङ्गतेश्च। **अदृष्टार्थमुच्चारणमात्रमिति** अदृष्टमेव अर्थः=प्रयोजनं यस्य तथाभूतं यदुच्चारणं तन्मात्रमित्यर्थः। **अविशिष्ट इति**—तथा चाऽऽहुर्भट्टमीमांसकाः—"लोकावगतसामर्थ्यः शब्दो वेदेऽपि बोधकः" इति। यागप्रयोगे=यागानुष्ठाने। ननु यागानुष्ठाने मन्त्रार्थस्यानौपयिकत्वमिति चेत्तत्राऽऽह **मन्त्रेण प्रकाशितस्त्विति**—अन्यथा यागफलासिद्धेरिति भावः। एवञ्चार्थप्रकाशनरूपदृष्टप्रयोजनसत्त्वेऽदृष्टकल्पना नोचितेत्याह—**तस्मादिति**। **अभ्रिरसीति**—"अभ्रिरसि नारिरसि अध्वरकृद्देवेभ्य उत्तिष्ठ ब्रह्मणस्पते" इत्यादि महदस्ति मन्त्रस्वरूपं, तदेतत् (४।१।१।३) तैत्तिरीयसंहितायां द्रष्टव्यम्। **अर्थस्येति**—अभ्यादानरूपस्येत्यर्थः। ब्राह्मणे='चतुर्भिरभ्रिमादत्ते' इति वाक्ये। **चतुःसङ्ख्यालक्षणेति** चतुःसंख्यास्वरूपेत्यर्थः लक्षणपदमत्र स्वरूपपरम्। **येन केनाप्येकेनेति**--न तु चतुर्भिरिति भावः, तदेतदुक्तं "सङ्ख्याविहितेषु समुच्चयोऽसन्निपातितत्वात्" इति (१२, अ०

३ पा०) सूत्रव्याख्यायां जैमिनीयन्यायमालाग्रन्थे माधवेनैव—"चतुर्भिरभ्रिमित्यत्र विकल्पो वा समुच्चयः। विकल्पः पूर्ववन्मैवं, समूहे करणत्वतः" इति। अत्र पूर्ववदिति पुरोडाशविभागे श्रूयमाणानां "पूषा वां विभजतु, भगो वां विभजतु, अर्यमा वां विभजतु" इति मन्त्राणामिवेत्यर्थः, अत्र हि त्रयाणाम्मध्ये येन केनचिदेकेन मन्त्रेण पुरोडाशो विभजनीय इति स्थापितम्; समूहे=चतुर्भिरित्यत्र तृतीया श्रुत्या चतुःशब्दवाच्ये मन्त्रचतुष्टये, करणत्वतः=आदानक्रियाकरणत्वात्, एवञ्च 'पूषा वा'-मित्यादिमन्त्राणां परस्परं नैरपेक्ष्यात्त्रयाणाम्मध्ये येन केनचिदेकेन मन्त्रेण (वैकल्पिकतया "पुरोडाशविभाजकेच्छया") पुरोडाशप्रविभागसत्त्वेऽपि तद्दृष्टान्तेनाभ्र्यादानमनुचितं, किन्त्वत्र (अभ्र्यादाने) 'चतुर्भि'-रिति करणतृतीयाश्रवणाच्चतुर्भिर्मन्त्रैरभ्र्यादानं कार्यं नैकेन केनचिदिति सिद्धम्, तदेतत् 'चतुर्भिरभ्रिमादत्ते' इति ब्राह्मणवाक्यमन्तरेण न सम्भवतीत्यभ्र्यादाने मन्त्रचतुष्टयसमुच्चयविनियोगाय ब्राह्मणवाक्यं चरितार्थमिति निष्कर्षः। अभ्रिः=मृत्खननयोग्ययज्ञपात्रविशेषः, अपो बिभर्त्ति=नौकामार्जनार्थं धारयतीत्यभ्रिः—काष्ठकुद्दालः 'अप+भृ+कर्त्तरि किः प्रत्ययः, नौकामार्जनार्थं कुद्दालाकृतिकाष्ठम्—यथाऽऽहामरः—'अभ्रिः स्त्री काष्ठकुद्दालः' इति तत्स्वरूपत्वाद्यज्ञे मृत्खननार्थोभयतस्तीक्ष्णा 'व्या(या)ममात्री काष्ठकुद्दालरूपाप्यभ्रिरित्युच्यते। व्या(या)—ममात्रत्वादिलक्षण 'मुखा' सम्भरणप्रस्तावे तैत्तिरीयारण्यके पञ्चमकाण्डे श्रीसायणाचार्यैः प्रदर्शितमिति तत्रैव द्रष्टव्यम्। अभ्रिस्तीक्ष्णाग्रो लौहदण्डविशेषोऽपि "अभ्रिं कार्ष्णायसीं दद्यात्सर्पं हत्वा द्विजोत्तमः" इति ११ अ० १३४ श्लो० मनुस्मृतिटीकायां, 'सर्पं हत्वा ब्राह्मणाय तीक्ष्णाग्रं लौहदण्डं दद्यात्' इति कुल्लूकभट्टः। सोमयागे अरुणवर्णया पिङ्गाक्ष्या एकवर्षवयस्कया गवा क्रीतायाः सोमलताया घोटक-गर्द्दभयुक्तेन हविर्द्धाननामकेन शकटेनानीय हविर्द्धाननाम्नो मण्डपस्य पार्श्वयो रक्षणं भवति तत्र शकटवाहनवेलायामश्वरशना (बल्गारज्जु) ग्रहणे विनियुक्तोऽयं मन्त्रः—

(१) 'व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्' इत्यमरः।

इमामगृभ्णन्निति—"इमामगृभ्णन्रशनामृतस्य पूर्व आयुषि विदथेषु कव्या। सा नो अस्मिन्त्सुत आ बभूव ऋतस्य सामन्त्सरमारपन्ती" इति चतुर्थकाण्डे प्रथमाध्याये द्वितीयानुवाके मन्त्र आम्नातस्तस्यैव "इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते" इति पञ्चमकाण्डे प्रथमप्रपाठके द्वितीयानुवाके ब्राह्मणमित्यवगन्तव्यम्। **मन्त्रसामर्थ्यादेवेति**—मन्त्रे 'अगृभ्णन्रशनाम्' इति 'रशना'-शब्दश्रवणादेवेत्यर्थः। 'रशनादानस्ये'-त्यस्य 'विनियोजक'-मित्यग्रिमेणान्वयः। ब्राह्मणवाक्यम्='इत्यश्वाभिधानीमादत्ते' इत्यंशयुक्तम्। अभिधानीमित्यस्य सम्बन्धिनीमित्यर्थः एवञ्च अश्वाभिधानीम्=अश्वसम्बन्धिनीम्, गर्दभाभिधानीं=गर्दभसम्बन्धिनीमिति फलितोऽर्थः रशनामित्यस्य विशेषणमेतत्। **परिसङ्ख्येति**—"तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या निगद्यते" इति मीमांसकसिद्धान्तादेकस्यानेकत्र-प्रसक्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वचनं परिसङ्ख्या। **तदर्थमिति**—विशेषाश्रवणान्मन्त्रेणानेनाश्वाभिधान्या गर्दभाभिधान्याश्च रशनाया (वल्गारज्जोः) ग्रहणे प्राप्ते 'अश्वाभिधानीमादत्ते' इति ब्राह्मणेनाश्वाभिधान्यां विनियोगाद्गर्दभाभिधानीतो विनिवृत्तिः स्वयमेवेत्यनेकत्र=गर्दभाश्वरशनयोः, प्रसक्तस्यैकस्य रशनाऽऽदानस्य, अन्यतः=गर्दभाभिधानीतः, निवृत्त्यर्थं=निराकरणार्थम्, एकत्र=अश्वरशनायाम्, पुनर्वचनम्='अश्वाभिधानीमादत्ते' इति ब्राह्मणभागेन कथनं परिसङ्ख्या तदर्थमित्यर्थः। त्रयो दोषाः=स्वार्थत्याग-परार्थविधि-प्राप्तबाधरूपाः। तानेव दर्शयति-**आदत्ते इत्यादिना**—अत्र 'आदत्ते' इत्यतः पूर्वं 'तथाहि' इति पाठो न्याय्यः। जह्यात्=त्यजेत्। तन्निषेध-लक्षणः=आदानरूपस्वार्थनिषेधस्वरूपः, 'गर्दभाभिधानीं नादत्ते' इत्येवं रूप इत्यर्थः, क्वचित्, 'निषेधलक्षण'—इत्येव पाठः। अस्य शब्दस्य='आदत्ते' इत्यस्य। च=किञ्च। **रशनात्वसामान्येनेति**—रशनात्वसामान्यस्य (जातेः) गर्दभाश्वरशनयोरुभयोः सत्त्वादिति भावः। उत्तरयति-**एवमिति।** **प्रकरणपाठान्यथानुपपत्त्येति**—अन्यथा=मन्त्रेणानेनादानं कुर्यादिति वाक्यकल्पनां विना, प्रकरणपाठस्य=आदानप्रकरणे एतन्मन्त्रपाठस्यानुपपत्त्या=

असङ्गत्येत्यर्थः । सम्बन्धे=उपकार्योपकारकभावरूपे । किं विषयकं=किंकर्मकम् । वीक्षायाम्=पर्यालाचनायाम् । लिङ्गात्=मन्त्रस्थरशनाशब्दसामर्थ्यात् 'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' इति हि मीमांसकाः । रशनामात्रस्य=उभय-रशनाकर्मकम् । उपेत्य=प्राप्य अपेक्ष्य वा । प्राप्तिर्वक्तव्येति-अत्र 'ततश्च प्राप्तस्य गर्दभरशनादानस्य बाधस्त्वत्पक्षे वक्तव्य' इति शेषो बोध्यः । **सा च विलम्बेनेति**—सा च गर्दभरशनाप्राप्तिः रशनाशब्दार्थपर्यालोचनायां यो विलम्बस्तेनेत्यर्थः । लिङ्गात्=रशनाशब्दसामर्थ्यात् । रशनामात्रे=उभयो रशनयोः । **व्यवस्थाप्यत इति**—"श्रुति-लिङ्ग-वाक्य-प्रकरणस्थान समा-ख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्" इति जैमिनिसूत्रबलेनेति भावः । अत्र सूत्रे **पारदौर्बल्यमिति**—परमेव पारम् प्रज्ञादित्वात्स्वार्थिकोऽण् प्रत्ययः, दुर्बलस्य भावो दौर्बल्यं, तथा चायं सूत्रार्थः—श्रुति-लिङ्गादीनां परस्परं समवाये=एकत्रोपनिपाते सति पारदौर्बल्यं=यद् यस्मात्परं तस्य तदपेक्षया दुर्बलत्वं तथा च श्रुतिलिङ्गयोर्म्मध्ये लिङ्गस्य दुर्बलत्वं, लिङ्गवाक्य-योर्वाक्यस्य, वाक्यप्रकरणयोः प्रकरणस्य, प्रकरणस्थानयोः स्थानस्य, स्थानसमाख्ययोश्च समाख्यायाः, एवं त्र्यादिसन्निपातेऽपि बोध्यम् । अत्र हेतुमाह—**अर्थविप्रकर्षादिति**—विलम्ब्यार्थोपस्थापकत्वादित्यर्थ इति । अत्राधिकजिज्ञासुभिस्तृतीयाध्यायस्य तृतीये पादे भट्टकुमारिलकृतं तन्त्रवार्त्तिकं, पार्थसारथिमिश्रकृतां शास्त्रदीपिकां, माधवाचार्यकृतां न्यायमालां, शबरस्वामि-कृतं शबरभाष्यञ्चावलोक्य सन्तोष्टव्यम् । **अप्राप्तत्वादिति**—प्राप्तिवेला-यामेव श्रुत्याऽश्वरशनायां मन्त्रस्य व्यवस्थापनादिति भावः । अत एव= गर्दभरशनाया अप्राप्तत्वादेव । **निषेधार्थ इति**—प्राप्तौ सत्यामेव निषेधादिति तात्पर्यम् । **विध्यर्थश्च न त्यज्यत इति**—अयं भावः-त्यागः प्राप्तस्यैव भवति, गर्दभरशनाऽऽदानरूपो भवदभिलषितो विध्यर्थस्तु प्राप्त एव न, प्राप्तिवेला-यामेव 'अश्वाभिधानीम्' इति श्रुतिबलेनाश्वरशनायां विनियोगेन मन्त्रस्य निराकाङ्क्षत्वादिति कुतः स्वार्थत्यागः ?, एवञ्च विध्यर्थोऽपि केवलमश्व-रशनाऽऽदानमेव स च नैव त्यज्यत इति । ननु तर्हि निषेधार्थकल्पनाभावात्

'गर्दभाभिधानीं नाऽऽदत्ते' इति निषेधः परिसङ्ख्येतितात्पर्येण प्रवृत्तं 'परिसङ्ख्या' इति सूत्रं भगवतो जैमिनेरसङ्गतं स्यादिति चेत्तत्राऽऽह— **ईदृशमप्राप्तिरूपमेवेति**। निवारणम्=निषेधम्। एतच्च सर्वं 'विधिस्वरूपविचार' नामकग्रन्थे विविच्य श्रीगदाधरभट्टाचार्यैरपि प्रदर्शितमिति बोध्यम्। **सम्बन्धायेति**—यदि 'इति पुरोडाशम्प्रथयति' इति वाक्यं नाभविष्यत्तदा प्रथयतीत्यस्याभावात्तदनुवादेन स्तोतुं प्रवृत्तो 'यज्ञपतिमेव तत्प्रथयति' इत्यर्थवादो वैयर्थ्यमापत्स्यत, तत्सत्त्वे तु तदेव ब्राह्मणवाक्यस्थं 'प्रथयति' इत्यनूद्यार्थवादेन विहिता स्तुतिः सङ्गच्छते, एवञ्च यज्ञपतिमेवेत्यर्थवादेन प्रथनक्रियासम्बन्धाय ब्राह्मणे=ब्राह्मणवाक्ये विधिः पठ्यत इत्यर्थः। अत एव तैत्तिरीयब्राह्मणे—"उरु प्रथ वोरु ते यज्ञपतिः प्रथतामित्याह यजमानमेव प्रजया पशुभिः प्रथयति" (३।२।८।४) इति ब्राह्मणसम्बद्ध एवार्थवादः श्रूयते। **विधिशब्देनेति**—'पुरोडाशम्प्रथयति' इति ब्राह्मणवाक्यस्थप्रथयतीत्यत्र लिङर्थे लेट् लिङर्थश्चात्र योग्यत्वाद्विधिरेव ततश्च प्रथयतीत्यस्य प्रथयेदित्यर्थ इति तथा च एवकारस्य भिन्नक्रमतया 'प्रथयतीत्यनेन विधिशब्देनानूद्यमानमेव प्रथनं यज्ञपतिमेवेत्यादिनाऽर्थवादेन स्तोतव्य'-मिति पर्यवसन्नोऽर्थः। तदेव त्वित्यत्र 'तु' शब्दः 'परन्तु' इत्यर्थको भिन्नक्रमस्तदेवेत्यस्यादौ बोध्यस्तथा च 'परन्तु तदेव प्रथनम्' इत्यर्थः। **कुतः प्राप्तमिति**—उरु प्रथस्वेति मन्त्रे प्रथयतीत्यस्याभावादिति भावः, अनुवादो हि सिद्धस्य (पूर्वेण प्राप्तस्य) पुनस्तेन शब्देन कथनं नाम, अत्र ब्राह्मणवाक्येन यत् प्रथयतीत्यनूद्यते न तत्पूर्वेण प्राप्तं, ब्राह्मणवाक्यात्पूर्वत्र श्रूयमाणे 'उरु प्रथस्व' इत्यत्र मन्त्रे शुद्धस्याण्यन्तस्यैव 'प्रथ' धातोरूपदर्शनात्तथा च (क)'प्रथते' इत्यस्यैव मन्त्रेण प्राप्तत्वात् प्रथयतीति कुतः प्राप्तं यद्ब्राह्मणवाक्येनानूद्यमानं सदर्थवादेन स्तोतव्यं भवेदिति पूर्वपक्षाभिप्रायः। **मन्त्राभिधानादिति**—मन्त्रेण यदभिधानं प्रथस्वेति तस्मात्प्रथयतीति प्राप्तमिति

(क) यद्यपि मन्त्रे 'प्रथस्व' इत्यस्ति न तु 'प्रथते' इति तथाप्यण्यन्तावस्थामात्रप्रदर्शनाभिप्रायेणेदम्।

सूत्राभिप्रेतोऽर्थः । पुरोडाशमुद्दिश्य='भोः पुरोडाश !' इत्येवं सम्बोध्य । अभिधत्ते=ब्रूते । **अध्वर्युकर्त्तृकमिति**—पुरोडाशः प्रथते तमध्वर्युः प्रथस्वेति कृत्वा प्रेरयतीति प्रथयत्येव । अत्रैव दृष्टान्तमाह—**यथा लोक इति । स प्रथयत्येवेति**—एवञ्चोक्तरीत्या मन्त्रेणैव प्राप्तं प्रथयतीत्येतद्ब्राह्मणवाक्येनानूद्यमानं सयज्ञपतिमेवेत्यादिनाऽर्थवादेन स्तूयत इति सिद्धम् । **अविरुद्धत्वादिति**—परं=तदर्थशास्त्रादित्यनेन यदुक्तं तदुत्तरं वाक्यनियमादिति द्वितीयसूत्रोक्तं ममाप्यविरुद्धमित्यर्थः । हि=यतः । **पाठक्रमेति**—मन्त्रोच्चारणेन पाठक्रमनियमाददृष्टं भवति चेद्भवतु नाम तत्र नास्माकं कोऽप्याग्रहः, किन्तु 'अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या'–इत्यादिमन्त्रोच्चारणोत्तरं तत्तच्छब्द–[1]मर्यादयाऽनुभूयमानोऽर्थो यतो दृष्टमस्ति प्रयोजनमतोऽसावप्यपेक्षणीय इत्येव ब्रवीमीति भावः । बुद्धमेव=अध्ययनकाले आग्नीध्रेण ज्ञातमेव । शास्ति=अभिधत्ते । **उपानदन्तरेति**—अन्योपानदुपानदन्तरं मयूरव्यंसकादित्वात्समासः, तस्यासम्भवात्=सोपानत्के पादे पुनरुपानदन्तरस्य केनाप्यपरिधानादित्यर्थः । सूत्रस्थगर्हापदार्थमाह—**त्वदुक्त दोष इति । नियमा दृष्टेति** नियमः=पाठक्रमनियमस्तज्जन्यं यददृष्टं तल्लक्षणस्य=तद्रूपस्येत्यर्थः । असन्तमेव=अदृश्यमेव । **अभिधानेऽर्थवाद इति**–अभिधाने=असतोऽर्थस्य कथनेऽर्थवादः=अर्थस्य=गौणार्थस्य वादः=उक्तिरिति सूत्राक्षरार्थः । **असतोऽर्थस्येति**–अदृश्यस्याप्यर्थस्येत्यर्थः । वाक्ये='चत्वारि शृङ्गा' इत्यादौ । गौणस्य=आरोपितस्य । तमेव गौणमर्थं दर्शयति-**तद्यथेत्यादिना** । अस्य=यज्ञरूपस्य । **प्रातः सवनादय इति**–आदिपदेन माध्यन्दिन–सायन्तनसवनयोर्ग्रहणम्, प्रातः सवनविधिश्च "भूरिन्द्रवन्तः सवितृ प्रसूता' इति जपित्वा ओं स्तुध्वमिति ब्रह्मा प्रातः सवने" इत्यादि त्रिसूत्र्या आश्वलायने प्रदर्शित एवं माध्यन्दिन–सायन्तनसवनविधी अपीति ज्ञेयम् । शीर्षे=शिरसी 'उत्तमाङ्गं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रिया' मित्यमरः । **गायत्र्यादय इति**–आदिना–उष्णिगनुष्टुब्बृहतीप-

---

(१) अग्निर्मूर्द्धा दिवः ककुत, इत्यादिशब्दशक्त्या ।

ङ्क्तित्रिष्टुब्जगत्यो ग्राह्याः । **हस्ता इति**-मन्त्रे 'हस्तास'-इति तु च्छान्दसत्वात् 'आज्जसेरसुक्'इत्यनेन जसोऽसुगागमे कृत इतिबोध्यम् । **त्रिभिरिति**-याज्ञे कर्मण्यथर्ववेदस्यानुपयोगात् । त्रेधा=प्रकारत्रयेण, प्रकारोऽत्र वेदभेदरूप एव । बन्धनम्=सम्बन्धनम् । 'ऋचां त्वः पोषमास्ते पुपुष्वान्' इत्युक्तेन प्रकारेण त्रिभिर्वेदैः सम्बन्ध इत्यर्थः । अस्य 'कर्मण' इति पूर्वेणाऽन्वयः । कामान्=वृष्ट्यन्नपशु पुत्र-स्वर्गादिविषयाभिलाषान् । वर्षति=पूरयति । स्तोत्रेति-'आज्यैः स्तुवत' इत्यादिवाक्यबोधितप्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानं स्तोत्रम् । 'प्र उगं शंसति' इत्यादिवाक्यबोधिताप्रगीत मन्त्रसाध्यगुणिनिष्ठगुणाभिधानं शस्त्रमित्युभयोर्भेदः । **महो देव इति**-मह्यते=पूज्यत इति महः महानिति यावत्; क्रियाकौशलेन दीव्यन्ति ऋत्विजो यस्मिन्निति देवो यज्ञ इत्यर्थः अत एवाहाम्रेसोऽयं प्रौढ़ो यज्ञरूपो देव इति । मर्त्यां३ आविवेशेत्यस्य परिशेषार्थमाह-**मनुष्या एवेति**-एवञ्च प्रघट्टसमुदायेन कामान् वर्षतीति योगार्थमादाय यज्ञकर्मणि वृषभत्वारोपः, होत्रादिषु चतुर्षु शृङ्गत्वारोपः, पत्नीयजमानयोर्मस्तकत्वारोपः, गायत्र्यादिषु सप्तच्छन्दःसु हस्तत्वारोपः, ऋग्वेदादिषु त्रिषु बन्धनरज्जुत्वारोपः, स्तोत्र-शस्त्रादिध्वनिषु वृषभध्वनित्वारोपो दर्शितः, यथा "ज्योत्स्ना भस्मच्छुरणधवला बिभ्रती तारकास्थीन्यन्तर्द्धानव्यसनरसिका रात्रिकापालिकीयम् । द्वीपाद्द्वीपं भ्रमति दधती-चन्द्रमुद्राकपाले न्यस्तं सिद्धाञ्जनपरिमलं लाञ्छनस्य च्छलेन" इत्यत्र चान्द्री रात्रिरेव कापालिकी=योगिनी, ज्योत्स्ना=चन्द्रकलैव भस्म तस्य च्छुरणेन=लेपनेन धवला=स्वच्छा, तारकाः=नक्षत्राण्येव अस्थीनि=नरकङ्कालास्तानि बिभ्रती=गृह्णन्ती, अन्तर्द्धानं=विलयनमेव व्यसनं=क्रीड़ा तत्र रसिका=चतुरा, चन्द्र एव मुद्राकपालः=दीक्षाकालगृहीतपात्रविशेषः = मुद्राकुण्डलमुद्राखर्पराद्यपरपर्यायस्तन्त्रशास्त्रप्रसिद्धस्तत्र (पात्रे) लाञ्छनस्य=मृगाङ्कस्य च्छलेन=व्याजेन लाञ्छनमेवेत्यर्थः, न्यस्तं=रक्षितं, सिद्धाञ्जनपरिमलम्=मारण-मोहनोच्चाटन-वशीकरण-तिरोधान-प्रकटीभवनदूरभ्रमणादिसाधकं सिद्धचूर्णं दधती=धारयन्ती, एकस्माद्द्वीपाद्द्वीपान्तरं स्वेच्छया सर्वत्रेत्यर्थः, भ्रमति=पर्यटति' इत्यादिप्रकारेण

राज्यादिषु कापालिकीत्वाद्यारोपस्तद्वदिति भावः। एतदेव दर्शयति—**लोकेऽप्येवमिति**—स्तुतिपरत्वेन=प्रशंसापरत्वेन, तामेव प्रशंसां दर्शयति-**'यस्मिन् वपन' इति—'तथा ग्रावाणोऽपि' इति च प्रातरनुवाकमिति—** "अथाश्विनः, एषो उषाः प्रातर्युजेति चतस्रोऽश्विना यज्वरीरिष आश्विनावश्वावत्या गोमदूषु:" इत्यारभ्य "इत्येतेषां छन्दसां पृथक्सूक्तानि प्रातरनुवाकः" इत्यन्तेनाश्वलायनश्रौतसूत्रे प्रदर्शितमित्यर्थः-यस्यां रात्रौ पशोः (पशुयागस्य) समाप्तिस्तस्या अवसानकाले पक्षिणामारावात्पूर्वं प्रातरनुवाकायामन्त्रितो यजमानेन होता ब्रह्मा च वाग्यतः-आहवनीये "वागग्रे गा अग्र एतु सरस्वत्यै वाचे स्वाहा" इत्यादि ऋग्भ्यां जान्वाच्याहुतिद्वयं विधाय यस्यां शालायां हविर्द्धाननामनी शकटे तिष्ठतस्तस्याः पूर्वद्वारि बद्धां रराटीनाम्नीं रज्जुं स्पृष्ट्वा हविर्द्धानयोः शकटयोर्मध्यदेशं प्राप्य युगधुरावन्तरेणोपविश्य मन्द्र-(गम्भीर)-स्वरेण प्रातरनुवाकमनुब्रवीति स-चायं प्रातरनुवाको यान्याग्नेयोषस्याश्विनरूपक्रतुत्रये सप्त-सप्त-च्छन्दांस्यनुक्रान्तानि तेषां सर्वेषां पृथक्सूक्तानि प्रत्येकं गृह्णीयात् तथा सति यावानृक्समूहः सम्पद्यते तद्रूप इति बोध्यम्। एवञ्च 'प्रातरनुवाके गीयमानानि सूक्तानि ग्रावाणोऽपि (प्रस्तरा अपि) शृण्वन्ति, विद्वांसो ब्राह्मणाः शृण्वन्तीति किमु वक्तव्य'-मिति प्रशंसाऽत्रावगन्तव्या। गुणात्=गौणोपचारात्। अविप्रतिषेधः=अविरोधः। **एकरुद्रदेवत्य इति**एतत्पदकृत्यं [1]चिह्नितटिप्पणीतोऽवगन्तव्यम्। **इत्यविरोध इति**—एकस्यैव कर्मण एकरुद्रदेवताकत्वं शतरुद्रदेवताकत्वञ्च यद्युच्येत तदैव भवदुक्तो विरोधः सम्भवति नान्यथेति भावः। माणवकः=बालः 'बालस्तु स्यान्माणवक' इत्यमरः, मनोः कुत्सितं मूढं वाऽपत्यमित्यर्थेऽण् ततः स्वार्थे कः

(१) रुद्रश्चासौ देवता रुद्रदेवता एका चासौ रुद्रदेवता एकरुद्रदेवता एकरुद्रदेवतायै इदम् एकरुद्रदेवत्यम् तस्मिन्नित्यर्थः। "देवतान्तात्तादर्थ्ये यत्" इति (५, ४, २४) सूत्रेण यत्प्रत्ययः, एवं शतरुद्रदेवत्ये इत्यपि बोध्यम्। 'एकरुद्रदैवत्ये' 'शतरुद्रदैवत्ये' इति पाठस्तु भ्रान्तिमूलक एव वृद्धैरभाषि।

ब्राह्मण-माणव-वाड़वादिति निर्देशाण्णत्वं, तथा चाभियुक्ताः—"अपत्ये कुत्सिते मौढ्ये मनोरौत्सर्गिकः स्मृतः। नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः" इति। अवहतिम्=अवघातम्। **विद्यावचनमिति**— विद्याशब्दस्य तद्ग्रहणकाले लक्षणया विद्यायां=विद्याग्रहणकाले यदवचनं=मन्त्रैरर्थस्याप्रतिपादनं तदसंयोगात्=यज्ञासम्बन्धादितिसूत्रार्थस्तदाह—**वेदविद्याग्रहणकाले इति**। अनुतिष्ठति=कुरुते। **सतः परमिति**— 'अम्यक्सात' इत्यादौ सतो=विद्यमानस्याप्यर्थस्य परं=केवलम्, अविज्ञानम्=प्रमादालस्यादिरूपस्वीयदोषवशादबोध इति सूत्रार्थस्तमाह—**विद्यमान एवेत्यादिना**। **धातुत इति** तं तं धातुमादायेत्यर्थः। **इति दर्शनादिति**—अत्रैवमुपाख्यानं स्मरन्ति—यथा भूतांशो नाम कश्चिदृषिर्जरामरणनिराकरणार्थी सृण्येवेत्येवमादिना सूक्तेनाश्विनौ (स्ववैद्यौ) स्तुतवानिति, 'भूतांशोऽश्विनोः कामममाः' इति चान्ते श्रवणात्तस्यार्षमाश्विनं सूक्तमिति च द्योतितम्। तत्र सृणिरङ्कुशः सरण-(गमन)—साधनत्वात्, तमर्हन्तौ तत्र वा साधू सृण्यौ अर्थात्कुञ्जरौ आकारश्छन्दसि द्विवचनादेशः, ताविवात्यर्थं जृम्भमाणौ अष्टाङ्गप्रहरणव्याप्तौ जर्भरी, 'तुर्फरीतू'=हिंसन्तौ, नितोशतिर्वधकर्मा तत्कारिणौ—'नैतोशौ'=योद्धारौ ताविव तुर्फरीतू=त्वरमाणौ हिंसकाविति वा, पर्फरीका=शोभायुक्तौ अत्रापि च्छान्दसो द्विवचनादेश आकारः, उदन्यतिः पिपासार्थस्तत्र जातावुदन्यजौ=प्रावृषिजौ चातकौ जेमनौ=उदकवन्तौ 'जेम' शब्दात्पामादिविहितो मत्वर्थीयो नः प्रत्ययः तौ यथोदकलाभेन मत्तौ भवतस्तथा यौ मदेरू=मत्तौ तौ जरायुमरायु=जरामरणधर्म्मकमर्थाच्छरीरमजरमरञ्च कुरुतामिति वाक्यशेषः। तेनैवं वाक्यार्थः—यावङ्कुशचोदिताविव कुञ्जरौ सर्वतो जृम्भमाणौ शत्रूणां निहन्तारौ भवतो हिंस्राविव च हिंसनव्याप्रृतौ दाक्ष्येण च शोभेते चातकाविव चोदकलाभेन मदात्प्रीयेते तावुभावपि जरामरणयोः क्षपिताविवाजरत्वस्यामरत्वस्य वा पातारावजरममरं मे शरी विधत्तामिति। एतच्च तन्त्रवार्त्तिकादौ स्पष्टम्। अम्यक् सा त इति मन्त्रेणागस्त्यो धनमिन्द्रं याचितवानिति च तन्त्रवार्तिकनिरुक्तादिषु स्पष्टम्। प्रथमपादस्येति पूर्वमीमांसायाः प्रथमपादस्येत्यर्थः। **उक्तः परिहृत इति** उक्त्वा

परिहृत इत्यर्थः जैमिनिनेति शेषः। तत्र=तस्मिन्नधिकरणे। काठकं कालापकमित्यादौ कठेन प्रोक्तं कलापेन प्रोक्तमित्याद्यर्थात् कठ-कलाप्यादिरूपपुरुषसम्बन्धाभिधानं वेदानां पौरुषेयत्वे कारणं प्रदर्श्य पूर्वपक्षो अनित्यदर्शनाच्चेति हेत्वरं सूत्रितवान्। तदेतदग्रे स्फुटी भविष्यति। **असत्त्वादिति**-वेदानामित्यर्थः। "आख्या प्रवचनात्" इति (१, १, ३०) सूत्रेण समर्थितसंशमाह—**यत्काटकादिति**। प्रवचननिमित्तम्=अध्यापननिमित्तकम्। प्रकृतसूत्रार्थमाह—**यत्तु परमिति**। शब्दसामान्यमात्रम्=शब्दसादृश्यमात्रम्। **कश्चित्पुरुष इति** पुरुषसन्देहेनैवानित्यत्वाक्षेपः स च सन्देहः प्रावाहणिरितिविशेषणवशेन, प्रवाहणस्यापत्यमित्यर्थाभिधानात्। **किन्त्वति** वातवेगसञ्जातध्वन्यात्मकशब्दस्यानुकरण बर्बर इतीत्यर्थः। ननु यदि बर्बरपदेन तादृशध्वन्यात्मकशब्दवान् वायुरभिधीयते तदा तदभिन्नविशेषेणत्वेन तत्रैव श्रूयमाणं प्रवाहणस्यापत्यमित्यर्थकं प्रावाहणिरिति विशेषणमसङ्गतं स्याद्वायोः प्रवाहणापत्यत्वाभावादिति चेत्तत्राऽऽह—स चेति एवञ्च प्रावाहणिरित्यस्य मदुक्त एवार्थो न तु प्रवाहणस्यापत्यमितीति भावः। अन्यत्राऽपि='किं ते कृण्वन्ति कीकटेषु' इत्यादिमन्त्रस्थ—'प्रमगन्द'-पदादौ। एतदुपोद्बलकम्=एतत्साधकम्। लिङ्गम्=हेतुम्। लिङ्गोपदेशश्चेति, च=यतः लिङ्गोपदेशस्तस्मात्तन्मन्त्रवाक्यमर्थवदिति सूत्रतात्पर्यम्। 'आग्नेय्याग्नीध्रमुपतिष्ठते' इत्यत्राग्नेय्येति तृतीयान्तं तत्कृत्यमाह—**अग्निर्देवता यस्या इत्यादिना**। आग्नीध्रम्=अग्न्याधानमण्डपम्। ब्राह्मणम्='आग्नेय्याग्नीध्रमुपतिष्ठते' इत्येवं रूपम्। इति=एवं क्रमेण। आग्नेयीत्वलिङ्गेन='आग्नेयी'—शब्दसामर्थ्येन, प्रकृतिप्रत्ययविभागपूर्वकाग्नेयीशब्दार्थपर्यालोचनयेति यावत्। अत्र 'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' इति प्रागुक्तो मीमांसकसिद्धान्तो न विस्मर्त्तव्यः। एतदुपपादयति—**यदेत्यादिना** तथासति=तस्यामृचोऽग्निदेवताकत्वे सति। **उपपद्यत इति**—अन्यथासास्यदेवतेत्यधिकारे विहितस्य स्त्रीभ्यो ढगिति ढकोऽप्रवृत्त्या आग्नेय्येत्यस्यासङ्गत्यापत्तेः, अत एव [1]केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन्। नान्ययुक्ता-

(१) केवलात्=सोमादिपदान्तररहितात्, अग्नेः=अग्निशब्दात्,

ग्निदेवत्यम्प्रतिपादयितुं क्षमः' इति मीमांसका वैयाकरणाश्चेति भावः। उपदेशः=देवतावाचितद्धितान्तोपदेशः । प्रयोगकाले=यागाद्यनुष्ठानकाले। लिङ्गान्तरम्=हेत्वन्तरम् । प्रकृतौ=[1]प्रकृतियागे । आम्नातस्य=पठितस्य । विकृतौ=[2]विकृतियागे । समवेतार्थत्वाय=अर्थसमावेशाय, 'प्रकृतिवद्विकृतिः कर्त्तव्या' इति मीमांसकसिद्धान्तसत्त्वेऽपि कस्यचित्पदस्य प्रकृतौ पठितस्य तेनैवरूपेण विकृतावपि पाठे क्रियमाणे विकृतियागेऽर्थासङ्गत्यापत्तिरिति तत्परिहारायेति यावत् । **तदुचितेति**—विकृतियागोचितेत्यर्थः । ऊहः=तर्कः 'अध्याहारस्तर्क ऊह' इत्यमरः । तमेवोहमुदाहरणदानेन दर्शयति—**अन्वेनमिति**। 'ते प्राग्धातोः' इत्येतद्बाधकेन 'छन्दसि परेऽपि व्यवहिताश्च' इति सूत्रेण 'एनम्' इत्येतद्व्यवधानेऽपि प्रयुज्यमानस्य 'अनु' इत्यस्य 'मन्यता'-मित्यनेन सम्बन्धात्-'एनं=छागं माताऽनुमन्यतां पितानुमन्यतां भ्रातानुमन्यताम्, यज्ञार्थं मयोपा क्रयमाण-(वेदोक्तविधिना हन्यमान)-ममुं छागमस्य च्छागस्य माता, पिता, भ्राता च सहर्षमनुमन्यताम्=अनुमतिप्रदानेन यज्ञीयं कुरुतामित्यर्थ इति भावः। प्राकृतः=प्रकृतियागसम्बन्धी। तत्र='न माता वर्द्धते न पिता' इति ब्राह्मणे। शरीरवृद्धेः स्पष्टत्वाच्छब्दवृद्धिं व्याचष्टे—**एकवचनान्तेति**। प्रत्यक्षत्वाच्चेति' असम्भवाच्चेत्यपि बोध्यम् । विशेषाकारेण=मातृपितृशब्दमुच्चार्य । इतरस्य= तद्भिन्नस्य । ननु मातृ-पितृशब्दभिन्नवृद्धिनिश्चये 'अनुमन्यता'-मिति शब्दस्यैव वृद्धिरस्त्विति चेदत आह—**अर्थानुसारिणीति**। एवञ्च विकृतियागे विवक्षित पशुद्वित्व-बहुत्वरूपार्थानुसारादेनमिति शब्दस्यैव वृद्धिः सूचिता भवतीति बोध्यम्। **शतं हिमा इति**-शतꣳ हि मा द्युमन्तꣳ समिधीमहि" इति

समुच्चरन्=सञ्जातः, देवतावाची तद्धितो ढगादिः 'आग्नावैष्णवम्' 'अग्नीषोमीयम्' इत्यादाविव **अन्ययुक्ताग्निदेवत्यम्**=विष्णुसोमादिदेवतान्तरसम्बद्धाग्निदेवताकं (हविर्मन्त्रं वा) **प्रतिपादयितुम्**=बोधयितुं **न क्षमः**=न समर्थः, किन्तु केवलाग्निदेवताकमेवेत्यर्थः।

(१) यदीयमन्त्रद्रव्यादिरूपैर्निर्दिष्टोपकरणैर्यागान्तरं साध्यते स प्रकृतियागः।

(२) प्रकृतियागसाहाय्येन सम्पद्यमानं तादृग्यागान्तरं विकृतियागः।

मन्त्रस्वरूपम् । एतन्मन्त्रस्य तात्पर्यमाह–'शतं वर्षाणि जीव्याः स्मेत्येवैतदाह' इति ब्राह्मणवाक्यम्। अत्र ब्राह्मणे इत्येवैतदिति इत्येतदेवेत्यर्थकम् । **आहेति**– 'शतꣳहिमा' इति मन्त्र आहेत्यर्थः । **मन्त्रा इति**— यागेषु उरु प्रथस्वेत्यादयो मन्त्राः प्रयुज्यमाना इत्यर्थः किम् अ ष्टैकहेतवः ?=अदृष्टमात्रसाधनाः ? उत= अथवा, पुरोडाशप्रथनादेर्भासकाः=बोधका अपि ? इति प्रश्नः । अस्योत्तरे मीमांसकैकदेशी ब्रूते–ब्राह्मणेनापि (पुरोडाशं प्रथयति' इत्यादिना) तद्भानात्= पुरोडाशप्रथनादिज्ञानात्, हेतौ पञ्चमी, मन्त्राः='उरु प्रथस्व' इ येवमादयः पुण्यैकहेतवः=अदृष्टमात्रप्रयोजना न तु पुरोडाशप्रथनादिभासका इति । सिद्धान्ती ब्रूते —न,–भवदुक्तं न युक्तमित्यर्थः । कुत इत्याह – **तद्भानस्येति** तद्भानस्य= पुरोडाशप्रथनादिज्ञानस्य दृष्टत्वात्=दृष्टफलरूपत्वात् । तावताऽपि किमिति चेत्तत्राह–**दृष्टं वरमदृष्टत इति,** अदृष्टतः=अदृष्टात् फलात् दृष्टं=दृष्टफलं वरं= श्रेष्ठमित्यर्थः । तथा च मीमांसकाः—'लभ्यमाने फले दृष्टे ना ष्टपरि—(फल) कल्पना' इति । दृष्टस्य प्रत्यक्षत्वादनुमानगम्या ष्टपरकत्वाङ्गीकारापेक्षया मन्त्राणां दृष्टपरकत्वाङ्गीकारे लाघवादिति भावः । कर्म चोदना=यज्ञादिसकलकर्मप्रतिपादनम् । ब्राह्मणशेषः=कर्मप्रतिपादक ब्राह्मणवाक्यानामङ्गभूतः स्तावकत्वेन प्ररोचनया (फलातिशयप्रदर्शनरूपया) तत्तत्कर्मसु लोकानां प्रवर्त्तक इति यावत् । **आग्नावैष्णवमिति** "अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवता आग्नावैष्णवं पुरोलाशं निर्वपन्ति दीक्षणीयमेकादशकपालं सर्वाभ्य एवैनं तद्देवताभ्योऽनन्तरायं निर्वपन्त्यग्निर्वै सर्वा देवताः" इत्येवमस्य ब्राह्मणस्य स्वरूपम् । (ऐ० ब्रा० १ । १)। ननु यदि 'जर्तिलयवाग्वा वा जुहुयात्, गवीधुकयवाग्वा वा जुहुयात्' इति वाक्यविहितं तदा जर्त्तिलगवीधुकरूपं द्रव्यं कथं प्रवृत्त्ययोग्यमुच्यते इति चेत्तत्राह **अयोग्यत्वञ्चेति** वाक्यशेषे इति "जर्त्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा जुहुयात् न ग्राम्यान् पशून् हिनस्ति नारण्यान्. अथो खल्वाहुः— अनाहुतिर्वै जर्त्तिला गवीधुकाश्च पयसाऽग्निहोत्रं जुहुयात्" इति समग्रवाक्यस्य शेषे इत्यर्थः । जर्त्तिलाः=आरण्यतिलाः, गवीधुकाः= आरण्यगोधूमाः । बाधितः=

'अनाहुतिर्वै' इति वाक्यशेषेण निषिद्धः । **तत्तन्नादृत्यमिति**–यद्यत्पूर्वं विधेयत्वेनोक्तं तत्तन्नादृत्यम्=न विधेयमित्यर्थः । **तत्तथा न कार्यमिति**– यथा पूर्वमुक्तं तथा तन्न कार्यमित्यर्थः,–अत्रायमाशयः—"आनशे व्यानश इति त्रिरुदिङ्गयति त्रय इमे लोकाः एष्वेवैनं प्रतिष्ठित माधत्ते" इत्यनेन हस्ते धृतस्याग्नेस्त्रिवारमूर्ध्वचालनेन लोकत्रयप्रतिष्ठा भवतीति पूर्वमुक्त्वा तद्दूषयितुं पुनराह—"तत्तथा न कार्यं वीङ्गितमप्रतिष्ठितमादधीत उद्धृत्यैवाधायाभिमन्त्र्यः अवीङ्गितमेवैनं प्रतिष्ठितमाधत्ते" इति, अस्यार्थः–वीङ्गितम्=विविधं चालितम्, अप्रतिष्ठितमादधीत=अप्रतिष्ठितमग्निमाहितवान् भवेत् तस्मात्तत्तथा न कार्यम्—तथा=तेन रूपेण तत्=ऊर्ध्वचालनं न कार्यम् किन्तु हस्ते सकृदुद्धृत्यैवायतने (वेद्यां) तमग्निमाधाय पश्चात् सोऽग्निः–"विराट् च स्वराट् च यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वा दधे" इत्यनेन मन्त्रेणाभिमन्त्रणीय= स्तथा सति विविधचलनरहितं स्थिरत्वेन प्रतिष्ठितमग्निमाहितवान् भवति **पुरुष इति** । तथा च 'तत्तन्नादृत्यं' 'तत्तथा न कार्य'–मितिवाक्याभ्यां तएव विधयो निषिद्धा ये तत्र तत्रैव पूर्वं विधेयत्वेनाम्नाता इति विस्पष्टम् । **बहुधा निन्दित्वा तस्मादुदिते होतव्यमित्यसकृन्निगदितमिति**– तथाहि – चतुर्विंशे ह वै सँव्वत्सरेऽनुदितहोमी गायत्रीलोकमाप्नोति, द्वादश उदितहोमी [१]स यदा द्वौ सव्वँत्सरावनुदिते जुहोत्यथ हास्यैको हुतो भवत्यथ य उदिते जुहोति सँव्वत्सरेणैव सँव्वत्सरमाप्नोति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यमेष वा[२] अहोरात्रयोस्तेजसि जुहोति योऽस्तमिते सायं जुहोत्युदिते प्रातरग्निना वै तेजसा रात्रि[३]स्तेजस्वत्यादित्येन तेजसाऽहस्तेजस्वदहोरात्रयोर्हास्यतेजसि हुतं भवति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम्, उद्यन्नु खलु वा आदित्यः सर्वाणि भूतानि प्र (प्रा) णयति तस्मादेनं प्राण इत्याचक्षते प्राणे हास्य सम्प्रति हुतं भवति य एवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यम्, प्रातः[४] प्रातरनृतं ते वदन्ति पुरोदयाज्जुह्वति येऽग्निहोत्रम्

१ अनुदितहोमी । २ वै=निश्चयेन । ३ अग्निरूपेण तेजसा रात्रिस्तेजस्वती, सूर्यरूपेण तेजसाऽहस्तेजस्वदित्यर्थः । ४ 'भोरही भोर' इति भाषा ।

दिवा कीर्त्यमदिवा कीर्त्तयन्तः सूर्यो ज्योतिर्न तदा ज्योतिरेषाम्" इति । इयञ्च यज्ञगाथा । **यदनुदित इति** "[1]आग्नेयी वै रात्रिः ऐन्द्रमहः यदनुदिते सूर्ये प्रातर्जुहुयादुभयमेवाग्नेयं स्यादुदिते सूर्ये प्रातर्जुहोति" इत्येवं रूपमिदं वाक्यम् । त एव=तैत्तिरीया एव । प्रद्रुताय=गृहात्प्रस्थिताय, शून्याय=केवलाय, आवसथाय=गृहाय तादर्थ्ये चतुर्थ्येषा, आहार्यम्=अतिथिसत्कार-योग्यं भोज्यं वस्तु । एतद्ब्राह्मणवाक्यस्यार्थमाह श्रीसायणाचार्यो यथा—सूर्योऽयमतिथिरूपेणोदयकाले समागच्छति अतस्तदागमनात्प्रागेवार्घ्यपाद्यादिकं स्थापनीयम्, आहुतिरूपं संस्कारसाधनं सम्पादनीयम्, तत्परित्यज्योदयादूर्द्ध्वं होमे कृते सति यथा लोके कश्चिन्मन्दः पुरुषोऽतिथौ प्रतिनिवृत्य गते सति पश्चादर्घ्यपाद्यादिकं सम्पादनीयं संस्कारसाधनं सम्पादयति तथैव तदनुष्ठानं भवति तच्चायुक्तं यस्मा अतिथये संस्कारद्रव्यं सम्पादयति सोऽतिथिर्यस्मात्कारणान्न जानाति तस्मात्कारणात्संस्कारसाधनं द्रव्यं क्व खलु भवति ? न कुत्राप्युपयुज्यत इत्येवमभिज्ञा आहुः—यस्मादेवमुदयादूर्द्ध्वं होमे दोषोऽस्ति तस्मादोषसमुषःकालसम्बन्धि हव्यं जुहोतीति यत्तदेव सम्प्रति सम्यगनुष्ठानं भवति । अपि च प्रातःकाले राजसेवकाः शयनोत्तरकालिकवस्तुभी राजानमुत्थास्यन्तस्प्रतीक्षमाणाः सफला भवन्ति तादृगेव तदुदयात्पूर्वमनुष्ठानं द्रष्टव्यमिति । **अतिरात्र इति**—पञ्चत्रिंशदयनसत्रेषु सारस्वतायननामकोऽयनसत्रविशेषोऽतिरात्रसंज्ञकः स च द्विविधः प्रथमाहोत्तमाहभेदात् प्रथमोत्तमाहावपि द्विविधौ, इन्द्राग्न्योरयनत्वेनार्यम्णोऽयनत्वेन च । सारस्वतसंज्ञत्वञ्चास्य ब्रह्मावर्त्तदेशपश्चिम-सीमारूपायाः सरस्वतीनद्या विनशनप्रदेशे पुरैतद्दीक्षाविधानादिति स्पष्ट-मन्यत्र । **षोडशिनमिति**—षोडशी=[2]यज्ञियपात्रविशेषः "इन्द्रो ह वै षोडशी" इत्यारभ्य "स एतं [3]ग्रहमपश्यत्" इत्यन्तेन (४,४,३,१७)

---

१ अग्निसम्बन्धिनी । २ 'यज्ञर्त्विग्भ्यां घ-खञौ' इति घः प्रत्ययः ।
३ गृह्यते हविरस्मादनेन वेति ग्रहः = पात्रम् ।

शतपथब्राह्मणे स्पष्टः। अस्मात्षोडशिपात्राद्राजं (हविरन्नं) हस्ते समादाय वषट्कर्त्ता –"अध्वर्य उपह्वय, ब्रह्मन्नुपह्वय, अग्नीदुपह्वय, यजमानोपह्वय" इति पठन् "इन्द्र षोडशिन्नोजस्विँस्त्वं देवेष्वस्योजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु तस्य त इन्द्रपीतस्यानुष्टुप्छन्दस उपहूतस्योपहूतो भक्षयामि" इति मन्त्रेण भक्षयति, ततोऽध्वर्युस्ततो ब्रह्मा तत आग्नीध्रस्ततो यजमान उक्तेनैव विधिना भक्षयन्ति 'वषट्कर्त्तुः प्रथमभक्ष' इति श्रुतेः, तत्राध्वर्य्वादिकर्तृकभक्षणे 'अध्वर्य उपह्वये'—त्यादौ 'ब्रह्मन्नुपह्वय' इत्यादिवाक्यप्रयोग औचित्याद्भवति। स्पष्टञ्चैतद्विशेषेण "आहृतं षोडशिपात्रं समुपह्वावं भक्षयन्ति" इत्यादिना (६,३,१६) आश्वलायनश्रौतसूत्रेऽपि। **नोपलभ्यत इति**–युक्तं स्वनुष्ठानानन्तरमेवोपलब्धुमित्यभिमानः। तदेव व्यतिरेकिदृष्टान्तेन स्पष्टयति—**न हीति** एवञ्च भोजनानन्तरं तृप्तिरूपफलवदनुष्ठानानन्तरं स्वर्गादिरूपेण फलेनावश्यभाव्यं तन्न भवति चेन्नास्त्येवेति प्रष्टुराकूतम्। **दुःसम्पादमिति**–विसँव्वादग्रस्तत्वादिति शेषः। **सोऽयं विरोध इति**-एकेन वाक्येन जगदुत्पत्तेः पूर्वमेकस्यात्मनः सत्त्वप्रदर्शनमपरेण च वाक्येन तदानीं किमपि नासीदिति प्रदर्शनमित्येवंरूपो-विरोध इति भावः। **सर्वोऽपीति**–कर्मकाण्डप्रतिपादको ब्रह्मप्रतिपादकश्चेत्यर्थः। सिद्धान्तयति–**अस्त्वित्यादिना**। एवम्=पूर्वोक्तरीत्या। **उपरितने इति**–पूर्वोक्तात् 'जर्त्तिलयवाग्वा' इत्यादिवाक्यसमुदायात्पूर्वं विद्यमाने इत्यर्थः। **प्रशंसार्थमिति**–"जर्त्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा जुहुयात् न ग्राम्यान् पशून् हिनस्ति नाऽऽरण्यान्, अथो खल्वाहुः अनाहुतिर्वै जर्तिला गवीधुकाश्च पयसाऽग्निहोत्रं जुहुयात्" इति वाक्यसमुदायेन ग्राम्याऽऽरण्यपशुहिंसापेक्षया जर्त्तिलाद्याहुतेरुत्कर्षम्प्रदर्श्य अग्निहोत्रम्प्रतिजर्त्तिलाद्याहुत्यपेक्षयाऽपि क्षीराद्याहुतेरुत्कर्षो दर्शितस्तथा च 'ग्राम्याऽऽरण्यपशुहिंसाराहित्येन प्रशस्तयोरपि जर्त्तिलगवीधुकयोरग्निहोत्रम्प्रत्याहुतित्वं नास्ति पयसस्तु तदस्ति इत्थं महाभागं पयः' इति प्रशंसा निर्गलति तदर्थमित्यर्थः। अत्रैव मीमांसकप्रसिद्धदृष्टान्तमाह—**अथेति**। **अपशवो वेति**। एतद्वाक्य-

स्वरूपं तु "अपशवो वा अन्ये गो[1] अश्वेभ्यः पशवो गो अश्वाः" इतीति विज्ञेयम् । **निषिद्धमपि परान्नभोजनमिति**—"परपाकरुचिर्न स्याद-निन्द्याऽऽमन्त्रणादृते" इत्यादि स्मृत्येति बोध्यम् । **यथा मन्त्रेषु पाठभेद इति**—अत्र 'यथाशाखाभेदेन व्यवस्थितत्वात् मन्त्रेषु पाठभेदः इत्येवमन्वयः कार्यः । तमेव पाठभेदं दर्शयति—**तैत्तिरीया इत्यादिना** । प्रमायुकः= मृत्युमान् । विधिषु=तत्तन्नादृत्यं तत्तथा न कार्यमित्यादिषु । **अश्रुतमीमांसा-वृत्तान्तस्येति**-एतेन त्वया मीमांसावृत्तान्तः कस्यचिन्मुखाच्छ्रुतोऽपि न,अधीत इत्यस्य तु कथैव केति व्यज्यते । **निर्णीत इति**—"शिष्ट्वा तु प्रतिषेधः स्यात्" (१०,८,३,६) इति सूत्रेणेत्यर्थः । तत्र हि ज्योतिष्टोमस्य संस्थाविशेषे श्रूयमाणे—"अतिरात्रे षोड़शिनं गृह्णाति नातिरात्रे षोड़शिनं गृह्णाति" इत्यत्र किं "यजतिषु ये यजामहं करोति नानुयाजेषु'' इति वाक्ये अष्टदोषग्रस्तस्य विकल्पस्यान्याय्यत्वादेकवाक्यतालाभायानुयाजातिरिक्तेषु यजतिषु (यागेषु) 'ये यजामहे' इति मन्त्रं करोति इतिवत्पर्युदासः ? किं वा दर्शपूर्णमासयोरङ्गभूतावाऽऽज्य-भागनामानौ यागावुद्दिश्याम्नाते 'न तौ पशौ करोति न[2] सोमेऽध्वरे' इत्यत्र यथा तौ (आज्यभागौ) सोमेऽध्वरे=सोमयागे न करोति तथा पशौ=पशु-यागेऽपि तौ न करोति=न कुर्यात्' इतिवदर्थवादः ? आहोस्विन्निषेधः ? तत्र न तावत्पर्युदासः, अतिरात्रभिन्नस्य पर्युदस्यमानस्याभावेन 'अतिरात्रभिन्ने अतिरात्रे षोड़शिन गृह्णाति' इति पर्युदासाश्रयणे परस्परं व्याघातापत्तेः, नाप्यर्थवादः विधिनिषेधयोरतिरात्रमात्रविषयत्वेन व्याघाततादवस्थ्यात्, 'अपशवो वा अन्ये गो अश्वेभ्य'—इत्यत्र हि पश्वन्तरनिषेधेन गो अश्वविधेः स्तुतिर्दृष्टा, अत्र तु षोडशिनिषेधेन षोडशिन एव स्तुतौ स्पष्टो व्याघातस्तस्मा-न्निषेधपक्ष एव ज्यायान्, न चास्मिन्नपि पक्षे 'अतिरात्रे षोडशिनं गृह्णाति अतिरात्रे षोडशिनं न गृह्णाति' इति वाक्यार्थसत्त्वेन तदवस्थ एव व्याघात इति

---

१ 'सर्वत्र विभाषा गो'-रिति प्रकृतिभावः ।

२ नञत्रोपमार्थकः, 'अश्वं न त्वा वारवन्तम्' इत्यादिवत् ।

शङ्क्यम् 'व्रीहिभिर्यवैर्वा जुहोति' इति वदनुष्ठानविकल्पाङ्गीकारेणादोषात् इति। अत्रैतत्सङ्ग्राहकौ श्लोकौ–

"नातिरात्रे पर्युदासो वादो वाऽथ निषेधनम्।
आद्योऽनुयाजव,–न्मैवं, विध्येकविषयत्वतः॥
अत एवार्थवादोऽपि न युक्तः पशुसोमवत्।
निषेधः स्याद्विकल्पोऽत्र व्रीह्यादाविव युज्यते॥" इति।

अपूर्वं निर्णीतमिति 'चोदनापुनरारम्भः' इति (२,१,२,५) सूत्रेण जैमिनिनेत्यर्थः, तथा हि––तत्र 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादिवाक्येषु 'यज्+एत' इत्याभ्यां प्रकृतिप्रत्ययाभ्यां करण[1]भावनयोरेवाभिधानेनापूर्वसद्भावे मानाभावान्नास्त्येव तत् न चापूर्वमन्तरेण कालान्तरभावि स्वर्गसाधनत्वं नश्वरस्य यागस्यानुपपन्नमिति वाच्यम् 'स्वर्गकामो यजेत' इत्यादिशास्त्रप्रामाण्यात्तदुपपत्तेरिति पूर्वपक्षे—

'दर्शपूर्णमासाभ्याम्' इति करणतृतीयाश्रुत्या दर्शपूर्णमासादियागानां स्वर्गसाधनत्वं प्रामाणिकं तच्च (स्वर्गसाधनत्वं) तत्तद्यागानां यथोपपद्येत तथा भवताप्यवश्यकल्पयितव्यमेवश्च सति किं स्वर्गादिफलप्राप्तिपर्यन्तं यागावस्थानं कल्प्यते? किं वा अनुष्ठानानन्तरं विनष्टेनापि यागेन यदा कदाचन स्वर्गोत्पादनम्? नाद्यम्, यागानां क्षणिकत्वस्य प्रत्यक्षत्वात्, न द्वितीयम्, मृताभ्यां दम्पतिभ्यां पुत्रोत्पत्तिवद्विनष्टेन तेन (यागेन) स्वर्गोत्पत्तेरसम्भवात्, तस्माद्विनश्वरयागजन्यं स्थायिभूतं साक्षात्स्वर्गसाधनमपूर्वमगत्या कल्पनीयं तच्च[2] कुठारकरणकच्छेदने उद्यमननिपातनवद्यागावान्तररूपम्। एतेन तस्यापूर्वस्य स्वर्गादिसाधनत्वे यागस्य श्रूयमाणं तत्साधनत्वं विरुध्येतेति केनचिदुक्तमपास्तम्, न ह्युद्यमननिपातनयोरवान्तरव्यापारयोर्दृश्यमानं छेदनक्रियासाधनत्वं कुठारस्य [3]तत्साधनतां निराकरोतीति। यदि तु

---

१ येन स्वर्गादिरूपं फलं भाव्यते तद्यागादिकं करणम्, 'साधकतमं करणम्' इति पाणिनिसूत्रानुसारात्। २ अपूर्वम्। ३ छेदनक्रियासाधनताम्।

व्यापारवतो यागस्य नाशे तदवान्तरव्यापारस्यापि नाशो न्यायप्राप्त इत्युच्येत तदा तदपूर्वं यागजन्या शक्तिरेव मन्यताम्, न चैवं सति यागजन्या या शक्तिस्तया स्वर्गादिसिद्धिरिति शक्तिव्यवधानेन यागस्य स्वर्गादि-साधनत्वं श्रुतिबोधितमनुपपन्नमिति वाच्यम्, औष्ण्य[1]व्यवहितेऽपि वह्नौ दाहकत्ववदुपपत्तेस्तथा च यथाऽग्निजन्यमुष्णत्वं [2]निर्वाणेष्वप्यग्निषु जलेऽनु-[3]वर्त्तते तथा यागजन्यमपूर्वं नष्टेऽपि यागे कर्त्तुर्यजमानस्याऽऽत्मनि संस्काररूपेणानुवर्त्तते तस्मादस्त्यपूर्वं यद्द्वारा स्वर्गादिफलं यागस्य सिध्यतीति सिद्धान्तितम्। अत्रैतत्सङ्ग्राहकाः श्लोकाः—

"अपूर्वसदसद्भावसंशये सति नास्ति तत्।
मानाभावात्, फलं यागात्सिध्येच्छास्त्रप्रमाणतः॥
क्षणिकस्य विनष्टस्य स्वर्गहेतुत्वकल्पनम्।
विरुद्धं मान्तरेणातः श्रेयोऽपूर्वस्य कल्पनम्॥
अवान्तरव्यापृतिर्वा शक्तिर्वा यागजोच्यते।
अपूर्वमिति तद्भेदः प्रक्रियातोऽवगम्यताम्" ॥ इति ॥

अत्राधिकं[4] दिदृक्षुभिर्द्वितीयाध्यायप्रथमपादद्वितीयाधिकरणे शबरभाष्ये, शास्त्रदीपिकायां जैमिनीयन्यायमालायां तन्त्रवार्त्तिके च द्रष्टव्यम्। **श्रुति-विप्रतिपत्तिर्निराकृतेति**—तत्र हि "असद्वा इदमग्र आसीत्ततो वै सदजायत (तै० २,७) इति, "असदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्" (छा० उ० ३, १६, १) इति चासत्पूर्विकायाः सृष्टेरुपलम्भेन, "तद्धैक आहुरसदेवेदमग्र आसीत्" इत्युपक्रम्य "कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति [5]सत्त्वेव सोम्येदमग्र आसीत्" (छा० उ० ६,२,१,२,) इत्य-सद्वादनिराकरणपुरःसरं सत्पूर्विकायाः सृष्टेः श्रवणेन, तद्धेदं तर्ह्यव्याकृतमासी-

१ चुल्ल्यधिश्रितपात्रनिहितजलगतं यदौष्ण्यं तद्व्यवहितेऽपीत्यर्थः। २ शान्तेषु। ३ पश्चादपि वर्त्तते। ४ प्रक्रियानिरूपणादिरूपम्। ५ 'सत् + तु + एव' इतिच्छेदः एवकारो भिन्नक्रमस्तेन 'सदेव तु' इत्यन्वयो बोध्यः।

तन्नामरूपाभ्यामेव व्याक्रियत (बृह० उ० १,४,७) इति स्वयङ्कर्तृकाया जगद्व्याकृतेः श्रवणेन च श्रुतीनां परस्परं विरोधात्तत्तच्छ्रुतिमूलकं ब्रह्मणो जगत्कारणत्वमनुपपन्नमित्याशङ्क्य एकस्मिन् वेदान्तवाक्ये यथाभूतः[1] सर्वेश्वरः सर्वज्ञः सर्वात्मा एकः अद्वितीयः जगत्कारणत्वेन व्यपदिष्टस्त[2]थाभूत एव वाक्यान्तरेष्वपि व्यपदिश्यते तस्मान्नानुपपन्नम्, तथाहि नैष स्रष्टा स्रष्टृत्वमात्रेणोच्यतेऽपि तु "सत्यं ज्ञानमनन्तं ब्रह्म" (तै० २, १) इत्यादिरूपेणोच्यते तदेतच्चास्य रूपं सकलवेदान्तवाक्यानुकूलम् । तद्विज्ञानं हि 'ब्रह्मविदाप्नोति परम्' 'तरति शोकमात्मवित्' इत्यादि श्रुतेः फलवत्, सृष्टिज्ञानस्य तु फलं न श्रूयते तेन 'फलवत्सन्निधावफलं [3]तदङ्गम्' इति (पू० मी०) न्यायात् 'असद्वा इदमग्र'-इत्यादि सृष्टिविज्ञानं स्रष्टृब्रह्मविज्ञानाङ्गं सत्तदेकवाक्यत्वमवलम्बते । 'सत्यं ज्ञानमनन्तं ब्रह्म' इति प्रदर्शितस्य सर्वेषामन्तः प्रत्यगात्मनोऽभेदं 'स ऐक्षत बहुस्यां प्रजायेय' इति बहुभवनानुशंसनेन निरूप्य 'इदं सर्वमसृजत यदिदं किञ्च' (तै० २, ६) इति समस्तजगत्सृष्टिनिर्देशेन सृष्टेः प्रागद्वितीयं स्रष्टारमाचष्टे । तत्स्वरूपमेव चान्यत्रापि 'सदेव सोम्येदमग्रआसीदेकमेवाद्वितीयं ब्रह्म' 'तदैक्षत बहुस्यां प्रजायेय' 'तत्तेजोऽसृजत' (छा० उ० ६, २, १, ३) 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चनमिषत्, स ईक्षत लोकान्नु सृजै' (ऐ० उ० ४, १, ॰) इत्यादौ विज्ञायते । 'असद्वा इदमग्र आसीत्' (तै० २, ७) इत्यत्र न असत् निराकारात्मकं कारणत्वेनोपन्यस्यते किन्त्वव्यक्तावस्थापन्नम् । 'असन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इत्यसद्वादापवादेनास्तित्वलक्षणं ब्रह्म प्रत्यगात्मानं निर्द्धार्य 'सोऽकामयत' इत्यनेन तमेव प्रत्यगात्मानं समाकृष्य तत्सकाशात्सप्रपञ्चा सृष्टिरिति दर्शयित्वा 'तत्सत्यमित्याचक्षते' इत्युपसंहृत्य च तस्मिन्नेव प्रकृतात्मनि "तदप्येष श्लोको भवति,-असद्वा इदमग्र आसीत्" इतीमं श्लोकमुदाहरति यदि त्वसन्निरात्मकमत्र श्लोके

१ यादृशः । २ तादृशः । ३ तस्य=फलवतोऽङ्गम्=उपकारकतया विशेषणम् ।

ऽभिप्रेयेत तदा सतः समाकर्षणेऽसत उदाहरणादसम्बद्धं वाक्यमापद्येत तस्मादुत्पत्तेः प्राक् सदेव ब्रह्म सङ्कुचितरूपत्वादसदिवासीदित्यौपचारिकोऽत्रासत्त्वव्यपदेशः 'तद्धेदं तर्ह्यव्याकृतमासीत्' इत्यत्रापि न निरध्यक्षस्य जगतो व्याकरणमुच्यते किन्तु तदग्रे 'स एष इह प्रविष्ट आनखाग्रेभ्यः' इति वाक्ये श्रूयमाणेन 'स' इति सर्वनाम्ना साध्यक्षस्यैव, अत एव 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति (६, ३, २) छान्दोग्योपनिषदि । किञ्च 'तन्नामरूपाभ्यामेव व्याक्रियत' इत्यत्र यदि'व्याक्रियत' इति कर्मकर्त्तरि प्रयोगस्तावतापि चेतनरूपः कश्चिदन्यः कर्त्ता लभ्यत एव न हि 'लूयते केदारः स्वयमेव' इत्यत्र देवदत्तादिरूपश्चेतनः कर्त्ता नेति शक्यते वक्तुम्, देवदत्तादिचेतनकर्त्तारमन्तरेण क्षेत्रलवनस्य स्वयमसम्भवात्, सौकर्यमात्रं तु कर्मकर्त्तरि प्रयोगाद्द्योत्यते। अथ यदि शुद्धे कर्मणि 'व्याक्रियत' इति तदा निर्विवाद एव चेतनस्य कर्त्तुरुपलम्भस्तस्मात्सर्वमवदातमिति सिद्धान्तितम् । अत्राधिकजिज्ञासुभिः (१ अ० ४ पादे) ब्रह्मसूत्रशाङ्करभाष्यमवलोकनीयम् । तैत्तिरीयवाक्येति 'असद्वा इदमग्र आसीत्' इत्येतद्वाक्यगतस्येत्यर्थः । **अव्यक्तावस्थापरत्वमिति निर्णीतमिति**—तथा हि 'सदेव सोम्येदमग्र आसीत्' (छा० उ० ६,२,१) 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ० आ० २,४,१,१) इत्यादाविदं शब्दगृहीतस्य कार्य[1]जातस्य सच्छब्दगृहीतेन ब्रह्मरूपकारणेन सहसामानाधिकरण्यश्रुतेरुत्पत्तेः प्राक्कारणाभिन्नतयैव कार्यस्य कारणे सत्त्वमिति 'सत्त्वाच्चावरस्य' इति (२,१,६,१६) सूत्रेण दर्शयित्वा तदनन्तरं ननु 'असदेवेदमग्र आसीत्' (छा० उ० ३,१६,१) 'असद्वा इदमग्र आसीत्' (तै० २,७,१) इति श्रुतिभ्यामुत्पत्तेः प्राक् कार्यजातस्यासत्त्वं व्यपदिश्यते तस्मादसत्त्वव्यपदेशादुत्पत्तेः [2]प्राक्कार्यस्य [3]कारणे सत्त्वं भवदुक्तं न युक्तमिति चेन्न व्याकृत-(व्यक्त)-नामरूपत्वाद्धर्मादव्याकृत-(दव्यक्त) नामरूपत्वं यद्धर्मान्तरं तेन धर्मान्तरेण हेतुना प्रागुत्पत्तेः कारण-

---

१ जगतः । २ चराचररूपस्य जगतः । ३ ब्रह्मणि ।

रूपमनुप्रविष्टस्य सत एवाव्यक्तस्य कार्यस्यायम[1]सद्व्यपदेशः, कथं ज्ञायते धर्मान्तरेणायमसद्व्यपदेश इति ? वाक्यशेषात् यथा आधानप्रकरणे 'अक्ताः शर्करा उपदधाति' इति श्रुतौ केनाक्ताः (सिक्ताः) इति सन्देहे 'तेजो वै घृतम्' इति वाक्यशेषाद्घृतेनैव न तैलादिनेति निश्चयः एवमिहापि 'तत्सदासीत्' इति वाक्यशेषाद्धर्मान्तरेण तथा व्यपदेशः । यदि तु पूर्वोक्तस्य 'असदेवेदमग्र०' इत्यत्रासच्छब्दस्याभावपरत्वं स्वीक्रियेत तदा 'तत्सदासीत्' एतद्वाक्यस्थेन 'तत्सत्' इत्यनेन सम्बन्धो न घटेत तेजस्तिमिरयोरिव भावाभावयोः सामानाधिकरण्यासम्भवात् । किञ्च [2]असतः पूर्वापरकालसम्बन्धाभावेन 'आसीत्' इति भूतार्थकशब्दप्रयोगानुपपत्तेरिति "असद्व्यपदेशान्नेति चेन्न, धर्मान्तरेण, वाक्यशेषात्" इति (२,१,६,१७) सूत्रेण निरूपितमिति बोध्यम् । **तत्प्रामाण्यं समर्थयामासेति**-विचारविषयो धर्मो लक्षणप्रमाणाभ्यामभ्युपेयो न वेति सन्देहे—

"लौकिकाऽऽकारहीनस्य तस्य किं नाम लक्षणम् ।
मानशङ्का तु दूरेऽत्र प्रत्यक्षाद्यप्रवर्त्तनात्"

इति पूर्वपक्षिणोक्ते—

"चोदना (वेद) गम्य आकारो ह्यर्थत्वे सति लक्षणम् ।
अत एव प्रमाणञ्च चोदनैवात्र नो कुतः"

इति "चोदना लक्षणोऽर्थो धर्मः" इति (१,१,२) सूत्रेण व्यवस्थाप्य, पुनः पूर्वपक्षिणा—

"अबोधको बोधको वा न तावदबोधको विधिः ।
शक्तेरलौकिके धर्म्मे ग्रहणं दुर्घटं यतः"

इति शङ्किते—

"समभिव्याहृते धर्मे शक्तिग्रहणसम्भवात् ।
बोधकस्य विधेर्म्मात्वमनपेक्षतया स्थितम"

इति "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेक-

---

१ 'असदेवेदम्' इत्यादिनाऽसद्व्यवहारः । २ अभावस्य ।

श्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्” इति (१,१,४,५) सूत्रेण सिद्धान्तितम्। तस्यायं भावः—यथा “इह प्रफुल्लकमलोदरे मधूनि मधुकरः पिबति” इत्यत्र ‘प्रफुल्लकमलोदरे’ ‘मधूनि’ ‘पिबति’ इति पदानामर्थानवगच्छन् ‘मधुकर’पदार्थमजानानः—कमलस्य मध्यगते मधुपानं कुर्वति दृश्यमाने भ्रमरे ‘मधुकर’शब्दस्य शक्तिं गृहीत्वा [1]वाक्यार्थं प्रतिपद्यते, एवं ‘कारीया वृष्टिकामो यजेत’ इत्यत्र लोकप्रसिद्धार्थकवृष्ट्यादिपदसमभिव्याहार-वशादलौकिकभावनायां विधेः सङ्गतिं गृहीत्वा विधिवाक्यार्थं पुरुषो बुध्यत इति। अलौकिके धर्मे विधिवाक्यानि जैमिनिरिवालौकिके ब्रह्मणि वेदान्त-वाक्यानि प्रमाणत्वेन भगवान् व्यासोऽपि समर्थयामासेति सूचयितुं व्यासोऽपी-त्यत्रापिशब्दः। एता[2]वता जैमिन्युक्तमलौकिके धर्म्मे प्रामाण्यं बहुसम्मत-मिति सूचितम्। **समर्थयामासेति**—“शास्त्रयोनित्वात्” इति सूत्रेण हि महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थप्रकाश-कस्य सर्वज्ञकल्पस्य योनिः=कारणं ब्रह्म, एतादृशस्य शास्त्रस्य सर्वज्ञाद्ब्रह्मण ऋते सम्भवाभावात्, अथवा ऋग्वेदादिशास्त्रं योनिः=कारणमर्थात्प्रमाणमस्य ब्रह्मणो यथावत्स्वरूपाधिगमे, अर्थात् शास्त्रादेव प्रमाणाज्जन्मादिकारणस्वरूपं ब्रह्माधिगम्यते’ इति प्रतिज्ञाय तत्र समुत्थितानां कार्यतच्छेषविधुराणां वेदवाक्यानाम्—“आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्” इति सूत्रेण जैमिनिनाऽऽनर्थक्यप्रदर्शनादतद-(दक्रिया)-र्थकवेदान्तवाक्याना-मानर्थक्येन कथं तेभ्यो ब्रह्मणोऽवगतिरिति शङ्कायाम्—“एको देवः सर्व-भूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च” (श्वेताश्व०) “यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते” (केनोप०) “ब्रह्मवेद ब्रह्मैव भवति” (मुण्डको०) “अहं ब्रह्माऽस्मि, अयमात्मा ब्रह्म” (बृहदा०) “क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे” (मुण्ड०) “आनन्दं ब्रह्मणो विद्वान्न बिभेति

---

१ ‘प्रफुल्लकमलोदरे०’ इति पूर्ववाक्यस्यार्थम्। २ अलौकिके धर्मेऽलौकिकस्य ब्रह्मणो दृष्टान्तत्वप्रदर्शनेन।

कुतश्चन" 'अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्' महान्तं विभुमात्मानं मत्वा धीरो न शोचति" (काठकोप०) "अप्राणो ह्यमनाः शुद्धः" "असङ्गो ह्ययं पुरुषः" 'आत्मा वा अरे द्रष्टव्यः" "सदेव सोम्येदमग्र आसीत्" "एकमेवाद्वितीयं ब्रह्म" "आत्मा वा इदमेक एवाग्र आसीत्" "अयमात्मा ब्रह्म सर्वानुभूः" "ब्रह्मैवेदममृतं पुरस्तात्" इत्यादिसर्ववेदान्तवाक्यानां समन्वयात्, ब्रह्मबोधनरूपक्रियार्थत्वेन जैमिन्युक्ताऽऽनर्थक्यस्याभावाच्च निराचकार "तत्तु समन्वयात्" इत्यादि सूत्रैः, तदेव दर्शयति—व्यासोऽपीत्यारभ्य समर्थयामासेत्यन्तवाक्यसमुदायेन । स्थाण्वन्धन्यायः='नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधस्तु स भवति' इत्येवं रूपः । दुष्परिहरः= दुर्निवारः—अगत्या तव शिरसि पतित इति यावत्। **सोऽरोदीदिति**—सः= शिवः, अरोदीत्=अश्रूणि मुमोच । तथा च भावप्रकाशे—"त्रिपुरस्य वधार्थाय निर्निमेषैर्विलोचनैः। निरीक्षयामास शिवः क्रोधेन परिपूरितः। अग्निस्तत्काल- मपतत्तस्यैकस्माद्विलोचनात् । ततो रुद्रः समभवद्वैश्वानर इव ज्वलन् । द्वितीयादपतन्नेत्रादस्रु (श्रु) बिन्दुस्तु वामकात्। तस्माद्रजतमुत्पन्नम्" इति । **स आत्मन इति**- सः=प्रजापतिः । वपाम्=मेदः । उदखिदत्= निरकृन्तत् । **देवा वै देवयजनमिति**—देवयजनं नाम दर्शपूर्ण- मासयोः पूर्वकाले पूर्वाह्णे "इदं श्रेष्ठं ज्योतिषां ज्योतिरागात् देवस- वितर्देवयजनं मे देहि देवयज्यायाः" इति मन्त्रेणाऽऽदित्यं प्रार्थ्य क्रियमाणस्त[1]दङ्गभूतो यागविशेषः । **कश्चिदपि नास्तीति**—नहि शिवकर्तृकरोदनं, प्रजापतिकर्तृकवपोत्खेदनं, देवकर्तृकदेवयजनसम्पादनं तेन च तेषां दिङ्मोहः सम्भवतीति भावः । **अनित्यत्वमिति**–उक्तवेदवाक्याना- मित्यादिः। **काव्यालापैः समानत्वादिति**–एवञ्च सूत्रे 'अनित्य'–मित्यस्य 'अनित्यवत्' इत्यर्थ इति तात्पर्यम् । मानसम्=मनःसम्बन्धि । प्रतिषेध- शास्त्रेण="नानृतं वदेत् ऋतं वावदीक्षा सत्यं वावदीक्षा तस्माद्दीक्षितेन सत्यमेव वदितव्यम्" (ऐ० ब्रा०), "तस्य वा एतस्याग्न्याधेयस्य सत्यमेवोपचारः

१ दर्शपूर्णमासयोरङ्गभूतः।

अथ योऽनृतं वदति यथा अग्निꣳ समिद्धं तमुदकेनाभिषिञ्चेदेवꣳ हैनꣳ स जासयति तस्य कनीयः कनीय एव तेजो भवति श्वः श्वः पापीयान् भवति तस्मादु सत्यमेव वदेत्" (श० ब्रा०) इत्यादिना । **दृष्टविरोध इति**—सूक्ष्मेक्षिकयाऽविशेषोऽपि दिवा दर्शनाद्धूमस्यापि च रात्रौ दर्शनादिति भावः । **प्रत्यक्षविरोध इति**—ब्राह्मणाः स्वकीयं ब्राह्मणत्वं कथं न ज्ञास्यन्ति ? तस्य प्रत्यक्षत्वात्, न हि कश्चिदपि मनुष्यः सन् 'मनुष्योऽहं पशुर्वेति न वेद्मि' इति सन्दिग्धे इतिभावः । अमुष्मिन्=परलोके । **अमुष्मिन् लोकेऽस्तीति**—स्वर्गादिरूपं फलमिति शेषः । **शास्त्रदृष्टेति**—शास्त्रविरोधो दृष्टविरोधश्चेत्यर्थः । तत्र 'स्वर्गकामो यजेत' इत्यादि शास्त्रविरोधस्य स्पष्टत्वात्केवलं दृष्टविरोधमुपपादयति- **स्वर्गकामो यजेतेत्यादि शास्त्रे हीति** । विरोधात्=शास्त्रविरोधात् दृष्टविरोधाच्च । **यथा मानान्तरेति**—यथा पूर्वोक्तैरर्थवादैर्यत्किञ्चिदुक्तं तत्सर्वं शास्त्रदृष्टादि प्रमाणान्तरविरुद्धमेवं फलमपि सर्वं प्रमाणविरुद्धमेव तैरुच्यत इत्यर्थः । एतेन फलप्रतिपादकानामर्थवादानां प्रामाण्यं भवदुक्तं न युक्तमिति स्थितम् । **गर्गत्रिरात्रमिति**-तन्नामकं यज्ञमित्यर्थः । द्विरात्रमारभ्य द्वादशरात्रपर्यन्तमहीना वैतानसूत्रादिषूक्ता यज्ञाः पञ्चत्रिंशत्तेषु पञ्चम इति स्पष्टमन्यत्र । प्रकृत्य=उपलक्ष्य तत्प्रकरणे इति यावत् । वेदाभिमर्शनं= दर्शपूर्णमासयोरङ्गयागम् । **आस्येति**—आ + अस्येति च्छेदः 'आ' इत्यस्य 'जायते' इत्यनेन सम्बन्धः । वाजी=अन्नवान्, "यो देवो देवतमो जायमानो महा वाजेभिर्महद्भिश्च शुष्मैः" "वाजेभिर्वाजिनीवती" इत्यादिषु वाजेभिरित्यन्नैरिति व्याख्यानात्, निरुक्ते 'वाज' शब्दस्यान्नपर्यायेषु पाठाच्च । **न चेति**— चकारः—'तु' इत्यर्थकस्तेन 'शोभतेऽस्य०' इत्यादि वाक्येषु वेदितॄणां मुखशोभादिरूपं फलं श्रूयते किन्तु वयं पर्यालोच्यापि तेषां तत्तत्फलं नोपलभामह इत्यर्थः । [1]तत्तत्फलम्=मुखशोभारूपमन्नोत्पत्तिरूपञ्च । विसंवादात्=विरोधात् । **आमुष्मिकेति**-आमुष्मिकं=पारलौकिकं यत्फलं सर्वकामप्राप्त्यादिरूपं तद्बोधकवाक्यानामित्यर्थः । **पशुबन्धेति**—

१ क्वचित् 'तत्फल'-मिति पाठः, स न रोचकः ।

सकलेतरयज्ञस्वरूपारम्भकत्वेन क्लृप्तानाम् -'अग्निहोत्र-दर्श-पौर्णमास-चातुर्मास्य-पशुबन्ध-सोमयागानाम्पञ्चानाम्मध्ये चतुर्थः, पशुहिंसासम्पाद्यतयाऽस्य 'पशुबन्ध' इति नाम-इति केचित्। अपरे त्वाहुः-सर्वेषां यज्ञानामेकविंशतिः संस्थाः-सप्तपाकयज्ञसंस्थाः, सप्तहविर्यज्ञसंस्थाः सप्तसोमसंस्थाश्चेति तत्र औपासनहोमो, वैश्वदेवं, पार्वणम्, अष्टकाः, मासिकश्राद्धं, सर्पबलिः, ईशानबलिरिति सप्तपाकयज्ञसंस्थाः। अग्निहोत्रं, दर्शपूर्णमासौ, आग्रयणादीष्टयनानि चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणी, पिण्डपितृयज्ञ-चतुर्होतृहोमादयो दर्विहोमा इति सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोड़शी, अतिरात्रः, वाजपेयः, आप्तोर्याम इति सप्त सोमसंस्थाः। श्रूयते च गोपथब्राह्मणे-(५ प्र० २३) सायं प्रातर्नित्यहोमौ स्थालीपाको नवश्च यः। बलिश्च पितृयज्ञश्च अष्टका सप्तमः पशुः" इत्येते पाकयज्ञाः,—"अग्न्याधेयमग्निहोत्रं पौर्णमास्यमा[1]वास्ये। नवेष्टिश्चातुर्मास्यानि पशुबन्धोऽत्र सप्तमः" इत्येते हविर्यज्ञाः॥-"अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्यः षोड़शिमाँस्ततः। वाजपेयोऽतिरात्रश्च आप्तोर्यामोऽत्र सप्तमः" इत्येते सुत्या इतीति विस्तरस्त्वन्यत्र प्रपञ्चितः। अयमेव पशुबन्धः पशुपुरोडाश इति नाम्ना व्यपदिश्यते। **अभागीति**-अभागिनः=प्रतिषेधाभागिनोऽन्तरिक्षस्य दिवश्च प्रतिषेधात्, यतोऽन्तरिक्षे दिवि चैकान्तमसम्भवात्प्रतिषेधाभागित्वं, पृथिव्याञ्चापि चयनस्य नित्यप्राप्तेः प्रतिषेधाभागित्वमित्यर्थः। 'शास्त्रदृष्टविरोधाच्च' इत्यारभ्य 'अनित्यसंयोगात्' इत्यन्त पूर्वपक्षसूत्रघटकपञ्चमीनां पूर्वपक्षप्रथमसूत्रघटके 'आनर्थक्यम्' इत्यत्रान्वयः। निषेधानाम्=निषेधबोधकवाक्यानाम्। **किं बहुनेति**-एवञ्च केषाञ्चिदक्रियार्थत्वात्, केषुचिच्छास्त्रदृष्टविरोधात्, केषु चिदनुपलभ्यफलश्रुतेः, केषु चिदुपलभ्यफलसत्त्वेऽपि तत्तत्फलानुरोधेऽन्यानर्थक्यात्, केषु चिदभागिप्रतिषेधात्, केषु चिदनित्यसंयोगात्सर्वेषामर्थवादानामप्रामाण्यमिति पूर्वपक्षाभिप्रायः। **विधिनेति**-जाति-

१ अग्न्याधेयमग्निहोत्रममवास्याथ पूर्णिमा' इति पूर्वार्द्धपाठभेदश्छन्दोऽनुरोधात्।

पक्षाभिप्रायेणैकवचनं तेन विधिभिरित्यर्थः। 'वायुर्वै' इति "वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति" इत्यादीनामित्यर्थः। विधिवाक्यस्य="वायव्यं श्वेतमालभेत भूतिकामः' इत्येवमादेः। अर्थवादनैरपेक्ष्येण=अर्थवादापेक्षां विनैव। पदान्वयसम्पूर्त्तेरिति—यथा 'गच्छति भोक्तुम्' इत्युक्ते देवदत्तादेः कर्त्तुरपेक्षा वर्त्तते तथा 'वायव्यं श्वेतमालभेत भूतिकामः' इत्युक्ते कस्यचिदपेक्षा नास्ति वाक्यस्थपदैरेवान्वयसम्पत्तेरिति भावः। तत्र=विधिवाक्ये। 'नास्त्युपयोग' इत्यस्यानन्तरम्-'इति कथमेकवाक्यत्वम्' इत्यस्य शेषो बोध्यः अत्र शङ्कादले यथा विधीनामर्थवादनैरपेक्ष्यमभिमतं तथा 'वायुर्वै क्षेपिष्ठा देवता' इत्याद्यर्थवादानामपि विधिवाक्यनैरपेक्ष्यं स्वयमूहनीयम्, 'क्षिप्रगामी वायुः स्वोचितेन भागेन तोषितो भागप्रदायैश्वर्यं प्रयच्छति' इत्युक्ते रामायणादाविवाननुष्ठेयस्य निरपेक्षस्य वृत्तान्तस्य प्रतीयमानत्वात्। पुरुषप्रवृत्तिमाकाङ्क्षतामिति पङ्ग्वन्धन्यायेन दग्धाश्वरथन्यायेन वेति भावः, यथा एकत्र गन्तुकामः पङ्गुरन्धश्च दैवात्काकतालीयन्यायेन सम्मिलितौ पङ्गुर्नेत्रवत्त्वादन्धस्कन्धमधिरोहन्, अन्धश्च चरणवत्त्वात्तं वहन् परस्परं साहाय्यमाप्नुतः, यथा वा—कुतोऽपि प्रदेशात्पथि गच्छतोरुभयोरश्वरथवतोर्निरपेक्षयोर्वनमध्यमागत्य कुहचनसङ्गतयोर्दैवात्तदानीमुदितदवानलोज्ज्वलज्वालया वनदाहेनैकस्याश्वेऽपरस्य च रथे दग्धेऽवशिष्टाश्वरथसंयोगेन भवत्येव परस्परसाहाय्यम्, तथा विधिवाक्यानामर्थवाक्यैः समं पदैकवाक्यत्वाभावेऽपि वाक्यैकवाक्यत्वं भवत्येव,तथाहि विधिवाक्यं तावत्स्वप्रतिपाद्येऽर्थे पुरुषं प्रवर्त्तयितुं स्वार्थस्य केनापि प्राशस्त्य-(प्रशंसा)-मपेक्षते, स्वर्गादिफलकानुष्ठानफलकार्थज्ञानफलकाध्ययनस्य पुरुषार्थत्वादधीतमर्थवादवाक्यञ्च पुरुषार्थमपेक्षते, एवञ्च स्वतः पुरुषार्थत्वाभावात्पुरुषार्थपर्यवसन्नविधिवाक्यापेक्षितं पुरुषप्रवर्त्तकं प्राशस्त्यं लक्षणया विदधदर्थवादवाक्यं विधिवाक्येन साकं 'यतः क्षिप्रगामितया शीघ्रफलप्रदो वायुरस्य पशोर्देवता तस्मात्प्रशस्ततरमिमं वायव्यं श्वेतं पशुमालभेत' इत्यादिरीत्यैकवाक्यतामवलम्बते इति बोध्यम्। नन्वर्थवादानामिति—उन्मत्तप्रलपितवदर्थवादाः सर्वे प्रमादपठिता एवेत्यल-

मेतेषां तात्पर्यसमीक्षया,सर्वथोपेक्षैव युक्ता कर्त्तुमिति किमर्थोऽयमेकवाक्यताप्रयास इत्यभिमानः। **प्रयोगे हीति**-प्रयोगो=विधिः। स्तेयं=चौर्यम्। प्रयोगभूतः= विधिभूतः विधेयतया प्रतिपादित इति यावत्। **शास्त्राविरोधाभावादिति**- एतच्चानुपदमेव रूपात्प्रायादिति सूत्रव्याख्यायां स्फुटीभविष्यति। **वैयधिकरण्यादिति**-'वायव्यं श्वेतमालभेत' इति विधिप्रतिपाद्यस्यालम्भनस्य 'वायुर्वै' इत्यर्थवादप्रतिपाद्यस्य प्राशस्त्यस्य च पशुमात्रविषयकत्वेन सामानाधिकरण्यात्तत्प्रतिपादकविध्यर्थवादयोर्घुणाक्षरन्यायेनैकवाक्यत्वसम्भवेऽपि सर्वत्र तथाऽसम्भवादिति भावः। वैयधिकरण्यमेव दर्शयति-**वेतसशाखयेति**- वेतसशाखा =वेत्रयष्टिः, [1]अवकाभिः=[2]शैवालैः, पुष्करिण्यादिजलाशयस्थतृणविशेषैरित्यर्थः। **अग्निं विकर्षतीति**-अयं भावः—परिसमूहनादिपञ्चसंस्कारसंस्कृतायां भूमौ विधिवदाहितस्याग्नेः प्रथमं दक्षिणार्द्धेन, ततः पश्चिमार्द्धेन, तत उत्तरार्द्धेन, ततः पूर्वार्द्धेन 'समुद्रस्य त्वाऽवकयाऽग्ने परिव्ययामसि पावकोऽसि शिवो भवेति समुद्रियाभिस्त्वाद्भिः शमयामः' इत्यादिभिर्मन्त्रैर्विकर्षणं (राशीकरणं) विधीयते। एतच्च विकर्षणं मण्डूकाऽवकावेत्रलताभिर्बद्धेन वंशदण्डेन क्रियते, यथाऽऽह भगवान् कात्यायनः-'मण्डूकावका वेतसशाखा वेणौ बद्ध्वाऽवकर्षति' इति (१,२,१०) श्रूयते च "अथैनं विकर्षति मण्डूकेनावकया वेतसशाखयैतद्वा एनं देवाः शतरुद्रियेण चाद्भिश्च शमयित्वा शुचमस्य पाप्मानमपहत्याथैनमेतद्भूय एव शमयति सर्वतो विकर्षति सर्वत एवैनमेतच्छमयति तानि वंश्शे प्रबध्य" इति (८,१,२,२४) शतपथब्राह्मणे इति। "तद्वृतुं करोत्यवकामुपदधात्यवकाभिः प्रच्छादयत्य'पो वावा अवकाः" इति शतपथीयार्थवादवाक्ये विधिप्राशस्त्यस्यावकामात्रविषयकत्वेन सामानाधिकरण्य-सामञ्जस्यस्य दर्शनेन तद्विहाय 'वेतसशाखया चावकाभिश्चाग्निं विकर्षत्यापो वै शान्ताः' इति (५,४,४,३) तैत्तिरीयार्थवादवाक्यमुपन्यस्तमिति विवेचनीयम्। अप्सु=

---

१ अवकरोतीत्यवका क्षिपकादित्वादित्वं न। 'अवका=शैवाललता' इति शुद्धिचिन्तामणौ मैथिलवाचस्पतिमिश्राः। २ 'जलनीली तु शैवाल'-मित्यमरः।

जलेषु। **स्तुते भवत इति**—अत्र 'एवञ्चोक्तरीत्या वैयधिकरण्यापादनं न युक्त'मिति शेषो बोध्यः। ननु कीदृशस्य गुणस्य वादोऽत्र विवक्षित इति चेत्तत्राऽऽह—**शान्ताभ्योऽद्भ्य इत्यादि**—उक्तञ्च तन्त्रवार्त्तिके—अभिजनो ह्येष[1] वेतसावकयोः [2]ततस्ते[3] जाते अभिजनसंस्तवेनाभिजातः स्तुतो भवति" इति। एवमर्थवादान्तरेष्वपि गुणवादं दर्शयितुमाह—**सोऽरोदीदित्यत्रेत्यादि**। **पतिताश्रुरूपत्वादिति**—हरनेत्रपतिताश्रुजन्यत्वेन तद्रूपत्वादित्यर्थः, अयम्भावः—त्रिपुरासुरवधकाले सञ्जातकोपः शिवो रोदनञ्चकार तदानीं तद्वामनयनपतितादश्रुणो रज[4]त मुत्पन्नमिति प्रागुक्तमतोऽमङ्गलमयाश्रुजन्यत्वेनामङ्गलस्वरूपं रजतं बर्हिषि न देयमिति सिद्धान्तं कृत्वा शिवकर्त्तृकरोदने 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' इति हेतुम्प्रदर्श्याऽऽह—'तस्माद्बर्हिषि रजतं न देयम्' इति तैत्तिरीयसंहितायाम्। तत्र 'तस्मात्' इति साकाङ्क्षपदेन 'सोऽरोदीत्' इति वाक्यस्य परामर्शात् यो बर्हिषि रजतं दद्यात्तस्य सँव्वत्सराभ्यन्तर एव गृहे रोदनं भवेत्, कारणानुरूपत्वात्कार्यस्य रोदनप्रभवरजतदानेन रोदनोत्पत्तेरवश्यम्भावादिति। **तन्निषेधेन विधेयेनेति** 'न देय' मिति विधेयभूतेन रजतदाननिषेधेन सहेत्यर्थः। अर्थवादस्य=सोऽरोदीदित्यस्य। नन्वत्र को गुणवादो विवक्षित इति चेत्तत्राऽऽह—**तत्रेति**। तुष्यतु दुर्जनन्यायेनाह—**यद्यपीति**—रजतस्याश्रु—प्रभवत्वं यद्यप्यत्यन्तमसदित्युच्येत तथापि नास्माकं दोषः, अत्यन्तासम्भविनापि वस्तुना विधेः स्तोतुं शक्यत्वस्य 'शिखा ते बर्द्धते' इत्यादिलौकिकदृष्टान्तेनाग्रेऽनुपदं वक्ष्यमाणत्वादिति भावः। यथोक्तरीत्येति 'वायव्यं श्वेतमालभेत भूतिकाम'—इत्यत्रोक्तपरस्परापेक्षत्वहेतुकैकवाक्यतारीत्येत्यर्थः। अत्र रजतवदश्रुणोऽपि शौक्ल्याद्यदिनामैतदश्रु कठिनं भवेत्तदा रजतसदृशं भवेदित्युत्प्रेक्ष्य तत्प्रभवनिन्दा अथवा धनत्यागेनात्यन्तोदारस्यापि गृहजनः पीड्यत इति तत्सामान्याद्रोदनोपन्यासः। एवञ्च येन केनचिदालम्बनेन निन्दाविज्ञानोत्पत्तिः प्रति-

१ 'अभिजन'शब्दगतलिङ्गमादायेदम्। २ अद्भ्यः। ३ वेतसावके। ४ 'रञ्ज-रागे' इत्यस्मात् 'अतच्' प्रत्ययो रञ्जेर्नलोपश्च।

षेधोपकारिणीति मुख्यार्थाभावेऽप्यदोष इत्युक्तं तन्त्रवार्त्तिके । प्राजापत्यम्= प्रजापतिदेवताकम् । अजम्=छागम् । तूपरं=शृङ्गोत्पत्तिकाले जातेऽप्यजात-[1] शृङ्गम् । अस्य प्रजापतिदेवताकत्वे प्रमाणन्तु 'अश्वस्तूपरो गोमृगस्ते प्राजापत्याः' इति वाजसनेयिसंहिता । अत्रैतद्व्याख्यायां 'तूपरः=शृङ्गोत्पत्तिकाले जातेऽपि शृङ्गहीन' इति महीधरः । लोके तु 'तूबर' इति संज्ञा तथा चामरः—'अजातशृङ्गो गौः कालेऽप्यश्मश्रुर्ना च तूबरौ' इति । अत्रामरे गौरिति पशुमात्रोपलक्षकम्' 'ना' पुरुष इति बोध्यम् । प्रजापतिवपोत्खेदेन= 'स आत्मनो वपामुदखिदत्' इति वाक्यप्रतिपदितेन । स्तुतिप्रकारमाह **यस्मादिति**–उत्खिद्य = उद्धृत्य । **आत्मार्थमिति**–'अश्वस्तूपरो गोमृगस्ते प्राजापत्याः' इति श्रुतेस्तूपरस्य प्रजापतिदेवताकत्वादिति भावः । **लब्धवानिति**–सृष्ट्यादाविति शेषः, तदानीं हि पशूनामभावात्तान् निर्मित्सुः परमयोगसम्पन्नः प्रजापतिः स्वपुण्यप्रभावेणात्मन एव पशुरूपमभिनिर्माय वपोत्खननादिकृतवाँस्ततोऽसमाप्त एव कर्मणि तूपरः पशुरुत्थितस्तं प्रजापतिदेवताकत्वादात्मार्थमालभ्य प्रजाः पशूँश्च लब्धवानिति शतपथब्राह्मणादौ स्पष्टम् । **विवक्षित इति**–तथा च शबरभाष्ये–"यः प्रजाकामः पशुकामो वा स्यात्स एतं प्राजापत्यं तूपरमालभेत' आकाङ्क्षितत्वादस्य विधेः शेषोऽयम्–'स आत्मनो वपामुदखिदत्' इति, एतच्च कर्मणः सामर्थ्यं यदग्नौ प्रहृतमात्रायां वपायामजस्तूपर उदगा"दिति । तन्त्रवार्त्तिके तु "स्वात्मवपोत्कर्त्तनेनापि विशिष्टप्रयोजनार्थं कर्माणि क्रियन्ते किमुत बाह्यधनत्यागेनेति स्तुतिः, यथा नेत्रमप्युद्धृत्यायं ददातीति लोकेऽपि त्यागिनं स्तुवन्ती"ति विशेषो दर्शितः । **दिङ्मोहेन स्तूयत इति**–अयमाशयः–'आदित्यः प्रायणीयश्चरुरादित्य उदयनीय' इत्यनेन दर्शपूर्णमासयोः सोमयागात्पूर्वमवकाशलाभाय अनभ्यस्तसोमयज्ञियकतिपयद्रव्यपात्रादिपरिज्ञानाय च सोमक्रयदिवसेऽदितिदेवताका प्रायणीयेष्टिर्विधीयते,

---

१ समयेऽपि शृङ्गहीनत्वस्य कारणं "तासान्त्वेव वा ब्रुवन्" इत्यारभ्य (४, १, २) ताण्ड्यमहाब्राह्मणे "अथ सम्पादयिष्यामः सर्व्वत्सरम्" इत्यारभ्य ऐतरेयब्राह्मणे च स्पष्टम् ।

तस्य च शेषः—"देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्" इति, कर्मसु कौशलेन दीव्यन्तीति देवा ऋत्विजस्ते देवा देवयजनानुष्ठानोत्तरं दर्शपूर्णमासयोरनभ्यस्तं सौमिकं (सोमयागसम्बन्धिनं) कर्मसमुदायमालोक्य 'कथमिदमविदितं कर्म करिष्यामी'—त्याकुलीभवन्ति, तदाकुलीभवनसाम्याद्दिङ्मोहाभिधानम्, अयञ्चर्त्विजामाकुलीभावो दीक्षणीयेन निराक्रियत' इत्यतोऽसौ यागः स्तूयते [1]यावद्धि प्रायणीयायां समभ्यस्तानि सौमिकानि कर्माणि क्रियन्ते ता[2]वदितरेषु भविष्यत्सु सोमयागादिषु सौकर्यं भवति, अन्यथा सर्वस्मिन्नप्राकृते (ऽनभ्यस्ते) निरवकाशत्वादतिक्लेशः स्यात्तेषां देवानामिति प्रायणीयेनैवादित्येनैतज्ज्ञातमिति मोहापनयनेन स्तुतिः, लोकेऽप्येवं मोहो दृश्यते यथा कश्चिद्गुरुतरकार्यं कृत्वा श्रान्तचित्तो ब्रवीति—'दिशो मे परिभ्रमन्ति' 'शिरो मे परिभ्रमति' इत्यादि । एतच्च सर्वं तन्त्रवार्त्तिके स्पष्टम् । **दिग्विशेषं ज्ञापयतीति**—उदयास्तमयनादिनेति शेषः। सर्वं संक्षिप्य दर्शयति—**बहुविधेति । अनुष्ठानविषयमिति**—अनुष्ठानं विषयो यस्य तम् । अनुष्ठानगतमिति यावत् । सारांशमाह—स्वकीयवपोत्खेद इत्यादिना । **उभयमस्तु मा वेति**—उभयं सत्यमस्तु मिथ्या वा न तत्राऽऽग्रह इत्यर्थः। **स्तुतिपरत्वमिति**—अर्थवादवाक्यानामिति शेषः । हीयते=क्षीयते । **लोके स्तुतिदर्शनादिति**—यथा तत्राविद्यमानेनापि शिखावर्द्धनेन गुडूचीं प्रशस्य श्रद्धापूर्वकतत्पाने बालकम्प्रवर्त्तयति तथा वेदेऽपि तत्तद्विधिवाक्यप्रतिपाद्ये भाविफलके तूपरालम्भनादौ विश्वसनीयफलदर्शनेन प्रलोभ्य पुरुषम्प्रवर्त्तयितुं सर्वाण्यर्थवादवाक्यानि सन्तीति भावः । तदेतत्स्पष्टमुक्तं तन्त्रवार्त्तिके-तथा हि—'प्रमाणभूतत्वादनतिक्रमणीयेन वेदेन प्रवृत्ति-निवृत्त्यनुग्रहणीये स्वसंवेद्येऽर्थे पुंसः प्रशस्ताऽप्रशस्तज्ञाने भवतः, इह तु ते वेदेनोत्पादिते तस्मात्तदनुरूपं व्यवहर्त्तव्यमिति । लोकेऽपि यां क्रियां फलान्तरयुक्तां मेधादिहेतुत्वेनाप्तां मन्यन्ते तस्यां कश्चित् (पुरुषं) प्रवर्त्तयन्तस्तदभिप्रेतं सौभाग्यादिफलमसत्य-

१ परिमाणार्थकोऽत्र यावच्छब्दः, 'जितना' इति भाषा ।

२ तावच्छब्दोऽपि तथा 'उतना' इति भाषा ।

मप्युपन्यस्य नियुञ्जते, तत्प्रवृत्तश्चेतरोऽपि क्रिया[1]श्रयं फलमाप्नोति यद्यपि प्रतिप[2]त्ता जानाति–नैतदत्र पारमार्थिकं फलं, मदभिप्रायानुसारेणैतैरुपन्यस्तं सर्वथात्वपुरुषार्थे मां न प्रवर्त्तयन्ति तदसत्यं नामैतत्, किमप्यन्यदवाप्स्यामीति ज्ञात्वानुतिष्ठति, एवं वेदेऽपि विधिना तावत्फलमवगमितम्, अर्थवादास्त्वसत्येन नाम प्ररोचयन्तु न तद्गते सत्यासत्ये किञ्चिद्दूषयतः प्रवर्त्तनामात्रोपकारित्वात्, यत्तु परस्ताद्भविष्यति (फलं) तद्विधेरुपरिगतमिति निश्चित्य नैवं विद्वांसो न प्रवर्त्तन्ते तस्मादुपाख्यानासत्यत्वमतन्त्र'मिति । **रूपात्प्रायादिति**–'स्तेनं मन' इत्यत्र रूपात्' 'अनृतवादिनी वाक्' इत्यत्र प्रायादित्यर्थः, एतच्चाग्रे व्याख्यायां मूल एव स्पष्टीभविष्यति। उक्तञ्च शबरभाष्ये- 'गुणवादस्तु रूपात्[3], यथा स्तेनाः प्रच्छन्नरूपा एवम्मनोऽपीति गौणः प्रयोगः, प्रायाच्चानृतवादिनी वागिति । **देवदत्तपूजामिति**–एतादृशीं योग्यतामापन्नो देवदत्तो यदृषिणा पूजनीयः प्रतिभातीत्येवंरूपामिति बोध्यम् । औदासीन्यं= देवदत्तपूजकत्वप्रदर्शनरूपम् । **पूज्यत्वमृषेरिति** ऋषेः पूजार्हत्वमित्यर्थः । प्रायेण=बाहुल्येन । अनृतं=मिथ्या । **इति स्तूयत इति**–इत्थमत्र प्रघट्टसारांशः–'कृत्तिकास्वग्निमादधीत एतद्वा अग्नेर्नक्षत्रं यत्कृत्तिकाः' इति तैत्तिरीयब्राह्मणे श्रूयमाणेन बहुवचनेन कृत्तिकादिनक्षत्रसप्तकग्रहणात्तदन्यतमे नक्षत्रेऽग्न्याधानं कुर्यादित्याह भगवानाश्वलायनस्तत्राग्न्याधाने [4]कथम्भावाकाङ्क्षायां पुनस्तैत्तिरीयब्राह्मणे समाम्नातम् 'यद्धिरण्यमुपास्यति सरेतसमेवाग्निमाधत्ते' इति, तस्याऽयं भावः–कदाचिद्वरुणपत्नीरपो ध्यात्वा रन्तुम्प्रवृत्तस्याग्नेर्मदनवेदनाऽऽकुलितचित्तत्वाद्भूमौ रेतः पपात तस्माद्धिरण्यमभवत्, एवञ्च हिरण्यस्याग्निरेतस्त्वात्तेन साकमग्निचयने वीर्यवत्त्वादाशुफलप्रदोऽग्निर्भवति अतो हिरण्यग्रहणपूर्वकमग्न्याधानं कार्यमिति । तथा चाग्न्याधानार्थतत्तच्छ्रुतिप्रतिपाद्य हिरण्यग्रहणे हस्तं प्रशंसितुं वाङ्मनसयोरनृतप्रायत्वस्तेनरूपत्वे पूर्वोक्ताभ्यामर्थवादवाक्याभ्यां निरूप्येते, विधिवाक्यप्रतिपादितेष्वर्थेषु पुरुषान् प्रवर्त्तयितुमस-

१ मेधादिहेतुभूतक्रियाश्रयं फलमित्यर्थः । २ ज्ञाता । ३ ताद्रूप्यादित्यर्थः । ४ कया रीत्या कर्त्तव्यमित्येवंरूपाऽऽकाङ्क्षा कथम्भावाकाङ्क्षा ।

त्येनापि वस्तुना प्रवृत्तानामर्थवादवाक्यानां लौकिकदृष्टान्तेन दोषाभावस्य पूर्वमुपपादितत्वादिति। दूरेति–दूरबाहुल्यादित्यर्थः । सोऽर्थवादः='तस्माद्धूम एवाग्नेर्दिवा ददृशे नार्चिः' इत्येवमादिः पूर्वोक्तः। अर्चिः=अग्निज्वाला। न दृश्यते=रात्राविव विस्पष्टं नाऽऽलोक्यते। सूर्यमन्त्र इति-दिवाव्यापकत्वेन सूर्यतेजसः प्राधान्यादिति तत्त्वम्। अर्चिरेवेति–दूरेऽपि प्रधानतयेति शेषः । तेषाम्=वृक्षाणाम् । अत्रापीति–अत्र='तस्माद्धूमएव' इत्याद्यर्थवादे । महति दूरे दिवाऽग्निज्योतिषोऽनुभूयमानमीषद्दर्शनं दर्शनाभावतुल्यं मत्वा 'न दृश्यते' इत्युपन्यासेन दिवा सूर्यप्राधान्यं प्रदर्श्य प्रातः सूर्योद्देशेन तन्मन्त्रप्रयोगे पुरुषं प्रवर्त्तयितुमयमर्थवादः–'तस्माद्धूम एवाग्नेर्दिवा ददृशे' इति, नक्तञ्च महति दूरेऽग्निज्वालापेक्षयाऽनुभूयमानं धूमस्यात्यल्पदर्शनमदर्शनं मत्वा तत्र 'न दृश्यते' इत्युपन्यासेन रात्रावग्न्युद्देशेन 'अग्निर्ज्योतिः' इति मन्त्रप्रयोगे पुरुषम्प्रवर्त्तयितुं 'तस्मादर्चिरेवाग्नेर्नक्तम्' इत्ययमर्थवाद इति भावः । एतच्च संक्षिप्ताक्षरैरुक्तं तन्त्रवार्त्तिके—'दूरस्थै भूम्ना[१] दिवा धूम एव [२]गृह्यते रात्रावर्चिरिति केनचिदंशेन स्तुत्यालम्बनमिति। देवाः पितर इतीति–'देवाः पितरः पितरो देवा योऽहमस्मि स सन् यजे यस्यास्मि न तमन्तरेमि स्वं म इष्टं स्वं दत्तं स्वं पूर्तं स्वं श्रान्तं स्वं हुतं तस्य मेऽग्निरुपद्रष्टा वायुरुपश्रोताऽऽदित्योऽनुख्याता द्यौः पिता पृथिवी माता प्रजापतिर्बन्धुर्य एवास्मि स सन् यजे' इत्येवं रूपमित्यर्थः। मूले 'देवाः पितर' इति इत्यत्रत्य-इति शब्दः पूर्वोक्तस्य ब्रूयादित्यस्य कर्मेति बोध्यम्। अयम्='न चैतद्विद्मो वयं ब्राह्मणाः स्मोऽब्राह्मणा वा' इत्युक्तरूपः। सूत्रे कर्त्तुरित्यस्य गर्भाधानकर्त्तुरित्यर्थः। प्रवरमिति-प्रवरश्च-आर्षेय-पौरोहित्य-राजर्षि-मानवादिभेदादनेकविधः, तत्र यजमानस्य ब्राह्मणत्वे आर्षेयाणां प्रवराणामनुमन्त्रणं, यजमानस्य क्षत्रियत्वे वैश्यत्वे वा पुरोहितसम्बन्धिनां 'पौरूरवस' इत्येवंरूपस्य वा। स्वस्वप्रवरसंशये त्रयाणामपि वर्णानां 'मानव' इत्ययमेव शब्दः प्रवरो भवेत्, तथा च श्रौतसूत्राणि–'यजमानस्यार्षेयान् प्रवृणीते यावन्तः स्युः' १ 'पौरोहित्यान्राजन्यविशाम्'

१ बाहुल्येन। २ चाक्षुषज्ञानविषयीक्रियते।

२ 'राजर्षीन् वा राज्ञाम्' ३ 'सर्वेषां मानवेति संशये' ४ इति, एषु प्रथमसूत्रे यावन्त इत्यस्य 'त्रयो वा पञ्च वा' इत्यर्थः, तथा हि–शाण्डिल्यगोत्रस्य शाण्डिल्यासितदेवलास्त्रयः प्रवराः, काश्यपगोत्रस्य काश्यपावत्सारनैध्रुवेति त्रयः, वत्सगोत्रस्य और्व-च्यवन-भार्गव-जामदग्न्याप्लवानेति पञ्चप्रवरा इति, एवमन्यगोत्राणामप्यूह्यम्। अपराधः=व्यभिचारः। **दुर्ज्ञानमिति**—अयमत्र सारः–यदि पाणिग्रहीत्रैव पुंसा सह सङ्गमे पुत्रोत्पत्तिः स्त्रिया न जारेणेत्येवं नियम उपालप्स्यत तदैतत्स्वीयं ब्राह्मणत्वमब्राह्मणत्वं वा सुज्ञानमभविष्यत् न त्वेतदस्ति जारेणापि पुत्रोत्पत्तेस्तुल्यत्वात्, यत्परिहाराय—[1]'अप्रमता-रक्षत [2]तन्तुमेनम्' इत्यादयः श्रुतयोऽपि शतं श्रूयन्ते। एवञ्च 'अनादाविह संसारे दुर्वारे मकरध्वजे। कुले च कामिनीमूले का जातिपरिकल्पना' तस्मात् स्वकीयं ब्राह्मणत्वमब्राह्मणत्वं वा निश्चेतुं दुःशकम्, तथा स्थितौ 'न चैतद्विद्म'–इति कथने को दृष्टविरोधः? सन्दिग्धस्याब्राह्मणत्वस्य 'निराकरणकारणे 'देवाः पितरः' इति मन्त्रप्रयोगपूर्वकप्रवरानुमन्त्रणे पुरुषान् प्रवर्त्तयितुमेव तस्य वाक्यस्य कृतावतारत्वात्, प्रवरानुमन्त्रणेनाब्राह्मणोऽपि ब्राह्मणः स्यादिति प्रलोभितः पुरुषो हि तत्र सोत्साहं प्रवर्त्तेत इति। **आकालिकेप्सेति**–अकाले=असमये समयमुल्लङ्घ्येति यावत् भवमाकालिकं=कालान्तरभावि (स्वर्गादिरूपं फलम्) उक्तञ्चान्यत्र—'लौकिकानि कृषि-घृतपानाध्ययनादिकर्माणि यथा कालान्तरभाविफलजनकानि तथा वेदे यागेऽप्यवगन्तव्यम्' इति, तस्येप्सा=प्राप्तीच्छेत्यर्थः। तन्त्रवार्त्तिके तु 'यत्तदानीमेवोत्पद्यते तदाकालिकं तच्च सर्वलोकस्याभिमतं न यच्चिरभावि, अथवा लोके कालशब्दस्य दूरार्थकतया अकाले=अदूरे भवमाकालिकम्=अदूरवर्त्ति ईप्साऽत्र प्राप्त्यभिलाषः एवञ्च आकालिकस्य=साक्षाद्दृश्यमानस्य (फलस्य) ईप्सा=प्राप्तीच्छेति सूत्रार्थं कृत्वा आकालिकपदेन धूमनिर्गमरूपमेव फलं जग्राह न तु स्वर्गादिरूपमिति बोध्यम्, अर्थसङ्गतिस्तूभयथाऽपि सम्भवति। क्वचित् 'अकालिकेप्सा' इति पाठो दृश्यते तत्र काले=दूरसमये भवं कालिकं न

१ सावधानाः। २ बीजसंशुद्धिपूर्वकसन्तानोत्पत्तिरूपम्।

कालिकमकालिकं तस्येप्सेति व्युत्पत्तिः अर्थः प्राग्वत्। प्रपञ्चितञ्चैतद्विस्तरेण शबरभाष्य-तन्त्रवार्त्तिकादिषु। **दिक्ष्विति**—अतीकाशः=प्रकाशः। प्राचीन[1] वंशस्य=प्राग्वंशस्य-हविः शालायाः पूर्वभागे यजमानादीनां स्थित्यर्थं गृहविशेष-स्येति यावत्, 'प्राग्वंशः प्राग्घविर्गेहात्सदस्या विधिदर्शितः' इत्यमरोक्तेः। **द्वारविधिरिति**—धूमनिर्गमद्वारविधिरित्यर्थः। **कारणमिति**—'को हि तत्=स्वर्गादिरूपं फलं वेद=जानाति यदि=यत् अमुष्मिन्=परलोके अस्ति वा न वा यतस्तस्येप्सा=आकालिकेप्सा' इत्येवं क्रमेण कारणमित्यर्थः। **इत्यभिप्राय इति**—अस्यायमभिप्रायः-दिक्ष्वतीकाशान् करोतीति वाक्ये 'दिक्षु, अतीकाशान्' इति बहुवचनश्रुतिबलेन प्राचीनवंशनाम्नो गृहस्य हविःशालायाः प्राङ्निर्मितस्य चत्वारि द्वाराणि (मुखानि) धूमनिर्गमाय कर्त्तव्यानीत्यायाति व्यवहारोऽपि याज्ञिकानां तावानेव, तथा सति स्वर्गादि-फलकयागादपि पूर्वमतिपरिश्रमसाध्यस्य प्राग्वंशनाम्नो वेश्मनो द्वारचतुष्टय-निर्माणं व्यर्थं यागानुष्ठान एवायमपि समयो देयो यावता श्रूयमाणं स्वर्गादिफल-मुपलभ्येतेत्येवञ्चेद्यजमानः फलविशेषमनवलोक्य चतुर्द्वारप्राग्वंशगृहनिर्माणा-द्विरन्तुमीहेत तदा तं पुनरेतद्गृहद्वारचतुष्टयनिर्माणकर्मणि प्रवर्त्तयितुमयम-र्थवादः 'को हि तद्वेद' इति, अनेन ह्यर्थवादेन तत्=स्वर्गादिरूपमाकालिकं परोक्षभूतञ्च फलं को वेत्त्यस्ति वा न वेति धूमाद्युपद्रवनिवृत्तिरूपन्तु फलं प्रत्यक्षं तस्मात्साक्षाद्धूमनिवृत्तिफलकचतुर्द्वारप्राचीनवंशवेश्मनिर्माणस्य परोक्षभूतस्व-र्गादिफलकयागानुष्ठानापेक्षयाऽभ्यर्हितत्वाद्यागानुष्ठाने धूमोपद्रवनिवृत्ति-कारकत्वेन सहायकत्वाच्च तद्गृहद्वारनिर्माणमेव पूर्वं कर्त्तव्यं तदनु यागानुष्ठानमित्येवं प्रलोभितो यजमानः प्राग्वंशद्वारनिर्माणे प्रवर्त्तत इति। **गर्गत्रिरात्रेति**—वैतानसूत्राद्युक्तेषु पञ्चत्रिंशत्यहीनाऽऽख्ययागेषु पञ्चदशत्र्य-हाऽऽख्ययागान्तर्गतः पञ्चमोऽयं 'गर्गत्रिरात्र' संज्ञको यागः, वैतानसूत्रे हि पञ्च-दशसु त्र्यहेषु सौमिकचातुर्मास्यानि वैश्वदेव-वरुणप्रघास-शाकमेध-शुनासीर्याणि

---

१ प्राचिभवः-प्राचीनः 'विभाषाञ्चेरदिक् स्त्रियाम्' इति ख प्रत्ययः, प्राचीनश्चासौ वंशश्चेति प्राचीनवंशस्तस्य।

चत्वार्युक्त्का गर्गत्रिरात्रं, वैदत्रिरात्र'-मित्याद्युक्तमिति दिक् । तद्विषयं=तत्कर्मकम् । वेदनं=ज्ञानम् । किमुत=किं पुनः । उत्साहेन=ज्ञानजन्यहर्षेण । **शोभासादृश्येति**-वस्तुतस्तु मुखशोभा मा भूद्भवतु वा गर्गत्रिरात्रविधिगत-मन्त्रज्ञानेन तत्कर्मानुष्ठाने पाटवं स्यादित्युद्दिश्य तत्र (गर्गत्रिरात्रनामकयागानुष्ठाने) पुरुषान् प्रवर्त्तयितुमयमर्थवाद इति बोध्यम् । **आस्य प्रजायामिति**-आ + अस्येतिच्छेदः 'आ' इत्यस्य 'जायते' इत्यत्रान्वय इत्युक्तं प्राक् । **वेदानुमन्त्रणेति**-वेदानामनुमन्त्रणं वेदानुमन्त्रणं तस्य विधिरित्यर्थः, अनुमन्त्रणञ्चोक्तम्-'मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरन् । शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम्' इति, स्पष्टञ्चैतत्-'जपानुमन्त्रणाप्यायनोपस्थानान्युपांशु' इत्याश्वलायनश्रौतसूत्रस्य व्याख्यायां तद्भाष्ये । **कैमुतिकेति**-किमुत इत्यस्ति यस्मिन् स कैमुतिकः स चासौ न्यायश्च तेनेत्यर्थः-यथा य एवं वेद=जानाति तस्यापि प्रजायां=सन्ततौ वाजी=अन्नवान् धनधान्यसमृद्धिमानित्यर्थः पुत्रः आ=समन्तात् जायते=उत्पद्यते किमुतः=किं पुनः योऽनुतिष्ठतीति । आधिकारिकम्=आपेक्षिकम् । ननु यदि तद्विषयक मेव सर्वत्वं तदा 'सर्वान् कामान्' इति बहुवचनानुपपत्तिरितिचेदतस्तदुपपत्तिं दर्शयति । **पूर्णाहुतेरित्यादिना**-अनुपदं वक्ष्यमाणकामत्रयतात्पर्येण बहुवचनमिति तत्त्वम् । समाधीयते=निराक्रियते । **आहवनीयेति**-आहवनीय-दक्षिणाग्नि-गार्हपत्य-सभ्याऽऽवसथ्यौपासनरूपाः षडग्नय इत्यर्थः । अन्यः=द्वितीयः । **इति कामान्तरमिति** एवञ्चैतादृशकामत्रयतात्पर्येण 'सर्वान् कामान्' इति बहुवचनं युक्तमेवेति भावः । तैः=अग्निहोत्रादिभिः । तत्तत्फलम्='अग्निहोत्रं जुहुयात्स्वर्गकाम' इत्यादि-श्रुतिवाक्यप्रदर्शितं स्वर्गादिरूपम् । **सारतो वेति**-क्वचित्पुस्तके 'सारतो वा' इत्येतद्रहितं सूत्रं दृश्यते तदनुचितम् । **लोकवदित्युक्तार्थे दृष्टान्त इति**-सूत्रे लोकवदिति यदुक्तं तत्कर्मान्तरेण परिमाणाधिक्यादिरूपे उक्तार्थे दृष्टान्त इति समन्वयः । तमेव दृष्टान्तमाह **यथेति**-निष्को दीनारः 'अशर्फी' इति लोकप्रसिद्धः । खारी=द्रोणचतुष्टयम् । परिपूर्णं दृष्टान्तमाह । **यथा वेति**-दुकूलं=पट्टवस्त्रम्, 'पटोर' इति मैथिलभाषाप्रसिद्धम् । 'तरति मृत्युं पाप्मानं

तरति ब्रह्महत्याम्' इत्यर्थवादं सङ्गमयति–**ब्रह्महत्याया अपीति,** एवञ्च 'योऽश्वमेधेन यजते' इति कायिक्या महत्या ब्रह्महत्याया विषये; 'य उचैनमेवं वेद' इति च मानस्या अल्पीयस्या ब्रह्महत्याया विषये योजनीयम्। **अप्रस-क्तेति**–अप्रसक्तस्य=अप्राप्तस्य (अन्तरिक्षादावग्निचयनस्य) प्रतिषेध इत्यर्थः। अनयोः='नान्तरिक्षेन दिवि' 'बबरः प्रावाहणिः' इत्युभयोः। नित्या-नुवादः=नित्यस्य=स्वाभाविकस्य अनुवादः=तेनैव रूपेण विशिष्यप्रतिपादनम्। **स्तोतुं शक्यत इति**—एवञ्च यथाऽन्तरिक्षे दिवि वा चयनं न प्रसिद्धं तथा हिरण्यरहितायां भूमाविति भवति हिरण्यसहिताया भूमेः स्तुतिरिति बोध्यम्। **क्षेपिष्ठत्वेनेति**—वायोरतिक्षिप्रगामित्वं नित्यसिद्धम्। व्यवहारद-शायां=तात्पर्यपर्यालोचनवेलायाम। **अधिकरणे इति** अत्र 'पूर्वमीमांमासायां जैमिनिना' इत्यस्य शेषो बोध्यः। कारिकायां **वायुर्वेति**—विधेये=विधि-प्रतिपाद्ये धर्मे 'वायुर्वै क्षेपिष्ठा०' इत्येवमादेरर्थवादस्य मानता=प्रामाण्यं नास्ति किम्? किं वा=अथवा असौ=मानता तत्र=अर्थवादे विद्यते=अस्ति? इति सन्देहे,–मिथः=परस्परं विधिशब्दानामर्थवादशब्दानाञ्चापेक्षापरिक्षयात्= अपेक्षाऽभावात् एकवाक्यतैव नास्ति धर्मे प्रामाण्यं कुतः=कथ सम्भवेत्? इति पूर्वः पक्षः। प्राशस्त्य (प्रशंसा) पुरुषार्थयोर्यथाक्रमं विध्यर्थवादौ साकाङ्क्षौ तस्मात्परस्परं तयोरेकवाक्यता जायतेऽतो वादानाम्=अर्थवादानां धर्मे मानता=प्रमाणता अस्तीति शेष इत्युत्तरम्। **स्वतस्त्वेति**—अत्र 'समस्तवस्तुप्रकाशकसूर्यादीनां स्वस्वरूपप्रकाशकत्वस्येव' इत्यादिः। कृत्स्नस्य= सकलस्य। **विप्रलम्भकेति**—असत्यस्यापि वस्तुनो विस्तरशः प्रतिपादकं काव्यादिवाक्यं विप्रलम्भकवाक्यम्। सन्निकर्षम्=आधुनिकत्वम्। **कालिदा-सादिभिरिति**—उपलक्षणमेतत्–आधुनिककविभिर्निर्मितानामाधुनिकग्रन्था-नामित्यर्थः, अन्यथा जैमिनि-मुनिकर्तृक–'वेदाँश्चैके०' इति सूत्रनिर्माण-समये ततः पूर्वं वा कालिदासादीनां तदीयग्रन्थानाञ्चाभावेन प्रकृतग्रन्थासङ्गत्या-पत्तेः। ते=रघुवंशादिग्रन्थाः। अत एव=वेदानामाधुनिकत्वस्वीकारादेव। औद्दा-लकिः=उद्दालकस्य पुत्रः। विमतम्=विवाद-ग्रस्तम्। **चकार इति**—

अनित्यदर्शनाच्चेति सूत्रस्थश्चशब्द इत्यर्थः। प्राचीनैः=पूर्वोक्तैः। **शब्दाधिकरणेति**—'कर्मैके तत्र दर्शनात्' इत्यारभ्य 'लिङ्गदर्शनाच्च' इत्यन्तैरष्टादशभिः सूत्रैः प्रदर्शितं शब्दनित्यताऽधिकरणं—शब्दाधिकरणम्। तत्र संगृह्यार्थप्रतिपादकौ श्लोकौ—

"विध्यादिरूपो यः शब्दः सोऽनित्योऽथाविनश्वरः।
अनित्यो वर्णरूपत्वाद्वर्णो जन्मोपलम्भनात् ॥
अबाधितप्रत्यभिज्ञाबलाद्वर्णस्य नित्यता।
उच्चारणप्रयत्नेन व्यज्यतेऽसौ न जन्यते ॥" इति

'उत्पत्तौ वाऽवचनाः स्युः' इत्यादिसूत्रत्रयेण निर्णीतं सप्तमाधिकरणं-वाक्याधिकरणम्, अत्रत्यतात्पर्यसंग्राहकौ श्लोकौ—

"वेदवाक्यममानं स्यान्मानं वा? नास्य मानता।
पृथक्सङ्गत्यपेक्षाया मनपेक्षत्ववर्जनात् ॥
वेदेऽपि लोकवच्चैव वाक्यार्थे सङ्गतिः पृथक्।
ग्रहीतव्या, ततो वाक्यं प्रमाणं नैरपेक्ष्यतः ॥" इति

विस्तरभयादिहानुपन्यस्तोऽप्येतदुभयाधिकरणतात्पर्यार्थः पूर्वमीमांसा-प्रथमाध्याय-प्रथमपादे शबरभाष्य-तन्त्रवार्त्तिक-शास्त्रदीपिका-न्यायमालाभ्योऽवन्तव्यः। आख्या=संज्ञा, काठक-कालाप-तैत्तिरीयादि नामेति यावत्। प्रवचनात्=अध्यापनात्। **वनस्पतय इति**—पुष्पं विनैव जातैः फलैरुपेत उदुम्बरादिर्वृक्षो वनस्पतिः 'वानस्पत्यः फलैः पुष्पा, त्तैरपुष्पाद्वनस्पतिः' इत्यमरः। सत्रं=यज्ञविशेषम्, अस्य रात्रिसत्रायनसत्र-महासत्रादयो बहवो भेदास्तापश्चितब्राह्मणे शतपथे समाम्नाता द्रष्टव्याः। **जरद्गव इति**—"जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मद्रकाणि। तं ब्राह्मणी पृच्छति पुत्रकामा राजन्नुमायां लशुनस्य कोऽर्थः" इति समग्रम्। जरँश्चासौ गौर्जरद्गवः, मद्रकाणि=मङ्गलानि। **साध्य-साधनभावस्येति**—साध्यं=स्वर्गादि, साधनं=ज्योतिष्टोमादि तयोर्भावस्येत्यर्थः, साध्यत्वसाधनत्वयोरिति यावत्। **भाव्येति**—भाव्यं=साध्यम्। भावनायाः=क्रियायाः। **किं केनेति**—अत्र किमिति भाव्या—(साध्यभूततृप्तिरूपफला)—

काङ्क्षा, केनेति करण-(साधना)-काङ्क्षा, कथमितीतिकर्त्तव्यताऽऽकाङ्क्षा। **कथमुन्मत्तवाक्य-सदृशमिति**—न हि 'जरद्गवो गायति मद्रकाणि' इत्यादौ, 'दशदाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डमधरोरुकमेतत्कुमार्याः स्फैय्यकृतस्य पिता प्रतिशीन' इत्यादौ चोन्मत्तवाक्ये पद-पदार्थानां कश्चिदपि सम्बन्धो घटते, यदि तु ज्योतिष्टोमादि वाक्यमप्युन्मत्तप्रलपितमभविष्यत्तदेहापि पद-पदार्थसम्बन्धाभावोऽभविष्यत् न त्वेवमस्ति तस्मान्नोन्मत्तवाक्यसदृशमिति भावः। तत्सदृशम्=उन्मत्तवाक्यसदृशम्। **यत्परः शब्द इति**—अत्र 'यत्परो हि शब्दः स शब्दार्थ इति न्यायविद आहुः' इति पाठस्तु सर्वथा भ्रान्तिमूलकः, 'हि' शब्दस्यात्र हेतुवाचकत्वेन न्यायस्वरूपमध्ये पाठस्यान्याय्यत्वात्। **प्रशंसायामिति**—ज्योतिष्टोमादिविधिवाक्यतात्पर्यविषयीभूते कर्मानुष्ठाने पुरुषान् प्रवर्त्तयितुं प्रशंसायामित्यर्थः। सा=प्रशंसा। तामेव दर्शयति–**अचेतना इति**। चकारः='कृते चाविनियोगः' इतिसूत्रोक्तश्चशब्दः। वाक्यत्वहेतोः=वाक्यरूपस्य हेतोः। पराहतिं=व्याघातम्। **पौरुषं न वेति**– वेदवाक्यं पौरुषेयं न वा ?' इति सन्देहे 'काठकादि-समाख्यानात्, कालिदासादिवाक्यवद्वाक्यत्वाच्च स्यात्पौरुषेयता' इति पूर्वः पक्षः, काठकादि–समाख्यानमध्यापनात्सिद्धं वाक्यत्वहेतुकं पूर्वोक्तमनुमानन्तु कर्त्तुरनुपलम्भेन निरस्तं तस्मादपौरुषेयता स्याद्वेदवाक्यानामिति सिद्धान्त इति भावः। ब्रह्मकार्यत्वं=ब्रह्मनिर्मितत्वम्। बाढमितिं स्वीकारार्थे 'भृश-प्रतिज्ञयोर्बाढ'-मित्यमरात्। **अत एव च नित्यत्वमितीति**—अनेन सूत्रेण हि 'वेदोऽवान्तरप्रलयावस्थायी जगद्धेतुत्वादीश्वरव'दित्यनुमित्या नित्यत्वं वेदस्य साधितम्। अत एव "यज्ञेन वाचः पदवीयमायन्तामन्वविन्दन् ऋषिषु प्रविष्टाम्। ता माभृत्या व्यदधुः पुरत्रा तां सप्तरेभा अभिसंनवन्ते" इति (ऋ० सं० १०।७१।३ मन्त्रवर्णः) श्रूयते, अस्याः श्रुतेः–'विदितार्थाः=धीराः पदवीयं वेतेरचो यत् संज्ञापूर्वकस्य विधेरनित्यत्वान्न गुणः पदेन यातव्यो वा पन्थाः पदवीयस्तं वाचोमार्गं यज्ञेन=पूर्वपुण्येन आयन्=प्राप्तवन्तः, ऋषिषु=अतीन्द्रियार्थदर्शिषु प्रविष्टां तां वाचम् अविन्दन्=अलभन्त, अनन्त तां वाचम् आभृत्य=आहृत्य (हृग्रहोर्भश्छ-

न्दसीति ह्वनोहस्य भत्वम्) पुरत्रा=बहुषु देशेषु व्यदधुः=व्यकार्षुः सर्वान्मनुष्यानध्यापयामासुरित्यर्थः एतादृशीं वाचं सप्तरेभाः=शब्दायमानाः पक्षिणः पक्षिरूपाणि गायत्र्यादीनि सप्तच्छन्दांसि अभि संनवन्ते=अभितः सङ्गच्छन्ते' इत्यर्थः । **विरूपनित्ययेति**-विरूपा चासौ नित्या चेति विरूपनित्या तयेत्यर्थः । तृतीयार्थस्य 'जगज्जातमिदमुत्पादित'-मिति वाक्यान्तरार्थेनान्वयः । **अनादीति**-अस्य 'आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः' इत्युत्तरार्द्धम्, अत्र स्मृतौ 'वागुत्सृष्टा स्वयं भुवा' इत्यस्य 'सृष्टेः पूर्वं स्वयम्भुवा=प्रजापतिना वेदमयी वाक् उत्सृष्टा=स्वमाहात्म्येन स्मृतिपथमानीते'-त्यर्थः । स्पष्टञ्चैतत् 'स्वयम्भुवो वेदकर्तृत्वेऽपि न कालिदासादिवत्स्वतन्त्रत्वमपि तु पूर्वसृष्ट्यनुसारेण' इत्यादिग्रन्थेन षड्दर्शनाचार्य-महामहोपाध्याय-मैथिलमहाभाग-श्रीवाचस्पतिमिश्रकृत-भामत्याम् । अत एव—

"नामरूपञ्च भूतानां कर्मणाञ्च प्रवर्त्तनम् ।
वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः ॥
सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ॥"

इत्याद्यभियुक्तोक्तयः सङ्गच्छन्ते । **अहे बुध्नियेति**-'अहे बुध्नियमन्त्रं मे' इत्यस्य मन्त्रस्य लक्षणं नास्ति अस्ति वा ? इति शङ्कायां नास्ति एतत् लक्षणं, कुतः ? अव्याप्त्यादेरवारणादिति-पूर्वः पक्षः, याज्ञिकानां समाख्यानं दोषवर्जितं लक्षणमस्ति यतस्ते=याज्ञिकाः अनुष्ठानस्मारकादौ मन्त्रशब्दं प्रयुञ्जत इति सिद्धान्त इति भावः । **वसन्तायेति**-तन्नामकमृतुमुद्दिश्येत्यर्थः, **अतिव्याप्तिरिति**-मननहेतुत्वस्य ब्राह्मणेऽपि सद्भावादिति भावः । **असिपदान्त इति**-'असि' इति पदमन्ते यस्य सः । **अनुष्ठानस्मारका इति**-'उरुप्रथस्व' इत्यादयो मन्त्रा हि पुरोडाशप्रथनादिरूपमनुष्ठानं स्मारयन्ति तस्मादेतेषा-मनुष्ठानस्मारकत्वम् । **परिदेवनेति**-'विलापः परिदेवनम्' इत्यमरः । **उत्तररूपा इति**-प्रश्नोत्तररूपेण यद्वचनं तद्ब्रह्मोद्यम् तथा च 'पृच्छामि त्वे'-ति, 'अयं वेदिः'

परा अन्तः पृथिव्याः’ इति च वाक्यद्वयं ब्रह्मोद्यम् । स्पष्टञ्चैतदाश्वलायनश्रौतसूत्रे—“कः स्विदेकाकी चरति क उस्विज्जायते पुनः किं स्विद्धिमस्य भेषजं किं स्विदावपनं महदिति होताऽध्वर्युं पृच्छति, सूर्य एकाकी चरति चन्द्रमा जायते पुनः अग्निर्हिमस्य भेषजं भूमिरावपनं महदिति प्रत्याह, किं स्वित्सूर्यसमं ज्योतिः किं समुद्रसमं सरः कःस्वित्पृथिव्यै वर्षीयान् कस्य मात्रा न विद्यते इत्यध्वर्युर्होतारं पृच्छति, सत्यं सूर्यसमं ज्योतिर्द्यौः समुद्रसमं सरः इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते इति प्रत्याह, पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगन्थ केषु विष्णुस्त्रिषु पदेष्वस्थः केषु विश्वं भुवनमाविवेशेति ब्रह्मोद्गातारं पृच्छति, अपितेषु पदेष्वस्मि येषुविश्वं भुवन माविवेश सद्यः पर्येमि पृथिवीमुत द्यामेकेनाङ्गेन दिवोऽस्य पृष्ठमिति प्रत्याह, केष्वन्तः पुरुष आविवेश कान्यन्तः पुरुष आर्पितानि एतद्ब्रह्मन्नपबह्लामसि त्वा किं स्विन्नः प्रतिवोचास्यत्रेत्युद्गाता ब्रह्माणं पृच्छति, पञ्चस्वन्तः पुरुष आविवेश तान्यन्तः पुरुष आर्पितानि एतत्त्वात्रप्रतिवन्वानो अस्मिन् सदस्युत्तरोमदिति प्रत्याह, (ततः) स्वायतने प्राङ्मुखमुपविष्टं यजमानमेकैकश ऋत्विजः पृच्छन्ति–‘पृच्छामि त्वा परमन्तं पृथिव्या’ इति, स च ‘इयं वेदिः परो अन्तः पृथिव्या (इति) तान्प्रत्याह’ इत्यादिना । अन्तरेण=विना । अनुगतः=निर्दुष्टः । ननु लक्षणस्य प्रयोजनमेव किमिति चेत्त्राह **लक्षणस्य चोपयोग इति** । पृथकत्वशः=एकैकशः । **सिद्धान्तानामिति**—पदार्थानामित्यस्य विशेषणमिदम् । **नास्तीति**—‘एतद्ब्राह्मणान्येव पञ्च हवींषि’ इत्यत्र ब्राह्मणस्य लक्षणं नास्ति अथवा विद्यते ? इति प्रश्नः, **इयन्तो वेदभागा इति**–क्लृप्तेः=कल्पनायाः अभावतः=अभावात् नास्तीति पूर्वपक्षी, मन्त्रश्च ब्राह्मणञ्चेति द्वौ भागौ वेदस्य स्तस्तेन हेतुना मन्त्रतः=मन्त्रात् अन्यत् ब्राह्मणमिति ब्राह्मणस्य लक्षणं भवेदिति सिद्धान्ती । **चातुर्मास्येष्विति**–पञ्चधाविभक्तेषु यज्ञेषु यः प्रथमः शिरोयज्ञस्तदन्तर्गतेषु यज्ञविशेषेष्वित्यर्थः एषु हि चत्वारि पर्वाणि भवन्ति तत्र प्रजासृष्टिहेतुभूतं वैश्वदेवनामकं प्रथमं पर्व, वरुणपाशमोचनहेतुभूतं वरुणप्रघासाख्यं द्वितीयं पर्व,

पापरूपशत्रुजयसाधनं साकमेधाख्यं तृतीयं पर्व, सम्वँत्सरलक्षणफलहेतुभूतं [1]शुनासीरीयं तुरीयं पर्व। चातुर्मास्यानामक्षय्यफलसाधनत्वमिति स्पष्टं शतपथब्राह्मणे, एतेषां सर्वेषां वृत्रवधहेतुत्वं जयहेतुत्वञ्चेति बोध्यम्। **एतद्ब्राह्मणान्येवेति**—अत्रेदमुपरिष्टाद्बोध्यम्—चातुर्मास्यीये वैश्वदेवे पर्वणि "आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुं, सावित्रं द्वादशकपालं, सारस्वतं चरुं, पौष्णं चरुं, मारुतं सप्त कपालं, वैश्वदेवीमामिक्षाम्, द्यावापृथिव्यमेककपालम्" इत्येतैर्वाक्यैराग्नेयादीन्यष्टौ हवींष्याम्नाय तेषां हविषां प्राशस्त्याय 'वार्त्रघ्नानि वा एतानि हवींषि' इत्यर्थवादञ्चाम्नाय "त्रेधा सन्नद्धं बर्हिर्भवति, त्रेधा सन्नद्ध इध्मः, नव प्रयाजा इज्यन्ते, नवानुयाजाः" इति वाक्यचतुष्टयेनाङ्ग-(धर्म)-रूपा बर्हिरादयोऽपि समाम्नाताः, वरुणप्रघासे पर्वणि च गत्वा वैश्वदेवपर्वोक्तान्याग्नेयादीन्यादितः पञ्चहवींषि विधाय तत्रो (वैश्वदेवपर्वण्यु)—दाहृतं ब्राह्मणमत्रो-(वरुणप्रघासपर्वण्यु)—त्स्वाग्नेयादिषु पञ्चसु हविष्ष्वतिदेष्टुमाम्नातम्—"एतद्ब्राह्मणान्येव पञ्च हवींषि, यद्ब्राह्मणानीतराणि" इति। अत्र 'एतद्ब्राह्मणान्येव' इत्यस्य वैश्वदेवपर्वोक्तब्राह्मणान्येवेत्यर्थ इति। एतद्ब्राह्मण ऐन्द्राग्न इति तु शतपथे। **व्यवधारणकल्पनेति**-अतोऽग्रे-

"उपमानं दशैते तु विधयो ब्राह्मणस्य तु।
एतद्वै सर्ववेदेषु नियतं विधिलक्षणम्॥"

इति वृत्ति-ग्रन्थेऽस्तीति शबरभाष्ये स्पष्टम्। **तेन ह्यन्नं क्रियत इति**—अत्र जुह्वादिपात्रं विहाय शूर्पेणैव तानि जुहुयात् तेन हि शूर्पेण त्वरा[2]पवनद्वाराऽन्नं क्रियत[3] इति श्रीसायणाचार्याः। **हेतुरिति**— 'तेन ह्यन्नम्' इत्यत्र 'हि' शब्दस्य हेतुवाचकत्वादिति भावः। अमेध्याः=अशुचयः।

---

१ 'सु' इति दन्त्यसकारघटितमपि पाठान्तरम्।

२ त्वरा=शीघ्रता तथा पवनं=त्रिः † फलीकरणं तद्द्वारा।

३ निष्पाद्यते वितुषीक्रियत इति यावत्।

---

† 'तिर छट करव' इति मैथिली।

तद्व्यचिकित्सदिति—आख्यायिकेयम्, तथा हि–यदा प्रजापतिना अग्निं सृष्ट्वा अन्याः प्रजा असृज्यन्त तदा सोऽग्निर्भागरहित एव तं प्रजापतिं कञ्चित्कालमुपास्य खिन्नः सन् प्रजाभिः सह तस्मात्प्रजापतेरपाक्रामत् ततस्तमग्निमवरोद्धुमिच्छन् प्रजापतिः पृष्ठतो गत्वा पलायमानं तमवरोद्धुं नाशक्नोत् अशक्तः स प्रजापतिः श्रमेण सन्तापम्प्राप ततोऽग्निस्तं दृष्ट्वा स प्रजापतिस्तप्त इत्येवं वदन् पलायनादुपरतः, स च प्रजापतिः श्रमजन्यं स्वेदजलं स्वीयललाटादुन्मृष्टवान् तच्च जलं घृतरूपेण प्रादुरभूत्, तस्मादयं प्रजापतिर्ललाटादुन्मार्जनञ्चकार तस्मात्कस्यापि ललाटे केशा न दृश्यन्ते (प्रजापतेर्जगत्कारणत्वात्कार्यगुणानाञ्च कारणगुणजन्यत्वात्), तेन तदुत्पन्नं घृतं होतुर्हस्ते कृत्वा स्वेदजलस्य पवित्रत्वसन्देहेन 'होमं कुर्यां न वे'–त्येवं व्यचिकित्सत्=सन्देहं कृतवान्[१] इति। विचिकित्सा च विविधकेतनस्य=अनेककोटयवगाहिज्ञानस्येच्छा (अर्थात्) कोटिद्वयात्मकः संशय इति तैत्तिरीयब्राह्मणभाष्ये श्रीसायणाचार्याः। **यजमानेनेति**—सम्मिता=परिमिता यावत्प्रमाणको यजमानस्तावत्प्रमाणेत्यर्थः। एकपुरुषकर्त्तृकमुपाख्यानं परकृतिः, बहुपुरुषकर्तृकमुपाख्यानं पुराकल्प इति तन्त्रवार्त्तिके। यत्रान्यथा प्रतीयमानोऽर्थः पौर्वापर्यालोचनेनान्यथा कल्प्यते सा व्यवधारणकल्पना, तद्यथा—प्रतिगृह्णीयादिति श्रुतं प्रतिग्राहयेदिति कल्पयिष्यत इतीत्यपि तत्रैव। **हेत्वादीनाम्**=हेतु-निर्वचन-निन्दा-प्रशंसा-संशयादीनाम्। **हेतुरिति**—हिशब्दघटितत्वादिति शेषः। मोघं=निरर्थकम्। **अधःस्विदिति**—

---

१ ततः प्रजापतिस्तस्मिन्नग्नौ तदेव ललाटनिर्गतजलमयं घृतं प्रजासृष्ट्यर्थं हुतवान् तदाहुतिसामर्थ्येन च पुरुषं सृष्टवान् द्वितीयाद्याहुतिभिरश्वादीन्, ततः प्रजानां पुनरुत्पत्तेः स्वस्य प्रजापतित्वं स्थितम्, तदानीं भीतोऽग्निः पुनः पुन र्देवेभ्य एवाहुतयो दीयन्ते मदर्थं न कोऽपि भाग इति पलायनादुपरत एव प्रार्थयामास प्रजापतिरपि तस्मै अग्निहोत्रहोमस्तुभ्यमेवेत्युवाच तदारभ्याग्नये होत्रमस्मिन्निति व्युत्पत्त्या अग्निहोत्रव्यवहार इति प्रपञ्चितं तैत्तिरीयब्राह्मणे पूर्वमीमांसायाञ्च।

अयम्मन्त्रः प्राग्व्याख्यातोऽस्माभिः । वसन्ताय=वसन्तर्त्तुमुद्दिश्य । **यज्ञेन यज्ञमिति**-यज्ञं=यजनीयं विष्णुमित्यर्थः, कर्मसु कौशलेन दीव्यन्तीति देवा ऋत्विजः । 'इत्यददाः' 'इत्यजथाः' 'इत्यपचः' इति त्रीणि तत्तन्मन्त्राणां प्रतीकानि । उपनिबद्धं=सम्बद्धम् । **राजा चिद्यमिति**-"प्रातर्जितं भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्त्ता । आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह" इति मन्त्रस्वरूपम्, अत्र मन्त्रे 'विधर्त्ता' इत्यस्य 'अस्य जगत' इति शेषः, आध्रश्चित्=दरिद्रोऽपि, तुरश्चित्=त्वरमाणः, एकत्र भगं=कार्यसाधकमपरत्र राज्यसाधकं सूर्यमित्यर्थ इति श्रीसायणाचार्याः । **यमयमीसम्वादेति**-'ओचित्सखाय'-मित्यादि चतुर्दशर्चं सूक्तं यमयमीसम्वादरूपम् । **देवासुरा इति**-संयत्ताः=संग्रामकारिणः । अयमत्रेतिहासः-देवाश्चासुराश्च युद्धमारब्धवन्तस्तदानीं प्रजापतिर्ज्येष्ठं पुत्रमिन्द्रं बलीयांसोऽसुरा मावधिषुरिति क्वचिद्गूढे स्थाने स्थापितवान् तथा प्रह्लादोऽपि देवा मा घ्नन्तु इति धिया स्वकीयं तनयं विरोचनं गूढे स्थाने निहितवान् ततो देवाः स्वपितरं प्रजापतिं समेत्योचुर्नाराजकस्य युद्धं सम्भवति तस्मादिन्द्रं कामयामहे इति ततो ब्रह्माज्ञया ते देवा इष्टिं कृत्वा स्वामिनमिन्द्रं लब्ध्वा तद्बलेनासुरान् पुरा पराजयन्ते इति, इति तैत्तिरीयब्राह्मणे (१।५।६) स्पष्टम् । **इदं वा इति**-इदं=भूतजातं वै=निश्चयेन । **तच्चोदकेष्विति**-तत्=मन्त्रानधीमहे, मन्त्रानध्यापयामः, मन्त्रा वर्त्तन्ते इत्येवमाद्यभिधानम् (अर्थादभियुक्तानाम्) चोदकं=प्रयोजकं येषां वेदवाक्यानांतेषु मन्त्राख्या=मन्त्रनामेत्यर्थः । शेषे ब्राह्मणेति स्पष्टम् । **विप्रपरिव्राजकेति**-यथा ब्राह्मणस्यैव परिव्राजकत्वाधिकारे सत्यपि ब्राह्मणोऽयं परिव्राजक इत्युच्यते लोकैस्तद्वदित्यर्थः । **आरुणकेतुकेति**-'तमग्निमादधीत यस्मिन्नेतत्कर्म प्रयुञ्जीत' इतिश्रुतेः 'तिरोधा भूः तिरोधा भूः'

---

१ कुबेरस्य सम्बन्धी वैश्रवणः कौबेरः, हिरण्यं नाभौ यस्यासौ हिरण्यनाभिः=सर्वाऽऽभरणभूषितः, हिरण्यं दुर्लभं कुर्वन् सर्वप्राणिनो विशेषेण तुदति=व्यथयतीति वितुदिः तथोक्ताय वैश्रवणाय नमः ।

इत्यनेन मन्त्रेणाहिते यस्मिन्नग्नौ 'हिरण्यनाभये वितुदये [1]कौवेरायायं बलिः' इति मन्त्रेण वैश्रवणमुद्दिश्य बलिहरणं 'सर्वभूताधिपतये नमः' इत्यनेनोपस्थानञ्च क्रियते [1]सोऽयमारुणकेतुकनामाऽग्निस्तस्य चयनप्रकरणे इत्यर्थः। **इति मन्त्राः कल्पोऽतः इति**, तैत्तिरीयारण्यके आदित आरभ्य मन्त्रान्निरूपयता तत्र भवता प्रथमप्रपाठकैकत्रिंशदनुवाके 'इति मन्त्राः' इत्युक्त्वा 'कल्पोऽत ऊर्ध्वं यदि बलिं हरेत्' इत्युक्तम् तत्र 'कल्पोऽत ऊर्ध्वं यदि बलिं हरे'-दित्यस्य 'अत ऊर्ध्वं यदि बलिं हरे'-दित्यादिर्ग्रन्थः कल्पः=अनुष्ठानविधायकब्राह्मणरूप इत्यर्थः स्पष्टमन्यत्। **यमगाथाभिरिति**-'योऽस्य कौष्ठ्यजगतः पार्थिवस्यैक इद्वशी यमं भङ्ग्यश्रवो गाययो राजानपरोध्यः' इत्याद्यास्तिस्रो यमगाथास्ताभिरित्यर्थः, यमोद्देशेन हविर्दत्त्वा प्रदक्षिणं परिगायन्त्येताभिर्गाथाभिरृत्विज इत्यवधेयम्। शङ्किते=शङ्कायाम्। कारिकार्थं विवृणोति-इदमाम्नायत इत्यादिना। "अहे, बुध्निय" इति पदद्वयं सम्बोधनान्तम्। योजना=सम्बन्धः। व्यवस्थितं=निर्दुष्टम्। **सावित्र्यचैति**-सवितृदेवताकयेत्यर्थः सा च देवता 'देवो वः सवितेत्यस्यैव मन्त्रस्यास्ति प्राधान्येन सवितुरुपादानादिति यजुर्मध्ये पठितत्वेऽपि ऋक्त्वमेव सम्भवति न यजुष्ट्वमिति भावः। **आश्रयभूता ऋच इति**-साम्नामृङ्मूलत्वादिति तत्त्वम्। वृत्तबद्धाः=पद्यमयाः, 'वृत्तं पद्ये' इत्यमरः। सूत्रे तेषामिति निर्द्धारणे षष्ठी तेन तेषाम्=ऋग्यजुःसाम्नां मध्ये सा ऋक् यत्र अर्थवशेन पादव्यवस्था=चरणनिर्णय इत्यर्थः, अत्र सूत्रे 'अर्थवशेन' इत्यस्य प्रयोजनं तन्त्रवार्त्तिकादवसेयम्। स्पष्टं सूत्रान्तरद्वयम्। उपजीव्य=आश्रित्य। **उपनीतेनेति**-'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इतिश्रुतौ तत्पदस्य पूर्वपरामर्शितया यमुपनयीत तमेवाध्यापयीतेत्यर्थलाभादिति भावः, अत्र यद्वक्तव्यं तदग्रेऽभिधास्यते। **स्वशब्द इति** एतेन अधीयतेऽसावध्यायः स्वस्याध्यायः स्वाध्यायः-स्वशाखीयोवेद इति स्वाध्यायपदार्थ इति सूचितम्। पातात्=पातित्यात्। **अपहतपाप्मेति**-

[1] सोऽयमिति निरुक्तमस्य यथा-'तं वा एतमरुणाः केतवो वातरशनाऋषयोऽचिन्वन् तस्मादारुणकेतुक इति' इति तैत्तिरीयारण्यके।

पापस्पर्शराहित्यात्स्वाध्यायप्रशंसापर इतिहासोऽयं तैत्तिरीयारण्यके श्रूयते तथा हि-'अग्निं वै जातं पाप्मा जग्राह तं देवा आहुतिभिः पाप्मानमपाध्नन्नाहुतीनां यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन ब्राह्मणस्य छन्दोभिश्छन्दसाꣳ स्वाध्यायेनापहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत् तं योऽनुसृजत्यभागो वाचि [१]भवत्यभागो नाके तदेषाभ्युक्ता यस्तित्याज सखि विदꣳ सखायमिति' इति, अयमर्थः अग्निः सृष्ट्यादावुत्पन्नस्तमुत्पन्नमात्रमेव सर्वः पाप्मा जग्राह अग्निर्हि पापिनां पापशोधनाय समुत्पन्नः । अत एव स्मृतिकाराः-'पुनः पाकेन मृण्मय'-मिति भाण्डादीनां पुनःपाकेन शुद्धिं ब्रुवते, यथा लोकेऽत्यन्तमलिनं वस्त्रं यदाऽल्प-जलेन प्रक्षाल्यते तदा वस्त्रमालिन्यं सर्वं जले प्रविशति, तथा शोधनीयवस्तुगतः पाप्मा शोधकेऽग्नौ प्रविष्टस्तमग्निगतं पाप्मानं देवा आहुतिभिर्नाशितवन्तस्तदा-हुतिगतञ्च कृत्स्नं पापं यज्ञेनेत्येवं क्रमेण च्छन्दसां पापं स्वाध्यायेन न चास्य स्वाध्यायगतपाप्मनो निवर्त्तकान्तरमन्वेष्टव्यं तस्मादपहतपाप्मा स्वाध्यायः न खलु कश्चित्पाप्मा स्वाध्यायं स्प्रष्टुमीष्टे यस्मादेतत्स्वाध्यायरूपं देवपवित्रं=देवानामपि शोधकं, देवा हि पूर्वस्मिन् जन्मनि मनुष्या भूत्वा स्वाध्यायमधीत्य तदर्थञ्चा-नुष्ठाय शुद्धाः सन्तो देवत्वं प्राप्ताः, तमीदृशं स्वाध्यायं योऽनुसृजति=यः पुरुषः प्रारभ्य पश्चात्परित्यजति स पुमान् 'अभागोवाचि भवति' वाङ्मात्रनिष्पाद्यत्वे-नाप्रयाससिद्धं स्वाध्यायाध्ययनं तथाविधायां=प्रयासरहितायां महाफलहेतुभूतायां वाच्यपि तस्य=परित्यक्तुर्भाग्यं नास्ति, महाप्रयासनिष्पाद्यज्योतिष्टोमादिसाध्ये स्वर्गे भाग्यं (भागः) नास्तीति किमु वक्तव्यम् ? तदसावनायासप्राप्तचिन्ता-मणिपरित्यागतुल्योऽयं स्वाध्यायपरित्याग इत्यस्मिन्नर्थे काचिदृक् अभ्युक्ता= आम्नाता तामेव ऋचं दर्शयति [२]यस्तित्याजेति—यदीं=यद्यपि, शृणोति= कदाचिद्विद्वत्सभायामुपविश्य बहूनि स्वाध्यायातिरिक्तानि शास्त्राण्या-कर्णयति, अलकम्=अलीकं यद्वा अलं व्यर्थमित्यर्थः, सुकृतस्य पन्थाम्=पुण्यानुष्ठानमार्गम् । 'तस्मात्स्वाध्यायोऽध्येतव्य' इत्यत्र

१ 'वचि वदम्' इति पाठस्तु न युक्तः । २ त्यजेर्णलि तत्याजेति रूपं कृत्वा 'अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याज' इत्यादिसूत्रेण निपातनाद-भ्यासाकारस्येकारः ।

'तस्मात्' पदेन स्वाध्यायाध्ययनस्य नित्यत्वे हेतुः प्रदर्शितः। यस्तित्याजेत्यृचं विवृणोति-**अध्येतारमिति**। **यं यं क्रतुमिति**—यद्यद्यज्ञप्रकरणस्थवेद-वाक्यकलापं योऽधीते, अस्य=तस्याध्येतुस्तेन तेन कृतेन यज्ञेन यदिष्टं फलं तद्भवतीत्यर्थः। एतत्=यं यं क्रतुमिति। **ग्रहणार्थेति**-अक्षरग्रहणार्थेत्यर्थः। **अध्ययनमकृत्वेति**—अध्ययनाकरणरूपं तत्परित्यागं करोतीत्यर्थः। उत्त-रार्द्धर्चं-विवृणोति-**सकलदेवतानामिति**। **नानुध्यायादिति**-बहून् शब्दान्=वेदव्यतिरिक्तनानाशास्त्राणि न अनुध्यायात्=नाधीयीत हि=यतः तत्=नानाशास्त्रानुचिन्तनं वाचो विग्लापनं=विशेषेण ग्लानिकारकं-कण्ठशोष-णमात्रफलकमित्यर्थः, उक्तञ्च पुरुषोपनिषदि-'स्वाध्यायप्रवचने एवेति नाको मौद्गल्यस्तद्धि तपस्तद्धि तपः' इति। सान्वयः=सकुलः, 'सन्ततिर्गोत्रजनन-कुलानि' इत्यमरः। योऽनधीत्येत्येषा मनुस्मृतिः। अध्ययनविध्यर्थम्=अध्ययन-विधानाय। **ज्ञाने सतीति**-अर्थज्ञानानन्तरं हि स्वाध्यायाध्ययनं ममैतावदिष्ट-जनकं तस्मात्तदध्ययनं कार्यमित्यध्ययने कार्यताज्ञानं सम्भवतीति भावः। बाढ़मित्यर्द्धस्वीकारे। गुरुः=प्रभाकरमिश्रो मैथिलः। **महता यत्नेनेति**-'अष्टवर्षं ब्राह्मणमुपनयीत' इत्युपनयनविधिवाक्ये "सम्माननोत्सञ्जनाचार्य-करणज्ञानभृतिविगणनव्ययेषु नियः" इति (१।३।३६) सूत्रेणाचार्यकरणेऽर्थे विधीयमानम् 'उपनयीत' इत्यात्मनेपदं माणवककर्तृकाध्ययनमन्तरेणासङ्गतं यतो न केवलं माणवकोपनयनेनोपनेतुराचार्यत्वं सम्भवत्यपितूपनयनपूर्वकेणा-ध्यापनेन 'उपनीय दद्वेदमाचार्यः स उदाहृत'-इति स्मृतेस्तथा च यथा स्वस्मिन्नाचार्यत्वं-सम्भवेत्तथाऽनेन यतितव्यमिति भवत्याचार्यकर्तृकाध्यापनेन माणवकस्याध्ययने प्रवृत्तिः, अत एव 'तमध्यापयीत' इत्यत्र णिचश्चेतिकर्तृ-गामिनि क्रियाफले 'अध्यापयीत' इत्यात्मनेपदसङ्गतिरन्यथा फलस्याध्यापन-कर्तृगामित्वाभावेन तदसम्भवादिति भावः। **पित्रादिभ्य इति**—मिथि-लादौ देशेऽद्यापि पञ्चवर्षाधिकवयस्कान् स्वस्वबालकान् क्रोडे कृत्वा सायंप्रात-र्लालयन्तो मिष्टान्नादिप्रदानव्याजेन द्विजा निजायां भाषायामावश्यकं वेदरह-स्यमितिकर्त्तव्यताञ्च शिक्षयन्तीत्यस्ति सम्प्रदायः। पुरुषार्थानुशासने=एतन्नामके

मीमांसाग्रन्थे[1]। **विहितत्वादिति**—'स्वाध्यायोऽध्येतव्य'–इत्यनेन वाक्येनेति बोध्यम्। **घृतकुल्येति**–कूलं=तीरमर्हन्तीति कूल्या महानद्यः, घृतस्य कूल्या घृतकूल्या इत्यर्थः, क्वचित् कुल्येति ह्रस्वः पाठस्तत्र कुल्या=अल्पा कृत्रिमा सरित्। **ब्रह्मयज्ञेति**–ब्रह्मणो=वेदस्य यज्ञः=पाठः-ब्रह्मयज्ञः-'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते' इत्याम्नातलक्षणः, स्पष्टोऽयं 'यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स चोच्यते। स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः' इत्यादिना कर्मप्रदीपे। जपः=विधानेन मन्त्रोच्चारणम्, ह्रदुच्चार्यमाणे वचसीति कविकल्पद्रुमः, तथा च-'मनः संहृत्य विषयान्मन्त्रार्थगतमानसः। न द्रुतं न विलम्बञ्च जपेन्मौक्तिकपङ्क्तिवत्' इति वह्निपुराणे। **नित्याध्ययनेऽतिदिश्येति**–अध्ययनत्वाविशेषादिति भावः। तत्रत्यं=तत्र=ब्रह्मयज्ञाध्ययने भवम्। **घृतकुल्यादिकमिति**–अयमाशयः—'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते' इति ब्रह्मयज्ञस्वरूपमभिधाय तैत्तिरीयारण्यके—'यदृचोऽधीते पयसः कूल्या अस्य पितॄन् स्वधा अभिवहन्ति यद्यजूंꣳषि घृतस्य कूल्याः, यत्—सामानि सोम एभ्यः पवते, यदथर्वाङ्गिरसो मधोः कूल्या, यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराꣳशंसीर्मेदसः कूल्या अस्य पितॄन् स्वधा अभिवहन्ति यदृचोऽधीते पय आहुतिभिरेव तद्देवाँस्तर्पयति यद्यजूंꣳषि घृताहुतिभिर्यत्सामानि सोमाहुतिभिर्यदथर्वाङ्गिरसो मध्वाहुतिभिर्यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराꣳशंसीर्मेद आहुतिभिरेव तद्देवाꣳस्तर्पयति त एनं तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति' इत्युक्तं तत्राम्नातघृतकुल्यादिफलेनैव नित्यस्य 'स्वाध्यायोऽध्येतव्य' इति श्रुतिप्रतिपाद्यस्वाध्यायाध्ययनस्यापि फलवत्त्वं स्यादध्ययनत्वाविशेषात्, तच्च घृतकुल्यादिरूपं फलं पितृलोकानामदृष्टमित्यदृष्टार्थोऽधीतिरिति। दृष्टान्तमाह-**रात्रिसत्रन्यायेनेति**–यत्र विधिवाक्ये फलं न श्रूयते तत्रार्थवादोक्तं फलमतिदिश्यत इत्यर्थवादातिदेशः अयमेव रात्रिसत्रन्यायस्य विषयः, तदुक्तं जैमिनी-

1 अयं ग्रन्थोऽद्यत्वे नोपलभ्यते।

यन्यायमालायां श्रीमाधवाचार्यैः 'सत्रकाण्डे प्रत्येकं श्रूयते "प्रति तिष्ठन्ति ह वा य एता रात्रीरुपयन्ति" इति "ब्रह्मवर्चस्विनोऽन्नादा भवन्ति य एता उपयन्ति" इति च, द्वादशाहादूर्ध्वं भाविनस्त्रयोदशरात्रचतुर्दशरात्रादयः सर्वे रात्रिसत्रविशेषास्तादृशे रात्रिसत्रे विश्वजिन्न्यायेन स्वर्गः फलत्वेन कल्पनीय इति प्राप्ते ब्रूमः-अस्य रात्रिसत्रविधेः स्तावके 'प्रतितिष्ठन्ति' इत्यत्र प्रतिष्ठा श्रुता सा चास्मिन् वाक्येऽत्यन्तमश्रुतात्स्वर्गात्प्रत्यासन्ना तस्मात् 'प्रतिष्ठाकामो रात्रिसत्रं कुर्यात्' इत्येवं प्रतिष्ठैव फलत्वेन कल्पनीयेति, अत्र संग्राहकश्लोकः—

"स्वर्गाय वा प्रतिष्ठायै रात्रिसत्रमिहादिमः ।
पूर्वं वा स्यात्प्रतिष्ठा च श्रुता तेनाश्रुताद्वरम्" इति ।

एतच्च प्रपञ्चितं 'क्रतौ फलार्थवादमङ्गवत्कार्ष्णाजिनिः' इति (४।३।८) जैमिनिसूत्रे शास्त्रदीपिकायां पार्थसारथिमिश्रैर्मैथिलैरिति तत एवावधार्यम् । तुष्यतु दुर्जनन्यायेनाह—येऽर्थवा—अर्थवादातिदेशम्=अर्थवादवाक्यगतफलातिदेशम् । नेच्छन्ति—अर्थात्पूर्वपक्षिण इति । विश्वजिन्न्यायेनेति—यत्रार्थवादवाक्येऽपि फलं न श्रूयते तत्र स्वर्गः कल्प्यते अयमेव विश्वजिन्न्यायः यथा—'विश्वजिता यजेत' इति विधिवाक्ये 'विश्वजित्' पदस्य यागनामधेयत्वेन 'यजेत' इति यजधात्वर्थेन यागेन सहाभेदान्वयात्तदुत्तरतृतीयां धात्वर्थाग्रेसन्निवेश्य लिङंशस्य भावनावाचकतया 'विश्वजिन्नामकयागेन भावयेत्' इत्यर्थः क्रियते तत्र भावयेदित्यस्य कुर्यादित्यर्थः एवञ्च विश्वजिन्नामकयागेन किं कुर्यादिति भाव्याकाङ्क्षां पूरयितुं किञ्चित्फलमवश्यं कल्पनीयं, तदन्तरेण यागानुष्ठाने पुरुषप्रवृत्त्यसम्भवाच्च, न चाऽऽर्थवादिकफलातिदेशेन नैराकाङ्क्ष्यं तस्याभावात्, तच्च फलमेकमेव कल्प्यते न तु पशुपुत्रवीर्येन्द्रियाद्यनेकम् एकेनैव निराकाङ्क्षत्वात्, तदपि स्वर्गरूपमेव तस्य पश्वादिफलवद्दुःखमिश्रितत्वाभावान्निरतिशयसुखरूपत्वात्सर्वपुरुषाणामभीष्टत्वाच्चेति, उक्तञ्च

"विनापि विधिना दृष्टलाभान्न हि तदर्थता ।
कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत्" इति ।

प्रपञ्चितञ्चैतत्—"नैवास्ति विश्वजिद्यागे फलमस्त्युत ? नाश्रुतेः।
भाव्यापेक्षाद्विधेः कल्प्यं फलं पुंसः प्रवृत्तये ॥
सर्वं फलमुतैकं स्यात्सर्वमस्त्वविशेषतः।
एकेन तन्निराकाङ्क्षमतोऽनेकं न कल्प्यते ॥
एकं यत्किञ्चिदथ वा नियतं? न नियामकम्।
तस्मादाद्यः सर्वपुंसामिष्टत्वात्स्वर्ग एव तत् ॥

इत्यादिना ४ अ० ३ पा० ५, ६, ७ अधिकरणस्थ-शबरभाष्य-तन्त्रवार्त्तिक-शास्त्रदीपिका-न्यायमालास्विति तत्रैव कणेहत्यावलोकनीयम्। **संस्कारप्राप्त्योरिति**—संस्कारोऽध्ययनजन्यः स्वाध्यायगतः, प्राप्तिरध्ययनेन स्वाध्यायाक्षराणाम्। **क्वचित्कृताविति**—'अध्ययनेन स्वाध्याये संस्कारमाधाय तेन संस्कृतेन स्वाध्यायेन यज्ञोऽनुष्ठेय' इत्येवं वेदाज्ञारूपस्य विनियोगस्यादर्शनादिति भावः। **स्वयमिति**—अस्य 'अर्थज्ञानद्वारा पुरुषार्थत्वेऽपि' इत्यादिः। प्रमितिः=ज्ञानम्। **मन्त्रवदिति**—लौकिकमन्त्रवदित्यर्थः। **न स्वार्थे प्रामाण्यमिति**—एवञ्चार्थप्रमितेरेवाभावात्तद्द्वाराऽक्षरप्राप्तेः पुरुषार्थता गगनकुसुमायमानेत्यभिमानः। ननु तर्ह्यध्ययनाङ्गतया 'स्वाध्यायोऽध्येतव्य'—इत्यस्याप्यानर्थक्यात्स्वाध्यायाध्ययनं कर्त्तव्यमित्यपि कुतो लब्धमिति चेत्तत्राऽऽह—**अध्ययनविधायकमिति**। **विरुध्यत इति**—अध्येतव्य इत्यत्र धातोः सकर्मकत्वात्कर्मणि तव्यः प्रत्ययः कार्यः किन्तु भवन्मते न तत्सम्भवः, कर्मणोऽभावात्, न हि स्वाध्यायरूपं कर्मेति युक्तं वक्तुं तस्य फलाश्रयत्वाभावात् फलाश्रयस्यैव च कर्मत्वात्, मम मते तु संस्काररूपफलाश्रयत्वेन स्वाध्यायस्य कर्मता नायुक्तेति भावः। **कर्मकारकत्वेनेति**—यथा श्रुतकर्मकारकत्वेनेत्यर्थः। **प्रधानभूतानिति**-प्राधान्यञ्च होमसंस्काररूपफलाश्रयत्वेनेति बोध्यम्। **विनियोगाभावादिति**—अयं भावः—'सक्तून् जुहोति' इत्यस्य 'दध्ना जुहोति' इत्यादिवाक्यवद्विनियोगवाक्यत्वेन विधिवाक्यगतं हवनं 'जुहोति' इत्यनेनानूद्य सक्तुनिष्ठं करणत्वमेव वाक्येनानेन विधानीयं तच्च यथाश्रुतत्वे न सम्भवति तथा सति 'काष्ठं दहति' इत्यादौ काष्ठादेरिव सक्तूनां पृथगेव भस्मीभावा-

त्कर्मान्तरे करणत्वेन विनियोगासम्भवादिति तृतीयार्थे द्वितीया क्रियत इति । **कृत इति**- पूर्वमीमांसायामिति शेषः । कर्मगतयोः=स्वाध्यायनिष्ठयोः । **दृष्ट-फले सतीति**-तदुक्तं मीमांसकैः—

"लभ्यमाने फले दृष्टे नादृष्टफल-(परि)-कल्पना ।
विधेस्तु नियमार्थत्वान्नानर्थक्यं भविष्यति ॥"

इति । **दृष्टे त्विति**—अत्र 'तु' शब्दः पूर्वपक्षनिराकरणाय । **अवघाता-दिवदिति**—यथा दर्शपूर्णमासीयपुरोडाशनिर्माणप्रकरणे —'व्रीहीनवहन्ति' 'तण्डुलान् पिनष्टि' 'पुरोडाशं श्रपयति' इत्यत्र क्रयक्रयण-नखनिर्लुञ्चनादि-नापि तण्डुलनिष्पत्तिसम्भवे 'व्रीहीनवहन्ति' इति वाक्यं व्यर्थं सत्— 'अवघातनिष्पन्नैरेव तण्डुलैरवान्तरापूर्वद्वारा दर्शपूर्णमासौ परमापूर्वं जनयतो नान्यथा' इति नियामयति तथेहापि 'स्वाध्यायोऽध्येतव्यः' इति वाक्येन सामर्थ्यात् 'अध्ययनसंस्कृतेनैव स्वाध्यायेन सम्पादिताः क्रतवोऽवान्तराऽ-पूर्वद्वारा स्वर्गादिपरमापूर्वं जनयन्ति नान्यथा' इति नियम्यते तेन यददृष्ट-मर्थादवान्तरापूर्वं तदर्थं विध्युपपत्तेरिति भावः । सूत्रे क्रत्वध्ययनविधीत्यत्र 'विधि' पदस्य द्वन्द्वान्ते श्रूयमाणत्वात्क्रत्वध्ययनपदयोरुभयोरन्वयः । विष-यावबोधं = यस्य यस्य क्रतोर्यावन्तो विषयाः = स्थालीपाक-ध्रुवोपभृज्जुहू-प्रभृतयस्तेषां ज्ञानम् । **लिखितपाठादीति**—अस्य 'पूर्वोक्तनियमेन' इत्यादिः । **उभयोपादानादिति**—अयमत्रसारः —क्रतूपकरणद्रव्यदेवतामन्त्रादिज्ञानमन्त-रेणानुष्ठानासम्भवात् क्रत्वनुष्ठापकवाक्यानि तत्तद्द्रव्यदेवतादीनपेक्षमाणा-न्यनुष्ठानोपयोगिद्रव्यादिविज्ञानहेतुभूतसंस्कृतस्वाध्यायाध्ययनमपेक्षन्ते स्वाध्याये संस्कारश्च 'स्वाध्यायोऽध्येतव्य'-इत्यनेन सम्पाद्यत इति भवति क्रतुविधीनां परम्परया संस्कृतस्वाध्यायापेक्षेति । **अध्ययनोपरक्ताया इति**—अयमाशयः-तव्यप्रत्ययेनाध्ययनजन्यः संस्कारो बोध्यते स चैकपदश्रुत्याऽध्ययनगत एव स्वीकर्त्तुमुचितः । विभिन्नपदबोध्यस्वाध्यायरूपं कर्मापेक्ष्याध्ययनस्य 'अध्येतव्य' इत्येकपदबोध्यतया प्रत्यासन्नत्वात्संस्कारस्याध्ययनजन्यत्वाच्चेति । **कर्मग-तेति**-कर्म=स्वाध्यायरूपं तद्गतं यददृष्टं संस्कारस्वरूपं तद्वाचीत्यर्थः । **तदुपर-**

कत्वानियमादिति-यथा पितृजन्याऽपि कन्या तमपहायान्यमेवोपरञ्जयति तद्वदिति भावः । **स्वतन्त्रेति**-विषनिर्हरणादिक्रियायां स्वातन्त्र्येण विनियुक्त-मन्त्राणामिव यदि ज्योतिष्टोमादिवाक्यानामपि स्वत एव संस्काररूपादृष्टाङ्गताऽ-कल्पयिष्यत तदैवानर्थक्यमापत्स्यत न च तथा 'संस्कारसिद्धिः क्रत्वध्ययनवि-धिद्वयोपादानात्' इति सूत्रेण तेषामध्ययनविधिपरम्परयाऽदृष्टशेषत्वस्य प्रद-र्शितत्वादिति सारः । उपबृंहकं=पोषकम् । स्वतन्त्रादृष्टाशेषत्वात्=स्वातन्त्र्येणा-दृष्टाङ्गत्वाभावात् । **अर्थावबोधपर्यन्ततां निराकर्त्तुमिति**-अक्षरग्रहणमे-वाध्ययनफलं न त्वर्थावबोध इति सिद्धान्तयितुमित्यर्थः । भट्टः=कुमारिलस्वामी । गुरुः=तच्छिष्यः प्रभाकरो मैथिलः । सूत्रे 'भट्टगुरू' इत्यत्र 'मन्येते' इतिशेषः । **फलवदिति**-कर्मानुष्ठानादिरूपं यत्फलं तत्फलवान् योऽर्थनिश्चयस्तमित्यर्थः, न हि वेदार्थनिश्चयमन्तरेण कर्मानुष्ठानं सम्भवतीति भवति कर्मानुष्ठानमर्थ-निश्चयस्य फलम् । विचारम्=मीमांसाम् । तदुपकारी=स्वविधेयोपकारी । अता-दृशं=स्वाविधेयं स्वविधेयस्याध्ययनस्यानुपकारिणं वाऽर्थाद्विचारम् । **अधात्व-र्थत्वादिति**-य एव धात्वर्थः स एव विधीयमानो दृष्टः सर्वत्र यथा 'स्वर्ग-कामो यजेत' इत्यत्र यागः, 'स्वाध्यायोऽध्येतव्य' इत्यत्राध्ययनमेवम् 'अवहन्ति' इत्यत्राप्यवघातमात्रं धात्वर्थत्वादस्ति विधेयं न तु तदावृत्तिरिति भावः । प्रकृते-ऽपि=स्वाध्यायोऽध्येतव्य' इत्यत्रापि । **अपेक्षित एवेत्यत्र**-'तम्प्रत्यपि' इत्यादिः । तद्भावे=अर्थज्ञानसद्भावे । **अर्थविरोधेति**-'अक्ताः [1]शर्करा उपदधाती'त्यादौ [2]केनाक्ता इत्याकाङ्क्षायां तद्वाक्यशेषे 'आयुर्वै घृतं' 'तेजो वै घृतम्' इत्युपात्तत्वात् प्रकरणात् 'घृतेनैव न तैलादिना' इत्येवंविधो निर्णयो विचारमन्तरेण दुष्कर इति भावः । स्पष्टमेतत् 'सन्दिग्धेषु वाक्यशेषात्' इति (१ अ० ४ पा० १६ अ०) जैमिनिसूत्रभाष्ये । अकात्स्न्र्यम्=असाकल्यम् । बृहस्पतिसवादौ='वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत' इत्यादिवाक्यविहिते । सवो=यागः । **प्रवृत्त्यादि फलाभावादिति**-प्रवृत्तिम्प्रतीष्टफलसाधनता-ज्ञानस्य कारणत्वात् राजसूयादौ च ब्राह्मणवैश्ययोरधिकारस्यैवाभावेन तदीष्ट-

---

[1] मृत्तिकामिश्रिताः क्षुद्रपाषाणाः शर्कराः । [2] लिप्ताः ।

साधनताया दूरापेतत्वात्; यतो 'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यत्र राजपदं क्षत्रियजातौ रूढ़मिति। एतच्च 'अवेष्टौ यज्ञसंयोगात्क्रतु प्राधान्यमुच्यते' इति (२ अ० ३ पा० २ अ०) जैमिनिसूत्रस्थ-शास्त्रदीपिका-शबरभाष्यादिषु स्पष्टम्। अबोधकत्वे=अर्थज्ञानार्थत्वाभावे। **लौकिकाप्तेति**—एतेन 'प्रमाणभूतः स्वाध्यायोऽर्थावबोधकः आप्तवाक्यत्वात् लौकिकाप्तवाक्यवत्' इत्यनुमानं दर्शितं भवति। **सूत्रे नैजो बोध इति**—'निज' इति समीचीनः पाठः। **बोधस्य काम्यत्वं दूषयतीति**—'बोधकाममुद्दिश्य विधातुं शक्यत्वात्सुलभोऽधिकारी' इति यदुक्तं तत्र बोधस्य कामनाविषयत्वं न सम्भवतीति त्वत्पक्ष एवाधिकारी दुर्लभ इत्यभिप्रेत्य सूत्रमवतारयतीत्यर्थः। सूत्रे 'प्राक्' इत्यतः प्राक् अध्ययनादित्यस्य शेषो बोध्यस्तेन 'अध्ययनात्प्राग्बोधस्य भानेऽभाने च' इत्यर्थः। **औपदेशिकेति**-पित्राद्युपदिष्टेत्यर्थः। उद्देशायोगात्=उद्देशस्यायुक्तेः। **उपक्रमादीति**—उपक्रमोपसंहारादिरूपं यल्लिङ्गं=हेतुस्तद्गम्यमित्यर्थः। पुरुषसम्बन्धकृतो दोषः=प्रमादालस्यादिः। विचारशास्त्रं=मीमांसाशास्त्रम्, सूत्रे विचारपदं पूर्वमीमांसा-शास्त्रपरम्, उत्तरमीमांसायाः श्रवणविधिप्रयुक्तत्वस्यानुपदमेव वक्ष्यमाणत्वात्। आपातप्रतिपन्नाः=श्रुतमात्रेण ज्ञानविषयीकृताः। प्रतिष्ठितं=युक्तियुक्तम्। श्रवणविधिः='आत्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्येवंरूपः। **साक्षादिति**—मन्तव्य इति पदेनेति बोध्यम्। निष्कर्षमाह—**एवञ्चेति**। **स्वविधेयेति**—स्वेन=श्रवणविधिना विधेयम्= आत्ममननं (ब्रह्मविचारः) तत्प्रयोजकत्वमित्यर्थः। **विधेयोपकारीति**—क्रतुविधीनां विधेयं=कर्मानुष्ठानं तदुपकारी विचारस्तत्प्रयोजकत्वमित्यर्थः। **उपपद्यततरामिति**—विचारशास्त्रप्रवृत्तिरिति शेषः। अध्ययनविधिप्रयुक्तिपक्षे=अध्ययनविधिप्रयुक्तो विचार इति भवत्सम्मतपक्षे। तद्विधेः=अध्ययनविधेः। **क्रतुद्वारेति**—अध्ययनविधिप्रयुक्तो विचारस्तेनार्थनिर्णयस्ततः क्रतुस्तेन स्वर्गसिद्धिरित्येवंप्रणालिकया स्वर्गसिद्धिपर्यन्तत्वमध्ययनविधेरवधेयम्। तत्प्रयुक्तौ=अध्ययनविधिप्रयुक्तौ सत्याम्। **वैयर्थ्यमिति**—भवताऽवघाताऽऽवृत्तिवद्विचारमाक्षिप्य प्रतिष्ठितोऽर्थनिर्णयोऽध्ययनविधिफलं स्वीक्रियते

अर्थनिर्णयश्च क्रत्वनुष्ठानरूपफलत्वान् क्रत्वनुष्ठानञ्च स्वर्गरूपफलवदिति स्वर्गरूपफलवत्क्रत्वनुष्ठानफलकार्थनिर्णयफलवानध्ययनविधिरन्यानपेक्षतयैव पारम्पर्येण स्वर्गपर्यन्तसाधकमिति भवति क्रतुविधीनां वैयर्थ्यं, विचारस्य क्रतुविधिप्रयुक्तत्वपक्षे तु न तथा,—स्वर्गरूपफलकक्रत्वनुष्ठानफलवदर्थनिर्णयस्य विचारापेक्षत्वाद्विचारस्य च क्रतुविधिप्रयुक्तत्वादिति भावः। तत्=नित्यत्वम्। एतच्चास्मत्पक्षेऽप्यविरुद्धमिति सिसाधयिषन् निग्रहीतुं वादिनं पृच्छति—**क्रतुविचारस्येति**। **अनुषङ्ग इति**—अत्र 'अनुषज्यते' इति पाठो युक्त इति मे प्रतिभाति। ननु 'ब्राह्मणेन निष्कारणो धर्म' इति वाक्यं न विधायकं भवितुमर्हति तथा सति 'ज्ञेय' इत्यंशेनार्थज्ञानविधानवत् 'अध्येय' इत्यंशेनाध्ययनविधानस्याप्येतद्वाक्यत एव सम्भवे 'स्वाध्यायोऽध्येतव्य' इत्यध्ययनविधेरानर्थक्यापत्तेः, किन्तु अध्ययनं ज्ञानञ्चोद्दिश्य वाक्येनानेन 'निष्कारणो धर्म' इति वचनभङ्गया तयोः काम्यत्वं वार्यत इत्येव युक्तमेवञ्चार्थज्ञानस्याविहितत्वं तदवस्थमेवेति चेदत आह—**अर्थज्ञाने पुरुषप्रवृत्तिकरमिति**। **यद्गृहीतमिति**—यदधीतमिति पाठः पातञ्जले महाभाष्ये दृश्यते। **ऐहिकेति**—ऐहिकामुष्मिकञ्चेति पाठस्त्वज्ञानविजृम्भितः। आमुष्मिकम्=पारलौकिकम्। **तदेषेति**—तस्मिन् वेदविदो माहात्म्ये एषा काचिदभ्युक्ता तामेवाह—**ये अर्वाङिति**—अर्वाङ्=अर्वाचम्—इदानीन्तनमस्मद्यथेतृरूपं मनुष्यम्, उत वा=अथ वा, पुराणे=पुरातनं, वेदं विद्वांसं=पाठादर्थाच्च वेदतत्त्वाभिज्ञम्, ये=मूर्खाः, अभितः=तत्र तत्र, वदन्ति=निन्दन्ति। ब्राह्मणं दर्शयति **यावतीर्वै इति**। **विद्वानिति**—वेत्तेः शतुर्वसुरादेशस्तेन लादेशयोगे 'न लोका' इति षष्ठीनिषेधाद्वेदमित्यत्र द्वितीया। वेदं विद्वानित्यस्यार्थमाहार्थाभिज्ञः पुरुष इति।

चतुर्दशेति—"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥"

इत्युक्तलक्षणाश्चतुर्दशविद्यास्तासां स्थानं=स्थितिस्ता एव वा स्थानं तासु वा आस्थानं=यत्नस्तत्र कुशलश्चतुर्दशविद्यापारङ्गम इत्यर्थः। वस्तुतस्तु विद्यानां

स्थानानि विद्यास्थानानि, चतुर्दश च तानि विद्यास्थानानि, चतुर्दश विद्यास्थानानि तेषु कुशलस्तदभिज्ञ इत्यर्थो बोध्यः 'स्थानानि विद्याना'—मित्युपर्युक्तयाज्ञवल्क्यवचनानुरोधात् । पण्डितम्मन्याः=आत्मानं पण्डितम्मन्यन्ते इत्येवं भूता न तु वस्तुतः पण्डिताः । अभित इत्यस्यार्थमाह **विद्यादिष्विति । अग्नेर्वायोरिति,** 'यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति' इति सम्पूर्णं वाक्यम् । नाश्लीलं कीर्त्तयेदित्यस्यार्थमाह न तु तस्मिन् विद्यमानमपीति । **तत्तन्मन्त्रार्थेति** । 'तत्र मन्त्रार्थभूता' इति त्वपपाठः । तदीयहृदये=मन्त्रार्थविच्चेतसि । **इत्याम्नायेतेति**—अध्ययनफलत्वे हि अधीयानप्रशंसनमेवोचितं न तु विदुष इति भावः । न चैतावता प्रशंसामात्रमर्थज्ञानस्य न तु विधिरिति भ्रमितव्यं 'यच्च स्तूयते तद्विधीयते' इति न्यायस्यानुपदमेव वक्ष्यमाणत्वात् । स्थाणुरयमिति यद्गृहीतमित्यनग्नावित्यर्द्धत्रयेणोक्तां निन्दामाह—**यस्त्विति** । व्रात्यत्वं=संस्कारहीनत्वम्, 'व्रात्यः संस्कारहीनः स्यात्' इत्यमरः,

"अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः ।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः ॥"

इतियाज्ञवल्क्यश्च । गृहीतम्=अधीतम् । मुख्यवेदत्वाभावे हेतुमाह—**अलौकिकं पुरुषार्थोपायमिति** । स एव=यास्क एव । अव्युत्पन्नः=अर्थज्ञानशून्यः । **निश्चिनुयादिति**-पूर्वत्र 'स' इति कर्त्तृपदमेकवचनान्तमस्त्यतो 'गमयति' इति पाठः, आदित्यानेवेत्यत्र 'ते' इति बहुवचनान्तं कर्त्तृपदमतो 'गमयन्ति' इति पाठ इत्येवं निश्चयमर्थज्ञानशून्यः कथं कुर्यादिति भावः । **अन्य इति**—अस्यैवार्थमाह—**कश्चिदिति** । मीमांसाराहित्यात्=विचारशून्यत्वात् । दृष्टान्तमाह—**यावतोऽश्वानिति । प्रतीयत इति**—व्याकरणतः प्रतिपूर्वकस्य ग्रहधातोरादानार्थकत्वात् । मीमांसायां=मीमांसा-(विचार)-शास्त्रे । **निर्णीतमिति**—"प्रजापतिर्वरुणायाश्वम[१]नयत् स [२]स्वां देवतामा[३]र्च्छत् स पर्यदीर्यत स एवैतं वारुणं चतुष्कपालमपश्यत्तं निरवपत् ततो वै स वरुणपाशा-

१ दत्तवान् । २ स्वकीयां=जलोदररोगप्रदाम् । ३ प्राप्तवान् ।

दमुच्यत तस्माद्यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणाँश्चतुष्कपालान्निर्व[1]पेत्" इति श्रुतौ 'प्रजापतिर्वरुणाय' इत्यनेन चतुर्थीश्रुत्या वरुणोद्देश्यकप्रजापति-कर्तृकाश्वदानं प्रतीयते, तदग्रे 'स स्वां' 'स पर्यदीर्यत' 'स एवैनं' 'ततो वै स' इत्यादिषु श्रूयमाणेन प्रथमान्तसर्वनामतच्छब्देन सामानाधिकरण्यानुरोधात्प्र-जापतिरेव गृह्यते तथा च प्रजापतिर्वरुणायाश्वं दत्त्वा जलोदरव्याधिग्रस्त-स्तद्व्याधिनाशोपायं चिन्तयन् वरुणदेवताकं चतुष्कपालं ध्यानेन दृष्ट्वा विधि-पूर्वकमिष्ट्वा तस्माद्व्याधेर्विमुक्तो बभूव अतो योऽश्वं प्रतिगृह्णाति=ददाति तं प्रजापतिमिव वरुणः=जलोदरव्याधिः गृह्णाति=ग्रसति तस्मात् यावतः=याव-त्संख्याकान् अश्वान् प्रतिगृह्णीयात्=दद्यात् तावतः=तावत्संख्याकान् वारुणाँश्चतु-ष्कपालान्निर्वपेदिति रीत्या 'अचोदितञ्च कर्मभेदात्' सा लिङ्गादार्त्विजे स्यात्' इति (३।४।३०) जैमिनिसूत्रयोः शबरभाष्ये निर्णीतमिति बोध्यम् । **दर्शय-तीति**–स एव यास्क इत्यर्थः । **ज्ञानं प्रकाशनमित्यादि**-ज्ञानम् अर्थस्य= वेदार्थस्य प्रकाशनं=प्रकाशकमनया वाचा मन्त्र आहेत्यन्वयः । **स्वमित्या-दिकमिति**-अर्थादुपर्युक्ते यास्कग्रन्थे, एवमग्रेऽपि बोध्यम् । 'ज्ञानं प्रकाशनम-र्थस्ये'-ति पूर्वोक्तस्य यास्कग्रन्थस्यार्थमाह—**वेदार्थप्रकाशनक्षममिति**। **मन्त्रस्येति**-मन्त्रसम्बन्धिन इत्यर्थः। भूयसे=प्रचुरतमाय । एतदेवाह **तमर्थ-मिति** । **पीतामृतमिति**-निरुक्तवृत्तौ श्रीदुर्गाचार्यस्तु 'सख्ये' इत्यस्य 'देवतासायुज्ये' 'देवलोके वा' इति, स्थिरपीतमित्यस्य 'स्थिरम्=अप्रच्य-वनधर्माणं, पीतं=ज्ञातार्थम्' इत्यर्थमाह । **अनुष्ठानद्वारेति**-अनुष्ठानं=यागा-द्यनुष्ठानं द्वारं=कारणं यस्य तादृशं यत् फलं तदात्मकं=तद्रूपं यत् ब्रह्मणः= आत्मनो ज्ञानं तस्येच्छामित्यर्थः । कृतयज्ञानुष्ठानस्य पुरुषस्य हि मनो निर्मलं

---

१ प्रायश्चित्तमेतत् तच्च न सार्वत्रिकं किन्तु वैदिककर्ममात्रविषयकं तथा चोक्तं मीमांसकैः–'न केसरिणो ददाति' इति स्मृत्या निषिद्धमपि मित्रदा-यादिभ्योऽश्वदानं यदि क्रियते तदा 'यावतोऽश्वानि'–ति प्रायश्चित्तमिति चेन्न, 'वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति' इत्यश्वदाने जलोदर-व्याधिश्रवणाद्वैदिकदान एव तत्प्रायश्चित्तमिति ।

भवति ततो ब्रह्मसाक्षात्कारे सौकर्यं जायत इति भवति क्रत्वनुष्ठानस्य ब्रह्मज्ञानरूपफलहेतुत्वमिति भावः। क्षीरस्य दोग्ध्री=दुग्धदानशीला। उपसंहरति- **इत्थमिति। अज्ञाननिन्देति—**

"न वेदपाठमात्रेण सन्तोषं कारयेद्गुरुः।
पाठमात्रावसानस्तु पङ्के गौरिव सीदति॥
योऽधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत्।
स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते॥
वेदस्याध्ययनं कार्यं धर्मशास्त्रस्य चापि यत्।
अजानताऽर्थं तत्सर्वं तुषाणां कण्डनं यथा॥"

इत्याद्यप्यवगन्तव्यम्। **याग-तद्वेदनयोरिति**-तद्वेदनं यागीयद्रव्यदेवतामन्त्रादिपरिज्ञानम्। **यथा ह वा इति**-यथैव देवानामग्निरन्नादः=हविष्प्रदानशीलस्तद्द्वारैव तेषां हविष्प्राप्ते-रेवं मनुष्याणां यागकर्त्ता तद्विधिज्ञो वा भवति अन्नोत्पत्तौ वृष्टेस्ताम्प्रति च यज्ञस्य कारणत्वादित्यर्थः। **विद्यमानेनैवेति**-'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र श्रूयमाणेनैवेत्यर्थः। **इच्छाम्येवेति**-अन्यपरत्वतः=विधिवाक्यविहितकर्मणि यथाकथञ्चित्पुरुषान्प्रवर्त्तयितुमुद्यतत्वात् हेतोः वचसः=ज्ञानप्रशंसादिबोधकवाक्यस्य अर्थवादत्वं=स्तावकत्वमहमपीच्छाम्येव तु=किन्तु यथावस्त्वभिधायित्वात्=यथार्थफलप्रतिपादकत्वाद्धेतोः यथा-'सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्येते' इत्यस्य अभूतार्थवादता=असत्यार्थवादता नास्ति तथा'ऽस्यापी'ति शेषः। न तु=न पुनः यथा 'यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति' इति श्रुतेरसत्यार्थ[1]वादत्वं तथा प्रकृतेऽपीत्यर्थः। **पापश्लोकेति**-'यस्य पर्णमयी'-त्युक्तस्वरूपा। उपलक्षणमेतत्-'यदाङ्क्ते चक्षुरेव भ्रातृ[2]व्यस्य वृङ्क्ते' 'यत्प्रया-

१ पापश्लोकश्रवणाभावस्य केनाप्य-(वाक्येना)-विहितत्वात्, न च शृणोती'-त्यनेनैव विधीयत इति वाच्यं तस्य वर्त्तमानार्थकलडन्तत्वेन विध्यर्थत्वाभावात्। २ भ्रातृव्यः=शत्रुः, 'व्यन् सपत्ने' इति व्यन् प्रत्ययः। 'भ्रातृव्यस्य चक्षुरेव (कर्म) वृङ्क्ते' इत्यन्वयः।

जानुयाजा इज्यन्ते '[1]वर्म वा एतद्यज्ञस्य क्रियते' इत्यादीनामपि। **विद्यासहित इति**-विद्या=ज्ञानम्। **यश्चैतदिति**-एतत्=अनुष्ठानम्। विद्यया=ज्ञानेन। उपास्तिः=उपासना। **समान इति**-तेन प्रकृते वेदज्ञानेऽपि तत्सङ्गतिरिति भावः। समन्वारभेते=समनुगच्छतः। **पूर्वोत्तरकाण्डयोरिति**-पूर्वकाण्डं=कर्मकाण्डम्, उत्तरकाण्डं=ज्ञानकाण्डम्। 'वेदैकवेद्ये' इत्यत्र एकपदेन धर्मब्रह्मणोरनन्यलभ्यत्वं दर्शितम्। द्वितीयसूत्रे='चोदना[2] लक्षणोऽर्थो धर्म' इत्येवंरूपे। चोदना=वेदः। उपपादयितुं=चोदनैव धर्मे प्रमाणं न प्रत्यक्षादिकमिति साधयितुम्। कथं विद्यमानोपलम्भनत्वमित्याह **अनुष्ठानादूर्ध्वमिति**-यतः अनुष्ठानादूर्ध्वम्=अनन्तरं धर्म उत्पत्स्यमानस्तस्मात्ततः पूर्वमसाववविद्यमानः, उत्तरकाले (अनुष्ठानानन्तरं) विद्यमानत्वेऽपि रूपाद्यभावादिन्द्रियै (श्चक्षुरादिभि) र्नावगम्यत इत्यर्थः, न च मा भूदिन्द्रियैरवगम्यस्तथापि प्रत्यक्षयोग्यः स्यादितिशङ्क्य सता=वर्त्तमानेन (घटपटादिना) सह पुरुषसम्बन्धिनां चक्षुरादीन्द्रियाणां यः सम्प्रयोगः=सन्निकर्षः (सम्बन्धः) तस्मिन् सति यद्बुद्धिजन्म=यज्ज्ञानं जन्यते तत् प्रत्यक्षमिति प्रत्यक्षलक्षणस्य तत्रैव (सत्सम्प्रयोग इति) सूत्रे 'सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्ष'-मित्यंशेन दर्शितत्वात्। लिङ्गराहित्यादिति अस्य 'व्याप्तिग्रहणाभावेन' इत्यादिः। लिङ्गं=नैयायिकैर्गृहीतम् हेतुरिति यावत्। वैयासिकस्य=व्यासप्रणीतस्य। तृतीयसूत्रस्य='शास्त्रयोनित्वात्' इत्येवंरूपस्य। द्वितीयवर्णके=द्वितीयव्याख्यायाम्। प्रथमवर्णके तु 'यस्मिन् महतां प्रदीपवत्सर्वार्थद्योतकानामृग्वेदादिशास्त्राणां योनित्व=मुत्पत्तिकारणत्वं तदेव ब्रह्म' इत्युक्तमिति बोध्यम्। **नावेदविदिति**-'येन सूर्यस्तपति तेजसेद्धः पिता पुत्रेण पितृमान् योनियोनौ।

---

१ वर्म=कवचः। परप्रहीयमाणास्त्रशस्त्राद्यपाकरणमङ्गावरणमिति यावत्। २ अत्र सूत्रे 'अर्थो धर्म' इत्येतावन्मात्रोक्तौ चैत्यवन्दनजलताडनादिषु व्यभिचारः, 'चोदनालक्षण' इत्यंशमात्रोक्तौ अनर्थकश्येनयागादावपि धर्मत्वं स्यादत उभयमुक्तम्।

नावेदविन्मनुते तं बृहन्तं सर्वानुभूमात्मानꣳ सम्पराये' इति समग्रा। अस्या अर्थः—'येन=परब्रह्मरूपेण तेजसा=चैतन्येन इद्धः=प्रकाशितः सूर्यस्तपति तथा योनियोनौ=तत्तज्जन्मनि पिता पुत्रेण युक्तो भवति पुत्रश्च पितृमान् भवति—सूर्यतापः, पिता पुत्रादि व्यवहारश्च सर्वोऽपि परब्रह्माधीन इति भावः। सर्वानुभूम्=सर्वस्य जगतोऽनुभवितारम्, तं बृहन्तं=परिपूर्णं परमात्मानम्, सम्पराये=परलोकगमनवेलायाम्, अवेदवित्=वेदार्थज्ञानशून्यो न मनुते=न जानाति तस्य (परब्रह्मणो) वेदव्यतिरक्तप्रमाणान्तरागोचरत्वादितीति सायणाचार्याः। तत्र=ब्रह्मणो वेदैकवेद्यत्वे। मानान्तरयोग्यता=वेदव्यतिरिक्तप्रमाणविषयता। विश्वस्य=समस्तस्य। **उद्दण्डस्येति**—अत्र कर्मणि षष्ठी, राज्ञ इत्यत्र कर्त्तरि तेन 'यत उद्दण्डं जनं राजा नियामयति (दण्डयति) अत' इत्यर्थः। अथ वा 'राज्ञ' इत्यस्यैव विशेषणमुद्दण्डस्येति तथा च उद्गतो दण्डो यस्य तस्य, स्वयमदण्ड्यत्वे सति परदण्डनशीलस्येत्यर्थः। **दुर्बलस्यापोति**—यथाऽऽहुः—

"अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः।
दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः" इति।

उपनयनाभावेनेति—"वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यम्, अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इति श्रुतौ 'तमध्यापयीत' इत्यंशस्य तं कमिति नित्यसाकाङ्क्षत्वात्, 'उपनयीत' इत्यत्राचार्यकरणे विहितस्य 'अध्यापयीत' इत्यत्र कर्तृगामिनि क्रियाफले विहितस्यात्मनेपदस्याध्यापनं विनानुपपत्तेश्च परस्पराकाङ्क्षायां पूर्वांशेनोपनयनवाक्येन सहैकवाक्यतया 'उपनीताष्टवर्षं ब्राह्मणमुपनीतैकादशवर्षं क्षत्रियमुपनीत द्वादशवर्षं वैश्यमध्यापयीत' इत्यर्थः सर्वैर्मीमांसकादिभिरैकमत्येन स्वीक्रियते, तस्मादुपनीतस्त्रैवर्णिकः पुरुषो वेदाध्ययनाधिकारी नान्य इति लभ्यते, अत एव 'यद्यु वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यम्' इत्यादिना वेदेऽपि तन्निषेधः कृतः। न च 'सर्वेषां लक्षणत्वादविशिष्टं हि लक्षणम्' इति (३।१।७)

सूत्रे जैमिनिना 'दशा[1]पवित्रेण [2]ग्रहं सम्मार्ष्टि' इत्यत्र यथा उद्देश्यभूत 'ग्रह' गतैकत्वसंख्याया अविवक्षा प्रदर्शिता तथेहापि ब्राह्मणं राजन्यं वैश्यमित्यत्र पुंस्त्वस्याविवक्षया सम्भवति त्रैवर्णिकस्त्रिया अपि वेदाध्ययनाधिकार इति भ्रमितव्यम् 'प्राजापत्या नव ग्रहाः' इति वाक्यविहितान् सर्वान् ग्रहानुद्दिश्य सम्मार्जनविधायकस्य 'ग्रहं सम्मार्ष्टि' इत्यस्यान्यथानुपपत्ते[3]रगत्या तद्गतस्यैकत्वस्याविवक्षणेन 'ग्रहान् सम्मार्जयेत्' इत्यर्थकत्वेऽपि प्रकृते तदविवक्षायां मानाभावात् अत एव 'धातो'-रित्यधिकृत्य विहितप्रत्ययेषु नासङ्गतिः अन्यथा त्वदुक्तरीत्याऽत्रापि 'धातो' रित्येकत्वसङ्ख्याया उद्देश्यगतत्वेनाविवक्षया कदाचिद्बहुभ्यो धातुभ्य एकैकस्य तिङादिप्रत्ययस्योत्पत्तौ 'हरिगुरुहरा'-इत्यादि द्वन्द्व इव 'भवति' इत्यत्र 'गम-हन-खन-मन-जन-सन-स्तन-भवति' 'गच्छति-इत्यत्र 'एध-भू-शक-पच-मुच-रिच-वच विच-सिच-खन हन-गच्छति' इत्येवमादीनां यथेच्छप्रयोगाणामनिष्टानामापत्तेः, यदुक्तं वैयाकरणैः —

"उत्पद्येत समस्तेभ्यो धातुभ्यः प्रत्ययो यदि ।
तदा सर्वैर्विशिष्येत द्वन्द्वोत्पन्नसुबर्थवत् ॥"

इति । अर्द्धजरतीयस्यानौचित्यात् । अत एव 'प्रतिप्रधानञ्च गुण आवर्त्तनीय' इति न्यायमाश्रित्यैव 'प्राजापत्या नव ग्रहा'-इत्यत्रोक्तप्रत्येक ग्रहसम्मार्जनं 'ग्रहं सम्मार्ष्टि' इत्यनेन प्रदर्शितं तत्रैव जैमिनिसूत्रे भाष्यकारादिभिरपि । [4]अत एव च —

"नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते ।"
"वैवाहिको विधिः स्त्रीणामौपनायनिकः परः ।

१ दशापवित्रं=वस्त्रखण्डः 'धोती क खूँट' इति मैथिली । २ गृह्यते हविरादिरस्मिन्ननेन वेति ग्रहो यज्ञियहविराद्याधानपात्रम् । ३ न च जातिपक्षेण निर्वाहः, अमूर्त्ताया जातेः सम्मार्जनासम्भवादिति तत्त्वम् । ४ ग्रहं सम्मार्ष्टीत्यत्र प्रदर्शितरीत्यान्यथानुपपत्तेरेव । ५ स्त्रीशूद्रयोर्वेदेऽनधिकारादेव ।

पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिष्क्रिया ॥"
"अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥"

इत्यादि मनुवचनानि,

"तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः"

इति याज्ञवल्क्यवचनञ्च सङ्गच्छन्ते ।

"यज्ञार्थं विहितं वित्तं तस्मात्तद्विनियोजयेत् ।
स्थानेषु धर्मजुष्टेषु न स्त्रीशूद्रविधर्मिषु ॥"

इति च । किञ्च 'स्त्री ह सायं, प्रातः पुमान्' इति गोभिलगृह्यसूत्रस्य 'स्त्री=पत्नी ह=किल सायं=रात्रौ बलीन् हरेत् अमन्त्रं=तूष्णीमित्यर्थः कस्मात्पुनः कारणादमन्त्रमुच्यते पत्न्या बलिहरणम् ? इयमेव तावन्मात्रं नाध्याप्यते उपदेशादिति ब्रूमः, अमन्त्रणमेव खल्वस्या बलिहरणमुपदिश्यत इति नेयमध्याप्यत इत्यदोष' इति भाष्यम् ।

"सायन्त्वन्नस्य सिद्धस्य पत्न्यमन्त्रं बलिं हरेत् ।"

इति मनुवचने अमन्त्रपदोपादानञ्च नासङ्गतम् । स्त्रिया वेदाध्ययनाधिकारे त्वेषामसङ्गतिर्दुर्वारैव स्यात् । 'कठी, बह्वृची' इत्यादि प्रयोगास्तु तत्तच्छाखाध्येत्री (तृ) त्वोपचारात्सिध्यन्ति, तदुक्तम्-'बह्वय ऋचोऽध्येतव्या यस्या इति विग्रहे ऋक्पूरित्यप्समासान्तः स्त्रिया अध्ययनाभावेऽपि तद्वंश्यत्वात्ताच्छब्द्यं यथाऽनधीयाने माणवके इति जातेरस्त्रीविषयादिति सूत्रे शब्देन्दुशेखरे नागेशेन ।

"पुरा कल्पे तु (षु) नारीणां मौञ्जीबन्धनमिष्यते ।
अध्यापनञ्च वेदानां सावित्री वाचनं तथा ॥"

१ 'गृहादारा' इत्यादौ तात्स्थ्यादिव ।

इति यमवचने पुरा कल्पपदमप्यस्मिन् कल्पे स्त्रीणां तत्सर्वं वर्ज्यमिति स्पष्टं प्रतिबोधयति। न चैवं सति 'प्रावृतां यज्ञोपवीतिनीमभ्युदानयन् जपेत् सोमोऽददद्गन्धर्वायेति' इति १६ गृह्यसूत्रं विरुध्येत यज्ञोपवीतिनीमिति विशेषणस्य भवन्मतेऽसङ्गतेरिति वाच्यम्, तत्र 'यज्ञोपवीतिनी'-मित्यस्य यज्ञोपवीतवद्विन्यासविशिष्टमुत्तरीयं यस्याः सेयं यज्ञोपवीतिनी तां यज्ञोपवीतवत्परिहितोत्तरीयवसना'-मिति भाष्यकृत्कृतव्याख्यानेनैव समाहितत्वात्। अत एव दम्पत्योर्यज्ञे सहाधिकारे सत्यपि हविष्यभोजनाधःशयन-स्नानाक्ष्यञ्जनाभ्यञ्जनाज्यावेक्षणब्रह्मचर्यादिकमेव स्त्रिया कर्त्तव्यं न तु समन्त्रिकाः क्रिया,-अध्ययनराहित्येन पुरुषतुल्यत्वाभावादित्यभिप्रायकस्य 'तस्या[1] यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात्' इति जैमिनिसूत्रस्य व्याख्यायां "स्ववतोस्तु वचनादैककर्म्यं स्यात्' 'द्व्याधानञ्च द्वियज्ञवत्' इति सूत्राभ्यां स्त्रीपुंसयोः सह यज्ञाधिकारो निर्णीतस्तत्र 'पत्न्यवेक्षते' इत्यादिना विहिते आज्यावेक्षणादौ पत्न्येव कर्त्री 'यजमानोऽन्वारभते' इत्यादिषु चोपादेयस्य यजमानस्य विवक्षितलिङ्गत्वात्पुमानेव कर्त्ता ये तु [3]फलितसंस्कारा वचनेनापि न व्यवस्थापितास्ते द्वयोरपि फलित्वादावर्त्तन्तेऽतो न तेषु चिन्ता, यानि तु परार्थान्युपस्थानानुमन्त्रणादीनि यजमानसमाख्यया यजमानकर्तृकाणि तेषु किं दम्पत्योरन्यतरः कर्त्ता उत पुमानेवेति चिन्त्यते तत्र यजमानसमाख्यानं यजमानपदाद्यथा निष्पाद्यते तथैवैतद्यजमानपदादपीति तेन समाख्यानाविशेषादविशिष्टं द्वयोरपि कर्त्तृत्वं विद्वत्त्वाद्वा पुमानेव कुर्यादविदुषीतरा वेदाध्ययनशून्यत्वात् प्रतिषिद्धं हि [4]तत्स्त्रियाः, यद्यप्युपनयन[5]मष्टवर्षस्य संस्कार्यत्वेनाविवक्षितलिङ्गत्वात्स्त्रिया अपि भासते अत एवाध्ययनमप्यनिर्दिष्टकर्तृकत्वात्प्रकृतमुपनीतं कर्त्तारमाश्रय-

---

१ स्त्रिया वेदाध्ययनानधिकारादेव। २ यावदेव 'पत्नी'-पदमुपाय पत्न्याज्यमवेक्षते' इत्यादिनोक्तं तावदेव। ३ फलिनोः=यज्ञफलवतोः पत्नीयजमानयोः संस्कारा इत्यर्थः। ४ वेदाध्ययनम्। ५ उपलक्षणमिदमेकादशवर्ष द्वादशवर्षयोरपि।

स्त्रिया अपि स्यादिति शक्यते वक्तुं तथापि तत्र लिङ्गविवक्षणादाहत्य[1] स्त्रीणामध्ययनप्रतिषेधाच्चाविदुषी स्त्री न शक्ता मन्त्रोच्चारणं कर्तुम् न च [2]तदन्यथानुपपत्त्या तस्या अपि विद्वत्ता सम्पादयितुं शक्यते सम्पन्नविद्येन पुंसा तेषामनुष्ठानसिद्धेरतः पुमानेव कर्त्ता" इति शास्त्रदीपिकायां मैथिलपार्थसारथि-मिश्राः। [1]"दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्येवमादिष्वेतदुक्तं—दम्पत्योः सहाधिकार इति अथेदानीं सन्दिह्यते—किं सर्वं याजमानं पत्न्या कर्त्तव्यमुत यावदुक्तमाशीर्ब्रह्मचर्यञ्चेति किम्प्राप्तम् ? सर्वं याजमानं पत्न्याः स्यात् सापि हि यजमाना तुल्यत्वात् तस्मात्सर्वं तस्या इति प्राप्ते ब्रूमः—तस्या यावदुक्तं स्यात् कस्मात् ? अतुल्यत्वात्। अतुल्या हि स्त्री पुंसा, यजमानः पुमान् विद्वाँश्च, पत्नी स्त्री चाविद्या च किमतः यद्येवं ह्येतदतुल्यत्वम् ? एतदतो भवति क्रत्वर्थेषु यानि यानि याजमानानि श्रवणानि तेषूपायत्वेन श्रवणाद्विवक्षितं लिङ्गं[3] तेन तेषु पत्नी न स्यात् यानि च क्रत्वर्थानि समन्त्रकाणि तेषु अविद्यत्वात्पत्नी न स्यात्, तत्पत्न्या अध्ययनस्य प्रयोजकं स्यादिति यद्युच्येत ? तन्न, असत्यपि प्रयोजकत्वे तस्य निर्वृत्तिर्भविष्यति अस्ति हि तस्य पुमान्निर्वर्त्तकः यच्च क्रत्वर्थं तदेकेन येन केन-चिन्निर्वर्त्तयितव्यम्, तस्मात्प्रतिषिद्धस्य पत्न्या अध्ययनस्य पुनः प्रसवे न किञ्चि-दस्ति प्रमाणम् अतस्त[5]दपि पत्नी न कुर्यात्, यास्त्वाशिषो यच्च ब्रह्मचर्यं तत्पुरुषम्प्रति गुणभूतं न तत्रान्यतरेण कृते सिध्यति अन्यतरस्य हि संस्कारो हीयेत न च तत्रोपादेयत्वेन यजमानस्य श्रवणं तस्माल्लिङ्गमप्यविवक्षितम् अत आशीर्ब्रह्मचर्यञ्चोभयोरपि स्यात् यच्चाऽऽहत्योच्यते—यथा—'पत्न्याज्यमवेक्षते' इति[6], तस्मादतुल्यत्वादसमानविधाना पत्नी यजमानेन भवितुमर्हतीति भाष्य-काराः शबरस्वामिनः। स्पष्टञ्चैतत्सर्वं 'स्त्री चाविशेषात्' इत्यादिकातीयश्रौत-

---

१ 'नस्त्री–शूद्रौ वेदमधीयाताम्' इति प्रतिपदमुक्त्वा। २ अनुष्ठाना-न्यथाऽनुपपत्त्या। ३ अस्मिन्नेव सूत्रे। ४ पुंस्त्वम्। ५ क्रत्वर्थं कर्मापि। ६ 'तदपि स्त्रिया कर्त्तव्य'-मिति शेषः।

सूत्रभाष्येषु तथा हि—"अथ ब्राह्मणो यजेत, स्वर्गकामो यजेत, इत्येवमादिष्विदं सन्दिह्यते किं ब्राह्मणं स्वर्गकामञ्च पुरुषमेवाश्रित्य 'यजेते'त्येष शब्द उच्चारित उतानियमः स्त्रियं पुमांसं वेति ? किं तावत्प्राप्तं ? पुंलिङ्गनिर्देशात्पुरुषस्यैवाधिकारः कुतः ? अत्र लिङ्गस्य प्रकृत्यर्थतया विवक्षितत्वात् यथा 'ग्रहं सम्मार्ष्टि' इत्यत्र, अतः पुरुषस्यैवाधिकारो न स्त्रियाः अद्रव्यत्वाच्च, यतः स्त्री निर्द्धना अतः सा द्रव्यत्यागात्मकं कर्म कर्त्तुं कथं शक्नोति द्रव्याभावात्, द्रव्याभावश्च—

"भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम्"

इति (महाभारत) स्मृतेः, तस्मात्पुरुषस्यैवाधिकार इति प्राप्ते आह—'स्त्री चाविशेषात्' (१ सू०) इति, स्त्री च अग्निहोत्रादिकर्मस्वधिकारिणी भवति कुतः ? अविशेषात्=स्वर्गकामत्वाविशेषात्, तदुक्तं जैमिनिना—'फलोत्साहाविशेषात्' (६।१।१६) इति, ननूक्तं निर्द्धनत्वान्नाधिकार इति ? नैव धनवती हि सा तस्या अपि कर्त्तनादिना द्रव्यार्जनसम्भवात्, पितृ-भ्रातृ-भर्त्रादिदत्तसम्भवाच्च पत्यार्जितस्योभयसाधारणत्वाच्च 'धर्मे चार्थे च कामे च नातिचरितव्या पाणिग्रहणाद्धि सहत्वं कर्मसु तथा कर्मफलेषु द्रव्यपरिग्रहेषु च' इत्यादि स्मरणात्। ननूक्तं 'यत्ते समधिगच्छन्ति' इत्यादिकं ? तत्रोच्यते स्मृतिप्रामाण्यान्निर्द्धनया भवितव्यं श्रुतिविशेषात्फलार्थिन्या यष्टव्यं यदि स्मृतिमनुरुध्यमाना परवशान्निर्द्धना च स्यात् 'यजेते'-त्युक्ता सती न यजेत तत्र स्मृत्या श्रुतिर्बाध्यते न चैतद्युक्तं तस्मात्फलार्थिनी सती स्मृतिमप्रमाणीकृत्य द्रव्यं परिगृह्णीयाद्यजेत चेति अतो निर्द्धनत्वप्रतिपादकं वचनमस्वातन्त्र्यपरं व्याख्येयं तस्मात्स्त्रिया अपि फलार्थित्वाविशेषाद्धनवत्त्वाच्चाधिकारो भवति। 'दर्शनाच्च' (८ सू०) दृश्यते चायमर्थो वेदे यत्पत्न्यपि कर्मस्वधिक्रिय इति—'मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीमिति पत्नीलोह' इति (७-४-३४) 'पत्नी च गार्हपत्ये तूष्णीम्' इति (५-५-३६) च अत्र योक्त्रादिविधिपरेषु वाक्येषु पत्न्या अप्यधिकारदर्शनात् पत्न्यप्यधिक्रियत इत्युक्तम् अथवा वेदे

पत्न्या अपि धनवत्तादर्शनाच्च पत्न्यधिक्रियते तथा हि—'भसदा पत्नीः सं याजयन्ति भसद्वीर्या हि पत्न्यो भसदा वा एताः परगृहाणामैश्वर्यमवरुन्धते' इति, एवं पत्न्याः कर्मस्वाधिकारे सिद्धे इदं चिन्त्यते—किं पत्नी पृथग् यजते यजमानश्च पृथक् उतोभौ सम्भूय यजेयातामिति किं प्राप्तं ? पृथक् पृथगिति कुतः ? यजेतेत्याख्यातप्रत्ययगताया एकत्वसंख्याया उद्देश्यगतत्वाभावेन विवक्षाया वारयितुमशक्यत्वात् , अत एककर्तृत्वसिद्धये यजमानेन पत्न्या च पृथक्-पृथग् यागः कर्त्तव्य इति पूर्वः पक्षः, सिद्धान्तस्तु-न पृथग्यागः कर्त्तव्यः कुतः ? वैगुण्यप्रसङ्गात्, दर्शपूर्णमासादावाज्यस्य पत्न्यवेक्षणं यजमानावेक्षण-ञ्चेत्युभयमाम्नातमस्ति तत्र पृथक्प्रयोगे क्रियमाणे यजमानकर्तृके यागे पत्न्यवेक्षणं लुप्येत पत्नीकर्तृके च यजमानावेक्षणम् , तस्मादवैगुण्याय सहैव दम्पती यजेयाताम् । ननु पृथगपि पुमानध्वर्य्वादिवत्परिक्रयणेनाज्यावेक्ष-णार्थं पत्नीं सम्पादयिष्यति स्त्री च पत्नीशब्दवाच्या यजमानम् ? मैवं, स्वामिनः परिक्रयणासम्पत्तेः न हि या काचित्स्त्री पत्नीशब्दवाच्या यज्ञस्वामिनी हि सा 'पत्युर्नो यज्ञसंयोगे' इति' (४।१।२३) पाणिनिस्मरणात् , एवं यजमान-शब्दमपि यज्ञस्वामिन्येव स्मरन्ति तस्मात्सहैव कर्तृत्वमुभयोः । न च यजेते-त्येकत्वं विरुद्धम् 'अग्नीषोमौ देवता' इत्यत्र यथा व्यासक्तयोर्देवतात्वाद्देवतैक्यं तथा दम्पत्योरेकमेव कर्तृत्वमित्यङ्गीकारात्, अनयोर्हि उद्वाहकाल एव द्रव्य-साधारण्यमुक्तम्—'धर्मे चार्थे च कामे च नाति चरितव्या' इत्यनेन, अतो यस्त्यागः स इतरेतरसंसृष्टयोरेव दम्पत्योः न हि साधारणमेकेन त्यक्तुं शक्यम् । ननु साधारणमपि धनं विभज्य पृथग्यागः सम्भवति ? मैवं, यत-स्तयोर्विभागः प्रतिषिद्धः 'न भर्त्रा सह विभजेत्' इति तस्मान्न विभज्य यागः । अतो द्रव्यसाधारण्याद्विभागप्रतिषेधात् , 'धर्मे चार्थे च कामे च नाति-चरितव्या' इति वचनात् , पृथक् प्रयोगे प्रागुक्तवैगुण्यापत्तेश्च स्वामिभ्यां समुच्चिताभ्यामवेक्षितस्याज्यस्य कर्माङ्गत्वाच्च न पृथक्कर्तृत्वं किन्तु सहैव एवञ्च यजमानविद्वत्तयैव पत्न्या अपि कार्यसिद्धेर्नाविद्वत्तया तस्या अधिकार-भङ्गः । अत एव सूत्रकारः—'अनुचरीर्वा फलाधिकारादितरासाम्' (२०,८,२८)

इति पत्न्या अपि फलं दर्शयति । श्रुतिरपि—'दिवि ज्योतिरजरमारभेताम्' इति । तथा च मनुः—(५,२५५)—

"नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
शुश्रूषयति भर्त्तारं तेन स्वर्गे महीयते" इति ।

एवं दम्पत्योः सहाधिकारे तुल्यफलत्वे सिद्धे इदं चिन्त्यते—किं सर्वं याजमानं पत्न्यापि कर्त्तव्यमुत यावदुक्तमाशीर्ब्रह्मचर्यमिति, किं प्राप्तम् ? तस्या अपि यजमानेन तुल्यत्वात्सर्वं याजमानं (यजमानसम्बन्धिकार्यं) तयापि कर्त्तव्यमिति प्राप्ते ब्रूमः—अत्र जैमिनिसूत्रम्—(६।१।२५) 'तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात्' इति, तस्या यावदुक्तं स्यात् कुतः ? अतुल्यत्वात् , यजमानस्तु पुमान् विद्वाँश्च पत्नी च स्त्री चाविद्या च । अतः क्रत्वर्थेषु यानि यजमानग्रहणानि तद्यथा-'यजमानो वेदं बध्नाति पात्राण्यासादयति शुक्रमन्वारभते' इत्यादीनि तत्र यजमानस्योपादेय-(पात्त)-त्वादेकवचनं विवक्षितम्, अतस्तत्र न पत्न्याः कर्त्रीत्वम् एवमेव 'पत्न्याज्यमवेक्षते' 'अदस्मै नर इत्येनमवेक्षते पत्नी' इत्यादौ (१०।५।४) पत्न्या एव कर्त्रीत्वं न यजमानस्य उक्ता[1]देव हेतोः, यानि क्रत्वर्थानि तेष्वविद्व-(द्य)-त्वात्पत्नी न स्यात् स्त्रीणामध्ययनप्रतिषेधात् सा मन्त्रोच्चारणं कर्त्तुं न शक्नोति न चा[2]न्यथाऽनुपपत्त्या तस्या अप्यध्ययनं कल्पयितुं शक्यते सम्पन्नविद्येन पुंसा तासामनुष्ठानसिद्धेः यद्धि क्रत्वर्थं तदेव न येन केनचित्कर्त्तव्यमतोऽनुपपत्तेः क्षीणत्वात्प्रतिषिद्धस्य पत्न्या अध्ययनस्य पुनः प्रसवे न किञ्चित्प्रमाणमस्ति तस्मात्तदपि पत्न्या न कर्त्तव्यम् याश्चाशिषो यच्च ब्रह्मचर्यं तत्पुरुषम्प्रति गुणभूतं न तत्रान्यतरेण कृते सिध्यति अन्यतरस्य संस्कारो हीयेत न च तत्र यजमानस्योपादेयत्वेन श्रवणं तस्माल्लिङ्गमप्यविवक्षितम् अत आशीर्ब्रह्मचर्यमुभयोः आशीः शब्देनात्र संस्कारा लक्ष्यन्ते=वृत्यशनाधःशयनपावनाक्ष्यञ्जनाभ्यञ्जनादयः ते ह्युभयोर्भवन्ति संस्कारेष्वपि पत्न्या वपनं न भवति वपन-

१ विशिष्य पत्न्या उपादानरूपात् । २ अध्ययनमन्तरेणानुष्ठानस्यानुपपत्त्येत्यर्थः ।

विधौ हि 'केशश्मश्रु वपते' इति समाहारद्वन्द्वोऽयं तत्र केशश्मश्रुणोरितरे[1]तर-योगे सति शास्त्रोक्तं वपनं न सम्पद्यते न च[2] पत्न्यास्त[3]योः साहि[4]त्यमस्ति श्मश्र्वभावात् अतस्तस्या न वपनमसामर्थ्यादिति तन्त्ररत्ने। ब्रह्मचर्यं गृहणं कामानां लक्षणार्थम् ब्रह्मचर्यस्याशीर्ग्रहणेनैव लक्षितत्वात् कामा अपि पत्न्या भवन्ति तदभावे अधिकारानुपपत्तेः, येऽप्यमन्त्रकाः क्रत्वर्थास्तेष्वपि यजमान एव कर्त्ता भवति विद्वत्त्वात्स्वतन्त्रत्वाच्च अतः सर्वं समन्त्रकममन्त्रकञ्च याजमानं यजमानेनैव कर्त्तव्यम्, आ[5]हृत्य विहितन्तु आज्यावेक्षणादि पत्न्या कर्त्तव्यं नान्यदिति।

व्य[6]वहारोऽप्येवमेव चिरन्तनः, न च दाक्षिणात्येषु मातुलकन्याविवाह-वदुपेक्ष्योऽयं व्यवहार इति वाच्यम्, तस्य

"मातुलस्य सुतामूढ्वा मातृगोत्रान्तथैव च।
समानप्रवराञ्चैव त्यक्त्वा चान्द्रायणञ्चरेत्।"

इति प्रत्यक्षस्मृतिवचनविरोधेन सर्वदेशव्यापकत्वाभावेन च हेयत्वेऽपि तत्तत्स्मृत्यनुकूलस्य सर्वदेशव्यापकस्य 'न स्त्रीशूद्रौ वेदमधीयाता'-मिति प्रमा-णितस्य स्त्रीकर्तृकवेदाध्ययनाभावरूपस्यास्य शिष्टाचारस्य परित्यागे प्रमाणा-भावात्, प्रत्युत

"अकुर्वन् विहितं कर्म निन्दितञ्च समाचरन्।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः।"

इति मनुवचनबलेन प्रायश्चित्तभागित्वापत्तेः, 'श्रुतिः स्मृतिः सदाचार'-इत्यादि (या० व०) स्मृत्या सदाचारस्य श्रुति-स्मृतिवद्धर्ममूलताप्रतिपाद-नाच्च। अत एव 'शिष्टाकोपे विरुद्धमिति चेन्न शास्त्रपरिमाणत्वात्' इति जैमि-निसूत्रे स्मृत्याद्यबोधितोऽपि व्यापको होलाकाद्युत्सवरूप आचारः—

१ वपनक्रियया पृथक्-पृथक्सम्बन्धे। २ यतः। ३ केशस्य श्मश्रु-णश्च। ४ समाहारद्वन्द्वे साहित्य-(समूह)-स्यैव क्रियान्वयित्वादिति भावः। ५ पत्नीपदमुपादाय। ६ स्त्रीकर्तृकवेदाध्ययनाभावरूपः।

"सदाचारोऽप्रमा मा वा ? निर्मूलत्वादमानता।
अष्टकादेरिवैतस्य समूलत्वात्प्रमाणता ।"

इत्यनेन प्रमाणं स्वीकृतो मीमांसकैः। अत[1] एव 'अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्' इति श्रुतिर्भाष्यकारो भगवान् पतञ्जलिश्च। ननु यथा 'स्वर्गकामो यजेत' इत्यत्रोद्देश्यगतं पुंस्त्वमविवक्षित्वा यज्ञाधिकारो दम्पत्योरुभयोर्निर्णीतस्तथा 'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत' इत्यत्रापि तदविवक्षा कथं न स्यात् ? वैषम्ये बीजाभावादिति चेन्न, 'स्वर्गकाम' इत्यत्र 'यावद्द्वितीया तावदत्र कामशब्द'-इति शबर[2]भाष्यरीत्या कस्यचिदधिकारिविशेषस्याश्रुत्या (च 'यागेन स्वर्गं भावये'-दित्यविशिष्टार्थेन दम्पत्योर्यागाधिकारलाभेऽपि प्रकृतेऽष्टवर्षब्राह्मणस्याधिकारिविशेषस्य श्रूयमाणत्वेन पुंस्त्वाविवक्षायाम्प्रमाणाभावात्, यदि 'अष्टवर्षमुपनयीत तमध्यापयीत' इत्येतावन्मात्रं श्रुतिवाक्यमभविष्यत्तदैव त्वदुक्तं पुंस्त्वाविवक्षणेन स्त्रिया वेदाध्ययनमुपापत्स्यत न त्वेतदस्ति तस्मादलमाम्रेडितेन। अस्तु वा यथाकथञ्चिल्लिङ्गस्याविवक्षा तथापि प्रागुक्तैकवाक्यताया दुष्परिहरत्वात्प्रतिषिद्धमेव स्त्रिया वेदाध्ययनम्। एवञ्च यत्र यत्र कर्मणि स्त्रीकर्तृकमन्त्रपाठः प्रतिपदोक्तो यथा 'विवाहस्तु समन्त्रक' इति याज्ञवल्क्येन, 'नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते' इति मनुना, 'पदा

---

१ स्त्रिया वेदाध्ययनाभावादेव। २ 'स्वर्गकामो यजेत' इत्यादिषु 'यजेत' इत्यादिविधायकशब्दैरेव कर्तुः 'यागेन कुर्या'-दित्यर्थस्य च (साध्यं स्वर्गम्प्रति यागस्य करणत्वेन) लाभे 'स्वर्गं कामयते' इत्यर्थके स्वर्गकामपदे अण्प्रत्ययार्थं कर्तृत्वमन्यथोपलब्ध्याऽविवक्षित्वा स्वर्गस्य च साध्यत्वेन 'कुर्यात्' इति क्रियाम्प्रति कर्मत्वेन 'स्वर्गकाम'-इत्यस्य काम्यमानं स्वर्गमित्यर्थोपपत्तौ 'यागेन स्वर्गं कुर्यादित्यर्थः सिध्यति तथा सति विशिष्य स्त्रियाः पुरुषस्य वाऽधिकारिविशेषस्याश्रुतेः सामान्यत उभयोः स्त्रीपुरुषयोर्यागेऽधिकारः सिध्यतीति भावः।

प्रवर्त्तयन्तीं वाचयेत् प्रमेपतियानः पन्थाः कल्पताम्' इति गोभिलेन, 'मनसा भर्त्तुरतिचारे त्रिरात्रं यावकं क्षीरौदनं वा भुञ्जानाऽधः शयीत ऊर्ध्वं त्रिरात्रादप्सु निमग्नायाः सावित्र्याऽष्टशतेन शिरोभिर्जुहुयात् पूता भवति' इति वसिष्ठेन तत्र तत्र तत्तत्स्मृत्यादिबलात्तत्तन्मन्त्रपाठे दोषाभावः। अध्ययनप्रतिषेधेऽपि विवाहादौ विशिष्टे कर्मणि स्त्रिया मन्त्रपाठे प्रतिषेधकानुपलब्धेः, प्रत्युत विशेषविहितत्वेन तत्तद् (याज्ञवल्क्यादि) वचनानामपवादत्वाच्च। न चोक्तवचननिचयेन सूचितस्तत्तत्कर्मणि स्त्रियास्तत्तन्मन्त्रपाठ एवान्यथानुपपत्त्याध्ययनं कल्पयिष्यतीति साम्प्रतम् एवं सत्ययत्वे विवाहादिषु पुरुषकर्तृकमन्त्रपाठस्याप्यनुपपत्तेः न हि सर्वैरधीतसमग्रस्त्वाध्यायैरेव विवाहादि क्रियत इत्याचारोऽस्ति किं बहुना एवं सति यथाविधि वेदाध्ययनशून्यस्य पण्डितमानिनस्तवापि विवाहादौ भूतपूर्वासङ्गत्या पत्न्या वदतो व्याघातो दुर्निवार एव। एतेन "यजमानपत्न्या अध्ययनमन्तरेण ऋत्विगादिप्रोक्तार्थस्य ज्ञानाभावात्तदुक्तकर्मणि प्रवृत्तिरेव न स्यात्, संस्कृतातिरिक्तभाषणन्तु 'नायज्ञियां वाचं वदेत्' इत्यादिना निषिद्धमेव" इति केषाञ्चिदुक्तिः[१] परास्ता यज्ञियसमन्त्रककर्मसु स्त्रिया अकिञ्चित्करत्वस्य प्रागुपपादितत्वात्। अत एव सीताप्रतिमयापि रामयज्ञसम्पूर्त्तिरितिहासादौ श्रूयमाणा सङ्गच्छते। ऋत्विगादि प्रोक्तानाम् 'आज्यमवेक्षस्व' इत्यादिवाक्यानामर्थज्ञानन्तु पुरोहितादिना तटस्थेन वाऽन्येन देशभाषया सुचेतीकृतायास्तस्याः सम्भवत्येव। याज्ञे कर्मणि संस्कृतातिरिक्तभाषणनिषेधस्तु "नानृतं वदेदृतं वाव दीक्षा सत्यं वाव दीक्षा तस्माद्दीक्षितेन सत्यमेव वदितव्यं नानृतम्" इत्यैतरेयब्राह्मणश्रुतेर्दीक्षितमात्रविषयको न तु तटस्थविषयकोऽपि वस्तुतस्तु दीक्षितेनापि यज्ञे तदङ्गभूतसङ्कल्पोहादावेव संस्कृतभाषणं कार्यमन्यत्रानियमः, तदुक्तं व्याकरणमहाभाष्यप्रदीपोद्द्योते नागेशैः-"यज्ञे सुशब्दप्रयोगा-

---

१। ६ अ० १ पा० ६ अ० जैमिनीयन्यायमालाटिप्पण्यां महामहोपाध्यायशिवदत्तोक्तिः। वस्तुतस्तु स्त्रीपदं प्रक्षिप्तमङ्गीकृत्यापि इतोऽग्रे मूल एवोक्तेषु 'त्रैवर्णिकैः पुरुषैः' 'त्रैवर्णिकपुरुषाणाम्' इत्यादिपाठेषु पुरुषपदे प्रक्षिप्तत्वाप्रदर्शनेन सर्वथोपेक्ष्यैव।

द्धर्म्मोऽपशब्दप्रयोगादधर्म्म इति तत्रैव तयोः प्रयोगनियमस्तदतिरिक्तस्थले तु सुशब्दापशब्दयोर्गेऽनियमः योऽपि यज्ञे दोषः सोऽपि तदङ्गभूतसङ्कल्पोहादिविषय एव" इति । यद्वा वेदव्यतिरिक्तसंस्कृतभाषणे विरोधाभावेन स्त्रिया अपि कृतवेदव्यतिरिक्तसंस्कृताध्ययनायास्तवेव सम्भवत्येव यागे संस्कृतभाषणम् । "अथ य इच्छेद्‌दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै" इति बृहदारण्यकोपान्त्यश्रुतिविरोधस्तु शङ्कितुमप्ययोग्यः 'दुहितुः पाण्डित्यं गृहकृत्यविषयमेव वेदेऽनधिकारात्' इति तत्रैव भाष्यकारश्रीमद्भगवच्छङ्कराचार्यपादैरुक्तत्वात् । अत एवैतस्याः श्रुतेः पूर्वत्र परत्र च "स य इच्छेत् पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति" "अथ य इच्छेत् पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति" "अथ य इच्छेत् पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन् वेदाननुब्रुवीत सर्वमायुरियादिति" "अथ य इच्छेत् पुत्रो मे पण्डितो विगीतः समितिङ्गमः शुश्रूषितां वाचं भाषिता जायेत सर्वान् वेदाननुब्रुवीत सर्वमायुरियादिति" इत्यादिश्रुतिभिः पुत्रविषये वेदानुवचनमाम्नायाऽप्यत्र कन्याविषये तदनाम्नानं सङ्गच्छते । यदि तु स्त्रिया अपि वेदाध्ययनं श्रौतमभविष्यत्तदा "य इच्छेन्मम वेदानुवचनशीलो दीर्घायुः पण्डितः पुत्रो जायतामिति स सपत्नीक एवमाचरेत्" इपि पुत्रकामनाविधिवत् कन्याकामनाविधावत्रापि "य इच्छेन्मम वेदाध्ययनसम्पन्ना दीर्घायुः पण्डिता दुहिता जायतामिति स सपत्नीकस्तिलौदनं=कृसरं पाचयित्वा घृतयुक्तं कृत्वा तादृक्कन्याजननाय भुञ्जीत" इत्यर्थसम्पादनार्थम् "अथ य इच्छेत् दुहिता मे पण्डिता जायेत वेदाननुब्रुवीत सर्वमायुरियादिति' इत्येवं श्रुतिस्वरूपमुपालप्स्यत किञ्च भवदुक्तरीत्या पण्डितपदादेव 'वेदाध्ययनसम्पन्न इत्यर्थलाभे 'अथ य इच्छेत्पुत्रो मे पण्डितो विगीतः समितिङ्गमः शुश्रूषितां वाचं भाषिना जायेत सर्वान् वेदाननुब्रुवीत' इति श्रुतौ वेदपदं पौनरुक्त्यमापत्स्यतेत्यूहनीयं महनीयैः । 'द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च, तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहभैक्षचर्या" इति हारीतवचनमप्यस्मत्पक्षस्यैव पोषकं यतः

स्त्रीणां द्वैविध्यादेव 'पुरा कल्पे तु नारीणाम्' इति यमवचनं सङ्गतिं लभते, 'पुरा कल्पे तु नारीणां ब्रह्मवादिनीत्वान्मौञ्जीबन्धनं वेदाध्यापनं सावित्रीवाचनञ्चेष्टम्, अस्मिन् कल्पे तु तासां ब्रह्मवादिनीत्वाभावात्तत्सर्वं वर्ज्यमित्याशयात्। यदि त्वस्मिन्नपि कल्पे काचिद्ब्रह्मवादिनी सम्भवेत्तदाऽसौ लब्धुमर्हत्येवोपनयनवेदाध्ययनादिक्रियां तत्र न विक्रियाऽस्माकं न ह्येतावता शास्त्रायापराध्यति किञ्चित्। तस्माद्वेदाध्ययनस्योपनयनपूर्वकत्वनियमादुपनयनस्य च—

'वैवाहिको विधिः स्त्रीणामौपनायनिकः परः'

'अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः'

इत्यादिमन्वादिवचनैर्दूषितत्वात्स्त्रीणां वेदाध्ययने लेशतोऽपि प्रमाणाभावेन "**स्त्रीशूद्रयोस्तु सत्यामपि ज्ञानेच्छायामुपनयनाभावेनाध्ययनराहित्याद्वेदेऽधिकारः प्रतिषिद्धः**" इत्यत्र 'स्त्री' पदं केनचिन्महात्मना प्रक्षिप्तमिति ब्रुवाणो [१] विक्षिप्तः, शबरभाष्य-तन्त्रवार्तिक-शास्त्रदीपिका-कात्यायनश्रौतसूत्रभाष्य-गोभिलगृह्यसूत्र-मन्वादिस्मृतिषु, "अध्ययनरहितया स्त्रिया तदनुष्ठातुमशक्यत्वात्" इति (६ अ० १ पा० ६ अ०) जैमिनीयन्यायमालायां, "स्त्रिया अध्ययनाभावेऽपि तद्वंश्यत्वात्ताच्छन्दसम्" इति स्त्रीप्रत्ययस्थशब्देन्दुशेखरे, "यद्यपि स्त्रीणामध्ययनं प्रतिषिद्धम्" इति सिद्धान्तकौमुदीटीकायां तत्त्वबोधिन्याञ्च तत्र तत्र प्रत्यक्षोपलब्ध'स्त्री' पदे प्रक्षेपकल्पनायाः सर्वथैवानौचित्यादित्यास्तां विस्तरः। पुराणादिमुखेन=पुराणादिद्वारा। **अक्षरमिति**-न क्षीयत इति न क्षरतीति वा अविनश्वरमित्यर्थः। ब्रह्मेति यावत्। **उदीरित इति**-अर्थान्महर्षिणा पाणिनिनेति **सम्भवत इति**-अत्र 'शम्भुमते' इतिपाठः साधीयान्। **इत्यादिनेति**-आदिपदात्—

"स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः॥

---

१ **'लाहोर'-मुद्रितऋक्सूक्तसङ्ग्रहटिप्पण्यां महामहोपाध्यायो दाधिमथिः शिवदत्तः।**

अनुस्वारो विसर्गश्च ≍क≍पौ चापि पराश्रितौ।
दुःस्पृष्टश्चेति विज्ञेय ऌकारः प्लुत एव च ॥"

इत्येषां संग्रहः। तत्र=शिक्षायाम्। गीतीशीघ्रीति—

"गीतीशीघ्री शिरःकम्पी तथा लिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥"

इति समग्रम्। **उपांश्विति—**

उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्।
निष्पीडितं ग्रस्तपदाक्षरञ्च वदेन्न दीनं न तु सानुनास्यम्॥

इति। **माधुर्यमिति—**

"माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।
धैर्यं लयसमर्थञ्च षडेते पाठका गुणाः" इति।

प्रकृतिभाव इति—ईदूदेदिति प्रगृह्यत्वात्प्लुतप्रगृह्या इत्यनेनेति भावः। तत्र=शिक्षायाम्। मिथ्याप्रयुक्तः=यथा न प्रयोक्तव्यस्तथा प्रयुक्तः। अत्रैव दृष्टान्तयति—**इन्द्रशत्रुरिति**—शत्रुशब्दः 'शद्लृ शातने' धातोर्निष्पन्नत्वाद्घातकपर्यायः। स्वरतः=स्वरकृतात्। तथा सति=आद्युदात्तत्वे सति। **पूर्वपदेति**—'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति (६, २, १) सूत्रेण प्रकृतिभावद्वारेत्यवगन्तव्यम्। तेन=आश्वलायनेन। **न हीति**—यदि मन्त्रकाण्डमनुसृत्याश्वलायनः प्रावर्त्स्यत् तर्हि यत्र यज्ञे 'अग्निमीले' इत्यादयो मन्त्रा वर्त्तन्ते तेनैवोपाक्रमिष्यत न तु दर्शपूर्णमासाभ्याम्, मन्त्रकाण्डे 'अग्निमीले' इत्यादीनां प्राथम्यात्तेषाञ्च दर्शपूर्णमासयोरभावादिति भावः। **ब्राह्मणे प्रक्रान्तत्वादिति**—ब्राह्मणकाण्डमनुसृत्याश्वलायनप्रवृत्तौ तु ब्राह्मणे प्रक्रान्ताया दीक्षणेष्टेरेव पूर्वं व्याख्यातुमौचित्यात्तां विहाय दर्शपूर्णमासयोः पूर्वं व्याख्यानमसङ्गतं स्यादिति भावः। **अनुष्ठय इति**—तत्र मन्त्रकाण्डानुसरणस्यैवौचित्यादिति भावः। दाशतयीः=ऋचः। **रिच्यत इवेति**—यः पुमान् (विद्वान्) स्वयमापद्रहितोऽपि द्रव्यलोभादयाज्यं याजयति निषिद्धं द्रव्यं प्रतिगृह्णाति स इह-

लोके रिच्यत इव=कीर्त्तिशून्य इव भवति—अहो दुरात्मायमेवं धनिकोऽपि सन् द्रव्यलोभादन्यायं करोतीति सर्वे जनास्तं निन्दन्ति तदिदमिह लोके रिक्तत्वम्। तथा प्रेव रिच्यते=परलोकेऽपि प्रकर्षेण रिक्त इव भवति पुण्यलोकाभाव एवात्र रिक्तत्वमित्यर्थः। याजनप्रतिग्रहयोर्जीविकारूपेण शास्त्रेऽभ्युपगतत्वान्निषिद्धयाजनप्रतिग्रहमात्रविषयकमेवेदं प्रायश्चित्तमिति बोध्यम्। सम्प्रदायः=शिष्टाचारः। श्रुतिलिङ्गवाक्यादीत्यादिपदात् प्रकरण-स्थान समाख्यानां ग्रहणम्, एतच्च प्रमाणषट्कं मीमांसकसम्मतं विस्तरेण प्राक्प्रतिपादितं कर्मकाण्डे चोपयोजकम्। उपजीव्य=आश्रित्य। **उपक्रान्तेति**—अत्र 'एवञ्च ब्राह्मणक्रममनुसृत्याश्वलायनप्रवृत्तौ दीक्षणीयेष्टिरेव तेन पूर्वं व्याख्यातुमुचिता' इति शेषः पूरणीयः। **विकृतित्वेनेति**—विकृतियागत्वेनेत्यर्थः 'प्रकृतिवद्विकृतिः कर्त्तव्या' इति सिद्धान्तात्प्रकृतियागे ये ये मन्त्र-देवता-पात्र-हविरादयस्तेषामेवातिदेशस्तदीयविकृतियागेऽपि कर्त्तव्य इतीहापि प्रकृतिभूतदर्शपूर्णमासयागीयपात्रहविराद्यतिदेशस्तदीयविकृतिरूपायां दीक्षणीयायामिष्टाविष्टः स च पूर्वं दर्शपूर्णमासव्याख्यानमन्तरेण न सम्भवतीति तावेवाश्वलायनेन प्रथमं व्याख्याताविति भावः। तदपेक्षत्वात्=दर्शपूर्णमासापेक्षत्वात्। तद्व्याख्यानं=दर्शपूर्णमासयोर्व्याख्यानम्। **नमः प्रवक्त्र इति**—'नमः प्रवक्त्रे नम उपद्रष्ट्रे नमोऽनुख्यात्रे क इदमनुवक्ष्यति स इदमनुवक्ष्यति' इत्याद्यस्ति बृहदस्य मन्त्रस्य रूपमित्याश्वलायनश्रौतसूत्रे (१।२।२) द्रष्टव्यम्। **गुणोपसंहारन्यायेनेति**- एकप्रधानसम्बद्धानामेकत्राप्युच्यमानानां धर्माणामन्यत्रापि तत्सदृशे सम्बन्धो गुणोपसंहारन्यायो यथा—एकस्मिन्नग्निहोत्रे कर्मणि प्रधाने सम्बद्धानामेकत्राप्यभिधीयमानधर्माणामेकफलकत्वेन तत्समानेषु यावत्स्वेवाग्निहोत्रकर्मसु सम्बन्धो भवतीति स्पष्टमिदमुत्तरमीमांसातृतीयाध्यायतृतीयपादप्रथमसूत्रव्याख्यायां शाङ्करभाष्ये। एवञ्चेहापि शाखान्तरगतानामपि नमः प्रवक्त्र इत्यादीनां विनियोगो युक्त एवेति तत्त्वम्।

ऐन्द्रवायवग्रहः= इन्द्रवायुदेवताकहविष आधारभूतः पात्रविशेषः। ब्राह्मणं व्याचष्टे—**अग्निमील इत्यादीति**। 'पराची' इत्यस्यार्थमाह —**समुद्रा-**

दीति। 'अव्याकृता' इत्यस्यार्थमाह—**प्रकृतिः प्रत्यय इति**। व्याकृता= प्रकृतिप्रत्ययादिप्रविभागेन विन्यस्ता। **प्रयोजनविशेषो वररुचिनेति**-अत्र वररुचिनेत्यपपाठः, न हि भाष्यवार्त्तिकानि वररुचिकृतानीत्यन्यत्र प्रपञ्चितम्। व्याकृता=प्रकृतिप्रत्ययादिप्रविभागेन विन्यस्ता। वार्त्तिके प्रयोजनमित्यत्र प्रयोजनञ्च प्रयोजनञ्च प्रयो[1]जनञ्च प्रयोजनञ्च प्रयोजनञ्चेति विगृह्य 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्' इति सूत्रेण नपुंसकैकशेषो बोध्यः, यद्वा वेदाः प्रमाणमित्यादौ सकलवेदनिष्ठप्रमितिकरणतावच्छेदकमेकमभिप्रेत्य प्रमाणपदोत्तरैकवचनोपपत्तिवदिहापि रक्षोहागमलध्वसन्देहनिष्ठप्रयोजनतावच्छेदकं प्रयोजनत्वमेकमभिप्रेत्य तद्गतैकत्वविवक्षयैकवचनोपपत्तिः। **लोपागमेति**-तत्र लोपागमयोरुदाहरणं 'देवा अदुह' इति, अत्र 'दुह' धातोर्लङो झस्य स्थानेऽदादेशे 'लोपस्त आत्मनेपदेषु' इति (७।१।४६) सूत्रेण तकारलोपे 'बहुलं छन्दसि' इति (७।१।८) सूत्रेण रुडागमः। वर्णविकारस्य यथा 'उद्ग्राभञ्च निग्राभञ्च' इति, अत्र 'उद्ग्राभनिग्राभौ च च्छन्दसि स्रुगुद्यमननिपातनयोः' इति 'उदि ग्रहः' इति (३।३।३५) सूत्रस्थवार्त्तिकेन घञि 'हृग्रहोर्भश्छन्दसि' इति हस्य भ[2] आदेशः। **ऊहः खल्वपीति**-प्रयोजनमित्यनुकर्षः। यथायथम्=यत्र यत्र यथलिङ्गं या या विभक्तिस्तत्तयुक्ततया। **विपरिणमयितव्या इति**-यथा 'मधोस्तृप्ता इवासते' अत्र मधुन इति 'घृतस्य यजते' अत्र घृतेन इति, 'धुरि दक्षिणायाः' अत्र दक्षिणायामिति, 'अधा स वीरैर्दशभिर्वियूयाः' अत्र वियूयादिति। **तान्नेति**-तान्+न+अवैयाकरण इति च्छेदः अथवा वैयाकरणः ना=पुरुष इत्यर्थः। **आगमः खल्वपीति**-व्याकरणमध्येतव्यमिति वेदेऽप्याम्नातमिति भावः। **निष्कारण इति**-दृष्टं कारणमनपेक्ष्येत्यर्थ इति कैयटः। ननु वेदे 'षडङ्गो

१ वार्त्तिकस्थागमपदार्थान्वयतात्पर्येणात्र पुंस्त्वं न हि आगमो व्याकरणस्य प्रयोजनमपि तु प्रयोजक इति व्यक्तं कैयटादौ। २ यद्यप्यत्र वार्त्तिके निपातनादेव तत्सिद्धिस्तथापि 'गृभ्णामि ते सौभगत्वाय' इत्याद्यर्थं हृग्रहोर्भश्छन्दसीत्यस्यावश्यकत्वमिति भाष्यप्रदीपोद्द्योते नागेशः।

वेद' इत्येवाम्नातं न तु विशिष्य व्याकरणमिति चेत्तत्राह—**प्रधानञ्चेति।** षडङ्गाध्ययनेनैव व्याकरणाध्ययनमपि प्रदर्शितं प्राधान्याच्चात्रैव यत्नः कार्य इति भावः। **बृहस्पतिरिन्द्रायेति**-भाष्ये यद्यप्येतत् 'किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्त्तव्य' इत्युक्त्वा……'नेत्याह अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः एवं हि श्रूयते' इत्यनन्तरमुपलभ्यते तथापि 'लघ्वर्थञ्चाध्येयं व्याकरणं ब्राह्मणेनावश्यं शब्दा ज्ञेया इति न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या विज्ञातुम्' इति भाष्यस्यात्रैव तात्पर्यादिवमुक्तमत एवात्र भाष्योक्तशब्दानां यथावदानुपूर्व्या विन्यासो न कृत इति बोध्यम् प्रतिपदोक्तानाम्=गौरश्वः पुरुषो हस्तीत्यादि प्रकारेणैकैकशो निर्दिष्टानाम्। **असन्देहार्थमिति**-नञर्थः प्रागभावस्वरूपस्तेन सन्देहप्रागभावप्रतिपालनं व्याकरणस्य प्रयोजनमित्यर्थः। **याज्ञिकाः पठन्तीति**-यज्ञकाण्डभवा वैदिकाः शब्दा याज्ञिकास्ते पठन्तीति 'शृणोत ग्रावाण'इतिवत्प्रयोग इति भाष्यप्रदीपोद्द्योतकाराः, वस्तुतस्तु याज्ञिकाः=पूर्वे महर्षय इति। आग्निवारुणीम्=अग्निवरुणदेवताकाम्। पृषन्ति=चिह्नभूतबिन्दवः। ताम्=स्थूलपृषतीपदवाच्यामनड्वाहीम्। मुख्यानि प्रयोजनानि प्रदर्श्यानुषङ्गिकाण्यपि तानि दर्शयति। **इमानि चेति। भूय इति**-पुनरित्यर्थः बाहुल्यार्थकत्वे तु प्रयोजनानीत्यस्याभेदविशेषणतया भूयांसीति स्यादिति ध्येयम्। **तेऽसुरा इति**-याज्ञे कर्मणीति शेषः। **हेलयो हेलय इति कुर्वन्त इति**-'हे अरयोऽरय' इति पदमात्रस्य द्वित्वे हैहेप्रयोगे हैहयोरिति प्रकृतिभावे च कर्तव्ये वाक्यद्वित्वं पूर्वरूपं लत्वञ्च कुर्वन्त इत्यर्थः 'सर्वः प्लुतः साहसमनिच्छता विभाषा कर्तव्य' इति रीत्या तु पूर्वरूपत्वमदोषायेति बोध्यम्। अपशब्दार्थकम्लेच्छधातोः 'कृत्यार्थे तवैकेनकेन्यत्वनः' इति (३।४।१४) सूत्रेण 'तवै' प्रत्यये 'म्लेच्छितवै' इति तस्यैवार्थमाह 'नापभाषितवै' इति नासंस्कृता वाग्वक्तव्येत्यर्थः। म्लेच्छो इत्यत्र निन्दार्थकम्लेच्छधातोर्बाहुलकात्कर्मणि घञ् तेन निन्द्या इत्यर्थः। द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति जैमिनिसूत्रोक्तदिशा यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यादावपापश्लोकश्रवणस्य प्रशंसामात्रपरत्ववत्तेऽसुरा

इत्यस्यापि निन्दामात्रपरत्वमिति भावः। स्वरतः=स्वरेण, एवं वर्णत इत्यपि। **मिथ्येति**-यदर्थप्रतिपादनाय प्रयुक्तस्तद्विरुद्धमेवार्थं स्वरवर्णादिदोषात्प्रतिपादयन् नाभिमतार्थमाहेत्यर्थ इति कैयटः। **वाग्वज्र इति**-वागेव वज्रो हिंसकत्वादित्यर्थः॥ **यथेन्द्र इति**-यथा इन्द्रशत्रुशब्दो यजमानं स्वरदोषाद्धिंसितवानित्यर्थः, इदमत्र बोध्यम्-इन्द्रनाशाय शत्रुसूदननामानं यज्ञमारभ्य वृत्रासुरस्तत्र 'इन्द्रशत्रुर्वर्द्धस्व' इति मन्त्रमूहितवान् अत्र मन्त्रे शत्रुशब्दः क्रियाशब्दत्वा'न्नाशयिता' इत्यर्थक इत्येवञ्च 'इन्द्रस्य शत्रुः=नाशयिता भव' इत्यभिप्रेतार्थसिद्धये तत्पुरुषस्वरेऽन्तोदात्ते कर्तव्ये बहुव्रीहिस्वर आद्युदातोऽज्ञानात्प्रयुक्तस्तेन इन्द्रः शत्रुः=शातयिता यस्येत्यर्थसम्पत्त्या स्वस्यैव नाशो जात इति। **अविज्ञातमति**=अविज्ञातत्वञ्चाविदितस्वरादिसंस्कारत्वादर्थापरिज्ञानाद्वा बोध्यम्। निगदेन=पाठमात्रेण। न तज्ज्वलति=न तत्सफलं भवति। व्याकरणाध्ययनमभ्युदयकारणमिति दर्शयति **यस्त्विति**। कुशलः=अधीतव्याकरणः, तत्तत्सूत्रस्मरणपूर्वकं यः प्रयुङ्क्ते इत्यर्थः। विशेषे=अर्थविशेषे। यथावत्=अम्बूकृतादिदोषरहितम्, तत्राम्बूकृतः=व्यक्तोऽपि करणपाटवादालस्यादिदोषाद्वा मुखान्तर्लीन एव यः श्रूयत इति स्पष्टं कैयटे, एवमादयो दोषा व्याकरणमहाभाष्यपस्पशाह्निकोपान्ते भगवता पतञ्जलिना दर्शिता इति तत्रैव द्रष्टव्यम्। वाचो योगः=प्रकृतिप्रत्ययविभागेनार्थविशेषपरत्वं तद्वेत्तीति वाग्योगवित्, वाग्योगविद आप्नोति क्रियया सम्बन्धमभिप्रेत्य दुष्यतीत्यंशस्य साकाङ्क्षत्वं जानानः पृच्छति क इति अपशब्दैः को दुष्यतीति सम्बन्धः। **कुत एतदिति**- वाग्योगविदः कुतो दोष इत्यर्थः। नन्वस्त्वधर्मोऽपि तथापि धर्माधिक्यायाध्येयं व्याकरणमित्यत आह-**अथवेति**। प्राप्नोतीति कर्मकर्तरि प्रयोगः, पुरुषमिति द्वितीयान्तपदाध्याहारेण वा। **शरणमिति**-तिरश्चां (सिंहव्याघ्रादीनां) ब्रह्महत्यागोहत्यादिजन्यपापसम्बन्धाभाववदिति बोध्यम्। विषमः=असमः। **नात्य [illegible]**-अत्यन्तमित्यर्थे अत्यन्तायेत्यव्ययमिति स्पष्टमुद्द्योते। **अज्ञानां [illegible]** अन्यथा अज्ञानकृतमहापातकादिप्रायश्चित्तबोधकतत्तत्स्मृतीनां वैयर्थ्यापत्तेरिति भावः। तदेवाह-**यो हीति**। एवं-

तर्हीति-एवं तर्हि भवतैवोच्यतां कोऽपशब्दैर्दुष्यतीत्यर्थः । अविद्वांसः=व्याकरणमजानानाः, प्रत्यभिवादे=अभिवादनानन्तरप्रयोज्याशीर्वादवाक्ये, नाम्नः=अभिवादकनामवाचकस्य टेः 'प्रत्यभिवादेऽशूद्रे' इति प्लुतिं कर्तुं ये न जानन्ति तेषु विषये कामं=निःशङ्कं, विप्रोष्य=प्रवासादागत्य, स्त्रीषु=मात्रादिषु गरीयसीष्विव, 'अयमह'-मित्येव वदेत् यथा प्रवासादागतोमात्रादिप्रभृतिषु पूज्यास्वपि स्त्रीषु विषये 'अभिवादये देवदत्तोऽह'-मिति न वदत्यभिवादकः किन्तु 'अयमहम्' इत्येतावन्मात्रं तद्वद्व्याकरणज्ञेषु पुरुषेष्वपि तेन वक्तव्यमित्यर्थः । **स्त्रीवदिति**-स्त्रीवच्छास्त्राज्ञानप्रयुक्ताभिवादककृतापमानजन्यदुःखभाजो मा भूमेति भावः । **प्रयाजा इति**-'समिधो यजति' इत्यादयः पञ्च प्रयाजनामानोऽङ्गयज्ञविशेषास्तेषु ये मन्त्रास्ते सविभक्तिकाः कार्या इत्यर्थः, इदञ्च यत्रोहः कर्त्तव्यो भवति विकृतियागे (यथा, समिधोऽग्न आज्यस्य व्यन्तु अग्नेग्न' इत्यादि मन्त्रेषु) तत्रैव बोध्यम्, प्रकृतियागे प्रयाजमन्त्राणां सर्वेषां सविभक्तिकानामेव पाठात् । पदशः=पदम्पदम्प्रविभज्य । स्वरशः=उदात्तादिभिः । स्वरैः । **अक्षरश इति**-अक्षरं व्यञ्जनसहितोऽच् । आर्त्विजीनः=[1]यजमान [2]ऋत्विग्वा । आर्त्विजीनाः=यजमाना ऋत्विजो वा । **चत्वारीति**-शब्दे वृषभत्वारोपोऽत्र मन्त्रे । चत्वार्यपि पदजातानि परापश्यन्तीमध्यमावैखरीरूपाणि, उपसर्गनिपातयोः पृथगुपादानं गोबलीवर्दन्यायेन बोध्यम् । **सप्तविभक्तय इति**- सुप इत्यर्थः तिङ्विभक्तीनां षट्त्वात् । ननु वर्षति=मूत्रेण भूमिं सिञ्चतीति वृषभ इत्युच्यते तत्कथं वृषभपदेन शब्दग्रहणमित्यत आह-**कामानामिति** । **महो देव इति**-महान्=परब्रह्मस्वरूपोऽन्तर्यामिरूपः शब्दो देवो मर्त्येषु प्रविष्ट इत्यर्थः, तदावेशफलमाह-**महता देवेनेति** । तादात्म्यं=सायुज्यम्, तदुक्तं हरिणा—

'अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम् ।
प्राहुर्महान्तं वृषभं येन सायुज्यमिष्यते' । इति

१ अत्रार्थे ऋत्विजमर्हतीत्यर्थे 'यज्ञर्त्विग्भ्यां घखञौ' इति खञ्प्रत्ययः।

२ अत्रार्थे ऋत्विक्कर्मार्हतीत्यर्थे 'तत्कर्मार्हती'ति वार्त्तिकेन खञ्प्रत्ययः ।

'चत्वारि' इत्यनेन पदेन स्मर्यमाणं वाक्यान्तरमप्याह-**अथवेति**। **परिमितेति**-'परिमितानि' इति प्राप्ते 'शेश्छन्दसि बहुल'-मिति शेर्लोपः, एतावन्त्येवेत्येवं परिच्छिन्नानीत्यर्थः। **मनीषिण इति**-पृषोदरादित्वात्साधुः, शुद्धिकरणेन विषयान्तरेभ्यो व्यावर्त्य वा चित्तस्य वशीकर्त्तार इत्यर्थः। गुहायाम्=अज्ञाने, हृदयादौ वा, मन्त्रे 'गुहा' इति सुपां सुलुगिति ङेर्लुकि बोध्यम्। **त्रीणीति**-नामाख्यातोपसर्गनिपातानाम्प्रत्येकं परापश्यन्तीमध्यमावैखरीभेदाच्चातुर्विध्येन परा-पश्यन्ती-मध्यमा-रूपाणि नामाख्यातोपसर्गनिपातपदजातानि व्याकरणशून्यजनानामज्ञानान्धकारे मग्नानि न ज्ञानगोचरी भवन्तीत्यर्थः। नेङ्गयन्तीत्यस्यैव व्याख्यानं न चेष्टन्त इति। **तुरीयं वाच इति**-वाचः=नामाख्यातोपसर्गनिपातरूपायाः, तुरीयं=चतुर्थं-वैखरीरूपमंशमित्यर्थः। मनुष्याः=अवैयाकरणरूपाः। **वर्त्तत इति**-'तस्मात्सकलपदज्ञानाय मनीषित्वाय चाऽध्येयं व्याकरण'-मिति शेषः। उतत्व इत्यत्र 'उत' शब्दोऽप्यर्थकः 'त्व' शब्द एकार्थकस्तदाह-**अपि खल्वेक इति**-एकः=अवैयाकरणः, न पश्यतीति प्रत्यक्षेण शब्दस्वरूपमुपलभमानोऽप्यर्थपरिज्ञानाभावाद्यथार्थं न पश्यतीत्यर्थः एवं न शृणोतीत्यपि। **अविद्वांसमिति**-अविद्वांसं (व्याकरणज्ञानशून्यं) प्रति निन्दामाहार्द्धर्चे इत्यर्थः। विद्वांसं स्तौति-**उतो इति**-'उतो' शब्दोऽप्यर्थकः 'उतउ' इति निपातसमुदायः। अन्यस्मै=वैयाकरणाय। सुवासाः=शोभनवसना निजसर्वालङ्कारभूषितेति, यद्वा सुवासाः=ऋतुकालेषु नीरजस्का-चतुर्थेऽहनि स्नातेत्यर्थः। विवृणुते=प्रकाशयति, अस्य 'पत्ये' इति पूर्वोक्तेनाऽन्वयः। नः=अस्मान्। **सक्तुः सचतेरिति**-'षच सेचने' इति धातोस्तुनिप्रत्यये सक्तुरितीत्यर्थः, दुर्द्धावः=दुःशोध्यार्थकः, **विपरीतादिति**-'कस'धातोः पृषोदरादित्वाद्वर्णव्यत्यये सक्तुरितीतिभावः, तदा कोऽर्थइत्याह-**विकसितो भवतीति**-'तितउ' इत्यस्यार्थः परि पवनं भवतीति, इत एव भाष्यात्तितउशब्दो नपुंसकः 'चालनी तितउः पुमान्' इति कोषात्पुंलिङ्गोऽपीति नागेशः, तनुधातोर्डउप्रत्ययः सन्वद्भावश्च। तदर्थमाह-**ततवद्वेति**-विस्तारयुक्तमित्यर्थः, **तुन्नवदिति**-बहुच्छिद्रमित्यर्थः, अत्र पक्षे 'तुद' धातो-

च्छेदनार्थकात्कर्मणि डउप्रत्ययः सन्वद्भावश्च बोध्यः । ध्यानवन्तः=पण्डिताः । **वाचमकृषतेति**—अपशब्देभ्यो विविक्तां कृतवन्त इत्यर्थः मन्त्रे 'अक्रत' इत्यत्र मन्त्रे घसेत्यादिना च्लेर्लुक् । मन्त्रे 'अत्रा' इत्यत्र ऋचितुनुघेति दीर्घः । सखायः=समानख्यानाः-शब्दब्रह्माधिगमने तन्मयमेवाखिलं जगत्पश्यन्त इति यावत्, जानते=प्राप्नुवन्ति । एकगम्यः=केवलेन निर्विकल्पकज्ञानेनैव प्राप्यः 'नान्यः पन्था विद्यतेऽयनाय' इति श्रुतेरिति भावः । **वाचीति**—वेदान्तसारभूतपरमार्थसंविद्रूपा लक्ष्मीर्वेदाख्ये ब्रह्मण्येषां वैयाकरणानां निहिता भवति 'वेदैश्च सर्वैरहमेव वेद्य' इत्युक्तेरिति भावः । **प्रायश्चित्तीयामिति** भावार्थे वृद्धाच्छ इति कैयटः । प्रायश्चित्तीयाः=प्रायश्चित्तनिमित्तोत्पादकाः । **दशम्यामिति**—जन्मदिनाद्दशरात्रोत्तरकाले इत्यर्थः 'अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका । दशरात्रेण शुध्यन्ति' इति स्मृतेर्दशरात्राण्याशौचसम्बन्धादाशौचमध्ये च श्रौतस्मार्तकर्मणां—

'सन्ध्यां पञ्च महायज्ञान्नैत्यिकं स्मृति कर्म च ।
तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥

इत्यनेन निषेधात् । **घोषवदादीति**—घोषवन्तो ये वर्णास्तेषामन्यतम आदौ यस्य तत् । **अन्तरन्तःस्थमिति**—मध्ये यरलवानामन्यतमो यस्य तदित्यर्थः । **अभिनिष्ठानान्तमिति**—अभिनिष्ठानं=विसर्गः अन्ते यस्य तदित्यर्थः, गृह्यसूत्रे तु 'दीर्घाभिनिष्ठानान्त'-मिति पाठस्तस्य दीर्घान्तमभिनिष्ठानान्तमित्यर्थः । कृतं=कृदन्तम् । **सुदेवो असि वरुणेति**—वैयाकरणे वरुणत्वारोपः, सप्तविभक्तिषु च सप्तसमुद्रत्वारोपोऽत्र बोध्यः । अनुक्षरन्ति=ताल्वनुप्राप्य प्रकाशन्ते । **उद्यत इति** । धातूनामनेकार्थत्वादुत्क्षिप्यत इत्यर्थ । **सूर्म्यमिति**—सूर्मिमिति प्राप्ते 'अमि पूर्व'-इत्यत्र 'वाच्छन्दसि' इत्यनुवृत्तेर्यणादेशः । **इत्यादि वार्त्तिकोक्तानीति** तदुक्तं भगवता पतञ्जलिना 'लोकतोऽर्थ प्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः ''' लोके तावत् अभक्ष्यो ग्रामकुक्कुटः अभक्ष्यो ग्रामसूकर इत्युच्यते भक्ष्यञ्च नाम क्षुत्प्रतिघातार्थमुपादीयते शक्यञ्चानेन श्वमांसादिभिरपि क्षुत्प्रतिहन्तुं तत्र नियमः

क्रियते इदं भक्ष्यमिदमभक्ष्यमिति तथा खेदात्स्त्रीषु प्रवृत्तिर्भवति समानश्च खेदविगमो गम्यायाञ्चाऽगम्यायाञ्च तत्र नियमः क्रियते इयं गम्येयमगम्येति वेदे खल्वपि पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्य आमिक्षाव्रतो वैश्य इत्युच्यते व्रतञ्च नामाभ्यवहारार्थमुपादीयते शक्यञ्चानेन शालिमांसादीन्यपि व्रतयितुं तत्र नियमः क्रियते तथा बैल्वः खादिरो वा यूपः स्यादित्युच्यते यूपश्च नाम पश्वनुबन्धार्थमुपादीयते शक्यञ्चानेन यत्किञ्चिदेव काष्ठमुच्छ्रित्यानुच्छ्रित्य वा पशुरनुबन्धुं तत्र नियमः क्रियते तथा अग्नौ कपालान्यधिश्रित्याभिमन्त्रयते 'भृगूणामङ्गिरसां घर्मस्य तपसा तप्यध्वम्' इति अन्तरेणापि मन्त्रमग्निर्दहनकर्मा कपालानि सन्तापयति तत्र च नियमः क्रियते एवं क्रियमाणमभ्युदयकारि भवतीति एवमिहापि समानायामर्थावगतौ शब्देन चापशब्देन च व्याकरणेन धर्मनियमः क्रियते शब्देनैवार्थोऽभिधेयो नापशब्देनेति एवं क्रियमाणमभ्युदयकारि भवतीति' इति। **आद्यं नैघण्टुकमिति**—स्पष्टमेतत्। तस्यास्तस्या इत्यस्य 'यां यां देवतां [1]निराह' इत्यादिः। **अनुभवत्यनुभवतीति**। द्विरुक्तिः समाप्तिसूचनाय। अत्र=निरुक्ते। **उपमार्थीय इति**—दुर्मदासो नेति मन्त्रस्य सुरायां पीतायां यथा दुर्मदा भवन्तीत्यर्थात्, एवम्, 'अश्वं न त्वा वारवन्तम्' इत्यादावप्युपमार्थीयो नञ् अश्वमिव त्वेत्यर्थात्। **अवगम्यत इति**—'नेति प्रतिषेधार्थीयोभाषाया,-मुभयमनु[2]ध्यायम्' इति ग्रन्थेनेति भावः। **तमिदन्द्रमिति**। 'यस्मात्स इदं सर्वं दृष्टवान् तस्मात्तमिदन्द्रं सन्तमिन्द्र इत्याचक्षत आचार्या इत्यर्थः। **यदप्रथयदिति** 'प्रजापतिः सृष्ट्यादौ जलमयं जगदवलोक्य वितर्कयन्नेकत्र कमलमपश्यत् तद्दृष्ट्वा विचारितवान् नेदमनाधारं सम्भवतीति ततो वाराहं रूपमा[3]स्थाय तत्कमलनालमालम्ब्य सलिले निमज्य तदाधारभूतां पङ्करूपामल्पामपि धरणीमानीय तस्यैव कमलस्य पत्रेषु प्रसारितवान् प्रथना (प्रसारणा) देवपृथिव्याः पृथिवीत्वमित्यर्थः। ग्रन्थकारः=निरुक्तकर्त्ता। इदम्=निरुक्तशास्त्रम्। व्याक-

(१) निर्वक्ति। (२) वेदे। (३) गृहीत्वा।

रणस्य=पाणिन्यादिप्रणीतस्य । **कात्स्न्र्यमिति**— कात्स्न्र्यसम्पादकमित्यर्थः, कात्स्न्र्यं=समग्रता । नन्वेतावता व्याकरणाङ्गता जाता निरुक्तस्येति चेत्तत्राह— **स्वार्थेति** । **प्रातरनुवाक इति** यान्याग्न्येयोषस्याश्विनरूपक्रतुत्रये सप्तसप्तच्छन्दांस्यनुक्रान्तानि तेषां सर्वेषां पृथक् सूक्तानि प्रत्येकं गृह्णीयात्तथा सति यावानृक्समूहः सम्पद्यते स प्रातरनुवाको भवतीति स्पष्टमन्यत्र । **आदध्यादिति**—अत्र 'अग्नि'-मिति शेषः । प्रमीयते=म्रियते । तस्मिन्नेव ग्रन्थे= उपनिषद्ग्रन्थे । सत्रपृष्ठं=यज्ञविशेषः । वसीयान्=प्रतिष्ठावान् धनवान् वा । **एकाष्टकायामिति**— पौष — माघ— फाल्गुनमासीयकृष्णाष्टम्योऽष्ट[1]कास्तासु कस्याश्चिदेकस्यामित्यर्थः । फल्गुनीपूर्णमासे=फाल्गुने । **कृत्तिकास्विति**- अत्र बहुवचनेन कृत्तिकादीनां सप्तानां ग्रहणं बोध्यं सप्तानामप्यग्न्याधाननक्षत्रत्वात् । **पुराणन्यायेति**—पुराणादीनि चत्वारि, अङ्गानि= शिक्षादीनि षट्, वेदाश्चत्वार इति चतुर्दश स्थानानि विद्यानां धर्मस्य च सन्तीत्यर्थः । एषां पुराणादीनां विद्यास्थानतां दर्शयितुमाह—ऐतरेयेत्यादि । **प्रतिसर्ग इति**-

'वाराहोऽयं श्रुतः सर्गो वराहाधिष्ठितो यतः ।
प्रतिसर्गः स्मृतोऽसौ वै दक्षाद्यैर्यः कृतः पृथक् ॥

श्रोत्राद्वायुः समुद्भूतो मुखादग्निरजायत ।
प्रतिसर्गो ह्ययं विष्णोस्तथा चापि दिशो दश ॥

इति कालिकापुराणोक्तलक्षणद्वय इत्यर्थः । **दृष्टान्तादीनामिति**- आदिपदेन सिद्धान्तावयव-तर्कनिर्णय वादजल्प-वितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां ग्रहणम् । **तदुहवा इति**—तदुक्तं तैत्तिरीयारण्यके (२ प्र० ३ अ०) 'रक्षाᳪंसि ह वा पुरोऽनुवाके तपोग्रमतिष्ठन्त तान्प्रजापतिर्वरेणोपामन्त्रयत तानि वरमवृणीतादित्यो नो योद्धा इति तान्प्रजापतिरब्रवीत् योधय-

१ अश्नन्ति देवाः पितरश्च यास्विति विग्रहे भोजनार्थकादशधातोस्तकन्प्रत्ययः । 'अष्टका पितृदैवत्ये' इतीत्वाभावः ।

ध्वमिति तस्मादुत्तिष्ठन्तꣳहवा एतानि रक्षाꣳस्यादित्यं योधयन्ति यावदस्त-मगात्तानि हवा एतानि रक्षाꣳसि गायत्रिया (त्र्या) भिमन्त्रितेनाम्भसा शाम्यन्ति तदुहवा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्रिया (त्र्या) भिमन्त्रिता आ (अ) प ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्री भूत्वा तानि रक्षाꣳसि मन्देहारुणे द्वीपे प्रक्षिपन्ति' इति अस्यायमर्थः-हवा शब्दः प्रसिद्धार्थकः, पुरोऽनुवाके=पूर्वकाले रक्षांसि=राक्षसाः उग्रं=तीव्रं तपः अतिष्ठन्त=कृतवन्तस्तेन तुष्टः प्रजापतिस्तान् रक्षोविशेषान् वरेणोपामन्त्रयत=वरं वृणीध्वमित्युक्त्वा तान् परितोष्य तपसो निवारितवान् ततस्तानि रक्षांसि 'आदित्योऽस्माकं योद्धा भवतु' इत्येवं वरं वृतवन्तः सोऽपि तेभ्य-'आदित्येन सह युद्धं कुरुते' त्यनुज्ञां दत्तवान् तस्मात्तानि रक्षांसि उत्तिष्ठन्तं हवा=उद्यन्त-मेवादित्यं योधयन्ति=युद्धे प्रवर्त्तयन्ति यावदयमादित्योस्तमगात्=अस्तं गच्छति-उदयमारभ्यास्तमयसमयपर्यन्तमादित्येन सह युद्धं कुर्वन्ति तदा च युद्धे प्रवृत्तानि तानि रक्षांसि 'तत्सवितुर्वरेण्य' मित्यनया गायत्र्याऽभिमन्त्रितं यज्जलं तेनैव शाम्यन्ति न त्वन्येन केनापि, तदुहवै=तस्मादेव कारणात् एते=लोके दृश्यमाना ब्रह्मवादिनो=वेदस्य वक्तारो द्विजाः सन्ध्यायां=प्रातः सन्ध्याकाले पूर्वाभिमुखाः सन्तो गायत्र्या ऽभिमन्त्रितं जलमूर्ध्वं विक्षिपन्ति=प्रक्षिपेयुः ताश्च तथा विक्षिप्ता आपो गायत्रीसामर्थ्याद्वज्ररूपं प्राप्य तान्यादित्य-युद्धार्थमागतानि रक्षांसि मन्देहनामकानां रक्षसां स्वकीये कस्मिँश्चिदरुण-नामनि द्वीपे प्रक्षिपन्तीति। **पञ्च वेति**-'पञ्च वा एते महायज्ञाः सतति प्रतायन्ते सतति सन्तिष्ठन्ते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञः' इति वाक्यस्वरूपम्, अत्र 'सतति' इत्यस्य सततमित्यर्थः स्पष्टं शिष्टम्।

'ब्रह्मयज्ञो नृयज्ञश्च देवयज्ञश्च सत्तम।
पितृयज्ञो भूतयज्ञः पञ्चयज्ञाः प्रकीर्त्तिताः॥"

इति पाद्मे क्रियायोगसारेऽपि। उपसंहरति उक्तेति। **शेवधिष्टे इति**-'युष्मत्तत्ततक्षुष्वन्तः पादम्' इति (८।३।१०३) सूत्रेण सस्य षत्वे ष्टुत्वं ज्ञेयम्। अनधिकारिणेऽनुपदिश्य=अपात्राय न दत्त्वा। असूयां=दोषाऽऽरोपम्।

आर्जवेन=सारल्येन । मा=माम् । **उपसर्गवशादिति**–'धातुपाठे हिंसानादरयोरर्थयोर्वर्त्तमानत्वेऽपि' इति शेषः । आदौ=प्रारम्भदशायाम् । मुख्यत्वे हेतुमाह–**पूर्वसिद्धौ त्विति**–जन्मदातारावित्यर्थः । मन्त्रे गुरोरित्यत्र 'कृत्यानां कर्त्तरिवा' इति कर्त्तरिषष्ठी । भोजनीयाः=पालनीयाः भुजपालनाभ्यवहारयोरिति धातुपाठात् । कतमच्चनाहेत्यस्यार्थमाह-**कदाचिदपीति** ॥

इति सकलवेदवेदाङ्गतत्त्वज्ञानपारदृश्वमहामहोपाध्याय **सायणाचार्यकृतर्ग्वेद**-
भाष्योपोद्घातसम्बन्धिनी विविधविरुदावलीविराजमानमानोन्नत-
महाराजाधिराजमिथिलाधीश्वरकल्पतरुकल्प–**'श्रीलकामेश्वर-
सिंह'** महोदय प्रभुवरच्छत्रच्छायाश्रित–लोहनाविद्यापीठ-
प्रधानाध्यापक'मैथिल **'श्रीत्रिलोकनाथमिश्र'**-
कृति–'बादरीनाथी'–नाम्नीटीका
समाप्तिमगात् ॥

"स्वर्गीयनिजप्रियाविषये किञ्चित्"

दयितानाकृतशून्यं मनोरथं जातु या ममैकापि ।
सा पञ्चतां गता द्रुतमशून्ययद्विश्वमेव हा सहसा ॥१॥
पञ्चभिरिषुभिः प्राणान् पञ्चाऽऽदत्सुः स्मरः प्रपञ्ची मे ।
बत जीवितप्रियाया असङ्गतां पञ्चतामतनोत् ॥२॥
गौराङ्ग्यपि मयि रक्ता भवनद्वारात्तथैव मे हृदयात् ।
पदमपि गन्तुमशक्ता या परलोकं गता सुचरितापि ॥३॥
तत्स्मृतये टीकेयं प्रकाशिता सा प्रिया व्ययातापि ।
स्मृत्यानया मया न सुदुष्प्रापास्यात्त्रिलोकेन ॥४॥
हित्वाऽखिलविश्वाशा विश्वासाद्यां व्यधां निजार्द्धाङ्गीम् ।
सा वि-श्वासा जाता विश्वाशायेन्नमोऽस्तु कालाय ॥५॥

ऋग्वेद संहिता

भारतीय नक्षत्राकाश के उज्ज्वल सहस्रांशु ऋग्वेद की प्रभा से अखिल विश्व आलोकित है। निखिल भूमण्डल के निःशेष मानव इसके ऋणी हैं। ऋग्वेद-गहन-कान्तार में प्रविष्ट होने के लिए भूप्रसिद्ध वेदव्याख्याता विद्वत्कुल-शिरोमणि श्रीसायणाचार्य जी ने अपना भाष्य रचकर द्विजवरों को विभूषित किया। उपरोक्त ग्रन्थ उनके भाष्य के साथ पाँच अष्टकों में मुद्रित होकर विक्रयार्थ प्रस्तुत है। शेष तीन अष्टक भी प्रकाशित होंगे। पाँच अष्टकों का मूल्य ४०) है। यह पुस्तक प्रत्येक विद्यालय, द्विजालय, पुस्तकालय, ब्रह्मचर्याश्रम में अवश्य रहनी चाहिए।

सर्वविध-पुस्तक-प्राप्तिस्थानम्—

मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृत बुकडिपो,

कचौड़ीगली, बनारस सिटी।